कर्पूरमञ्जरी

(The Karpuramanjari)

वासुदेवकृतया टीकया, पाठान्तर-परिशिष्टादिभिः,
बालभारतेन च सनेता

श्रीमद्दिन्दिपल्लीवरणाष्टेयाभिना
नारायण राम आचार्य
'काव्यतीर्थ' इत्यनेन संशोधिता

निर्णयसागरमुद्रणालयम्, मुंबई

[All rights reserved by the publisher]

Publisher:-Satyabhamabai Pandurang } for the 'Nirnaya Sagar' Pre
Printer:-Ramchandra Yesu Shedge, } 26 28 Kolbhat Street, Bomba

प्रास्ताविकम्

माधवकृत-शंकरविजय-भोजकृतसरस्वतीकण्ठाभरण-क्षेमेन्द्रकृतौचित्यविचारचर्चा-सुवृत्ततिलक-कविकण्ठाभरण-सोमदेवकृतयशस्तिलकचम्पू-शार्ङ्गधरपद्धति-आरोह-कमगदत्तजल्हणसंगृहीतसूक्तिमुक्तावलि-हरिकविसंगृहीतसुभाषितहारावलि-वल्लभदेव-संगृहीतसुभाषितावलि-राजशेखरकृतबालरामायण-बालभारत-कर्पूरमञ्जरी-विद्धशालभञ्जिकादिसंस्कृतग्रन्थेषु, तथा विल्सनपण्डितकृत 'हिन्दूथिएटर'-मट्टमोक्षमुल्लर-कृत 'इण्डिया, व्हाट् इट् कॅन् टीच् अस्'-वेबरपण्डितकृत 'हिस्टरी ऑफ् इण्डियन् संस्कृत लिटरेचर'-अनेकपण्डितसंकलित 'इण्डियन् ॲण्टिक्वेरी'-डॉक्टरपीटर्सन-रिपोर्ट-डॉक्टरभाण्डारकररिपोर्टादिइङ्गिलशभाषानिबद्धेषु ग्रन्थेषु च लिखितं राज-शेखरविषय सम्यग्विलोक्य विस्तरभिया चात्र तत्सर्वं परित्यज्य तन्निर्गलितार्थं एव संक्षेपेण लिख्यते.

— राजशेखरस्य समयनिश्चितायन्यमतानि —

तत्र शंकरविजये 'तत्रोदित कक्षन राजशेखर' इति द्वितीयसर्गप्रारम्भे,

'एवमेनमतिमर्त्यचरित्र सेवमानजनदैन्यलवित्रम् ।
केरलक्षितिपतिर्हि दिदक्षु प्राहिणोत्सचिवमार्हतभिक्षु ॥'

'तेन पृष्टकुशल क्षितिपाल स्वेन सृष्टमथ शास्त्रवकाल. ।
हाटकायुतसमर्पणपूर्वं नाटकत्रयमयोचदपूर्वम् ॥' इति पञ्चमसर्गे,

'कवितानुशालोऽथ केरलक्ष्माकमन कक्षन राजशेखराख्य' ।
मुनिवर्यमसुं मुदा वितेने निजकेटीरनिघृष्टपङ्कजाग्रम् ॥
अथते किमु नाटकत्रयी सेवसुना सयमिना ततो नियुक्त'

इत्यादिचतुर्दशसर्गे च राजशेखरकथा वर्तते, नाटकत्रयनामानि तु शंकरविजये न सन्ति एतेन नाटकत्रयकर्ता केरलक्षितिपालो राजशेखर सप्तमशतकप्रारम्भम-मुद्भूतशंकराचार्यसमकालीन आसीदिति स्फुटमेव प्रतीयते किं तु भोजप्रबन्धादिव-च्छंकरविजयस्यापि समयादिनिर्णयविषये विश्वासानर्हत्वान्नैतच्चूड्डेयम् न चास्य शंकरविजयस्य कर्ता पण्डितशिरोमणि सायनमाधवाचार्य. अय च कश्चिदन्य एव नवकालिदासापर्यायो माधव इति भाति

राजशेखरकृतेषु बालरामायणादिषु महेन्द्रपालस्य वर्णनमस्ति. तत्र 'इण्डियन् ऍण्टिक्वेरी'नामकमासिकपुस्तकस्य पञ्चदशे भागे ११२ मिते पृष्ठे 'ॐ स्वस्ति श्रीमहोदयसमावासितानेकगोहस्त्यश्वरथपत्तिसंपन्नस्कन्धावारात्——परमभगवतीभक्तो महाराजश्रीभोजदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीचन्द्रभट्टारिकादेव्यामुत्पन्नः परमभगवतीभक्तो महाराजश्रीमहेन्द्रपालदेवः श्रावस्तीभुक्तौ श्रावस्तीमण्डलान्तःपातिबालयिकाविषयसंबद्धपानीयकग्रामसमुपगतान्सर्वानेव यथास्थाननियुक्तान्प्रतिवासिनश्च समाज्ञापयति—— संवत्सर १०० ५० ५ माघशुदि १० निबद्धम्' इति महेन्द्रपालस्य दानपत्रं मुद्रितमस्ति. अत्र पृथक्पृथग्लिखितानामङ्कानां संकलने जाता १५५ मिता संख्या. अयमेव श्रीहर्षवर्धनसंवत्सरः, तत्र च ६०६ वर्षेषु योजितेषु जातः ७६१ मितः क्रिस्तसंवत्सरः. 'अयमेव पूर्वलिखितदानपत्रसमयः' इति फ्लीटपण्डितः. एतदनुरोधेनैव सुभाषितावल्युपोद्घाते राजशेखरसमयो लिखितः; किं त्वत्र श्रीहर्षवर्धनसंवत्सरादिकल्पनं दुष्टिरहितमिति ७६१ मितक्रिस्तसंवत्सरे राजशेखरो बभूवेत्यपि सदिग्धमेव. दानपत्रं त्वेतद्राजशेखरवर्णितमहेन्द्रपालस्यैवास्ति, यतोऽस्मिन्दानपत्रे महोदयस्य नाम वर्तते. राजशेखरकृतबालभारतप्रस्तावनायां च 'कथमेते महोदयमहानगरलीलावतंसा विद्वांसः सामाजिकाः' इत्यादयस्ति. महोदयमिति कान्यकुब्ज (कनौज)स्य नामान्तरम् कान्यकुब्जं महोदयम्, 'कन्याकुब्जं गाधिपुरं कौशं कुशस्थलं च तत्' इति हैमनाममालायाम्, 'महोदयः कान्यकुब्जे' इति विश्वप्रकाशमेदिनीकोषयोश्च वर्तते. बालरामायणे दशमेऽङ्केऽपि 'लक्ष्मणः—इदं पुनस्ततोऽपि मन्दाकिनीपरिक्षिप्तं महोदयं नाम नगरं दृश्यते। रामः—शश्वत्सुधामवसुधामहितं द्विषद्भिर्नो गाहितं भवति गाधिपुरं पुरस्तात्। वैदेहि देहि शफरीसदृशं दृशं तदस्मिन्नितम्बिनि नितम्बवहद्युसिन्धौ ॥ ८८ ॥ इदं द्वयं सर्वमहापवित्रं परस्परालंकरणैकहेतु। पुरं च हे जानकि, कान्यकुब्जं सरिच्च गौरीपतिमौलिमाला ॥ ८९ ॥' इत्यादयस्ति. एतेन राजशेखरकविः कान्यकुब्जमहीपतेर्महेन्द्रपालस्य सभायामासीदिति ज्ञायते. बाणभट्ट-भवभूति-वाक्पतिराज-श्रीहर्षादयोऽन्येऽपि बहवो महाकवयः कान्यकुब्जनरपतीनां हर्षवर्धनयशोवर्मप्रभृतीनां सभासु स्वस्वसमय आसन्.

राजशेखरो दशमे शतके बभूवेति भाण्डारकरपण्डितः, एवमेव वेबरपण्डितः, एकादशशतकसमाप्तौ द्वादशशतकप्रारम्भे वेति विल्सनपण्डितः, बालरामायणकर्ता राजशेखरश्चतुर्दशशतके आसीदिति च भट्टमोक्षमुद्गरनामा वदति.

— राजशेखरस्य कालनिर्णयः —

वस्तुतस्तु राजशेखरकविः ८८४ मितविक्रमसंवत्सरादनन्तरम् ९५९ संवत्सरात्पूर्वं मध्ये वर्तमानेषु ७५ वर्षेषु बभूव यतः ८८४ मितसंवत्सरपर्यन्तं काश्मीराधिपयशोवर्मणः समकालीनयोरानन्दवर्धनरत्नाकरयोः राजशेखरकृतौ स्तुतिश्लोकौ सूक्तिमुक्तावलि-सुभाषितहारावल्योर्विशिष्टकविप्रशंसाप्रकरणे लभ्येते 'तत्कर्ता कश्चिदन्यो राजशेखरः' इत्यपि न वक्तुं युक्तम् यतो बालरामायणप्रणेतृनामकालजलदतरल-मुरारानन्दकवीनां राजशेखरपूर्वपुरुषाणां नातिप्रसिद्धानामपि देशकुलनामग्रहणपूर्वकं वर्णनश्लोकास्तत्रैव विद्यन्ते, तन्मध्य एव रत्नाकरानन्दवर्धनयोरपि वर्णनमस्ति तेन सर्वेषां श्लोकानां कर्ता एक एव राजशेखरः, अथ च ८८१ मिते शके ९५९ मिते वा विक्रमाब्दे जैनसोमदेवेन यशस्तिलकचम्पूः प्रणीता तत्र तृतीय आश्वासे माघादिकविनामसु राजशेखरस्यापि नाम वर्तते तस्मात्तत्कालात्प्राचीनो राजशेखरः, न च प्रबन्धकोषकर्तुर्जैनराजशेखरसूरेस्तत्र नामास्तीति वक्तव्यम् प्रबन्धकोषस्य १३४७ मिते संवत्सरे निर्माणाद्राजशेखरसूरेर्यशस्तिलककर्तुरर्वाचीनत्वात्.

— राजशेखरस्य यशोदेशादिपरिचय —

राजशेखरो ब्राह्मणः क्षत्रियो वाऽऽसीदिति सन्दिग्धमेव यतो बालरामायणादिषु 'उपाध्यायः' 'गुरुः' इत्यादिपदैरात्मानं निर्दिशति, तेन तस्य ब्राह्मणत्वं स्फुटं प्रतीयते, क्षत्रियस्याध्यापनादिष्वनधिकारात्. राज्ञां शेखरो राजशेखर इति तु समासो नोचितः राज्ञां चन्द्र शेखरो यस्य स इत्युचित समासः यतः कर्पूरमञ्जरीप्रस्तावनायाम् 'रजनीवल्लभशिखण्ड' इति राजशेखरनाम्नः पर्यायशब्दो वर्तते रजनीवल्लभश्चन्द्र शिखण्ड शेखरो यस्य इति तदर्थः, अथ च कर्पूरमञ्जरीप्रस्तावनायामेव 'चाहमानकुलमौलिमालिका राजशेखरकवेः प्रगेहिनी' इत्यायाति चाहमानकुलं 'चौहाण' इति प्रसिद्धं क्षत्रियकुलम् यस्मिन्नम्मीरपृथ्वीराजादयः क्षितिपालका अभूवन्, तत्कुलप्रसूता च कथमस्मिन्युगे ब्राह्मणस्य भार्या भवितुमर्हति? तस्माद्राजशेखरः क्षत्रिय आसीदिति कथमपि नातीवानुचितं भाति

राजशेखरो महाराष्ट्रदेशोत्पन्नस्तेदिदेशोत्पन्नो वेत्यत्रापि सन्देह एव यतो बालरामायणप्रस्तावनायां स्वप्रपितामहमकालजलदं महाराष्ट्रचूडामणिं वदति सूक्तिमुक्तावल्यादिस्थकविवर्णनश्लोकेषु स्वपूर्वपुरुषं मुरारानन्दं चेदिमण्डलमण्डनं च वदति भाति चार्यं चेदिदेशोद्भवः, चेदिदेशमहीपतीनां कलचूरीनामेव विद्वच्चक्रमञ्जिकादिषु

प्रायशो वर्णनात्. एतत्सर्वमग्रे विशिष्टकविवर्णन-श्लोकेषु टिप्पण्या स्फुटीभविष्यति. विल्हणकविर्यथा स्वदेशं काश्मीरं परित्यज्य कर्णाटमहीपतेराश्रये जगाम, तद्वदयमपि स्वदेशं विहाय कान्यकुब्जमहीपालं शिश्रिये.

दशरूपकावलोक-सरस्वतीकण्ठाभरण-क्षीरस्वामिकृतामरकोषटीका मुकुटकृतामरकोषटीका-श्रीमदभिनवगुप्ताचार्यकृतध्वन्यालोकलोचन-काव्यप्रकाश-साहित्यदर्पण-शार्ङ्गधरपद्धति-सूक्तिमुक्तावलि सुभाषितावलि-सुभाषितहारावल्यादिषु राजशेखर-श्लोका, श्रीकण्ठचरितसमाप्तिसर्गे राजशेखरस्य नाम च वर्तते. एते सर्वेऽपि ग्रन्था अस्मिन्निर्णीतराजशेखरसमयादर्वाचीनाः. केवलं क्षीरस्वामिविषये मनाक्संदेहः. काश्मीरदेशमहीपालस्य जयापीडस्याध्यापकः क्षीराभिधः कश्चन शब्दविद्योपाध्याय आसीत् (राजतरङ्गिणी ४।४८८). स एवामरकोषटीकाकर्ता क्षीरस्वामीति न सम्यक्. यतः क्षीरस्वामिकृतामरकोषटीकाया 'श्रीभोजः' इति नाम बहुषु स्थलेषु वर्तते. भोजश्चैकादशशतकमध्यभाग आसीत्. तस्मादेकादशशतकमध्यभागादर्वाचीनः क्षीरस्वामी कथमष्टमशतकोत्तरार्धसमुद्भूतस्य जयापीडनृपतेरध्यापको भवितुमर्हति? तस्मात्क्षीरोपाध्यायात्क्षीरस्वामी भिन्न एव.

— राजशेखरप्रणीता ग्रन्थाः —

बालरामायणम्, बालभारतम् (प्रचण्डपाण्डवम्), कर्पूरमञ्जरी, विद्धशालभञ्जिका चेति ग्रन्थचतुष्टयमेव राजशेखरकृतं प्राप्यते. तत्र बालरामायणं मूलमानमेव, बालभारतस्य केवलमङ्कद्वयम्, नारायणदीक्षितकृतटीकासमेता विद्धशालभञ्जिका, वासुदेव-धर्मदास-कामराज-कृष्णसूनुकृताभिष्टीकाभिः समेता कर्पूरमञ्जरी च लभ्यते. बालरामायणे भर्तृमेण्ठ-भवभूति-शंकरवर्मा-अकालजलद-तरल-सुरानन्द-कविराजानाम् कर्पूरमञ्जर्यां च मृगाङ्कलेखाकथाकारापराजित-हाल-हरिचन्द्र-नन्दिचन्द्र-कोटिसाना कवीनां नामानि सन्ति. तेषु शंकरवर्मापराजितौ राजशेखरसमकालीनौ, अकालजलद-तरल-सुरानन्द कविराजा राजशेखरस्य पूर्वपुरुषाः. तेषु कविराजो राघवपाण्डवीयकर्ता, भर्तृमेण्ठ-भवभूतिहाल-हरिचन्द्राः प्रसिद्धा एव, नन्दिचन्द्र-कोटिसौ चाप्रसिद्धौ स्तः. पूर्वोक्तग्रन्थचतुष्टयप्रस्तावनासु राजशेखरेण रघुकुलचूडामणिर्महेन्द्रपालः स्वशिष्यत्वेन वर्णितः. बालभारतप्रस्तावनायां तु निर्भयनरेन्द्रसूनोर्महीपालदेवस्यापि वर्णनमस्ति. निर्भयराजोऽपि राजशेखरस्य शिष्य एवासीत्. 'बालकविः कविराजो निर्भयराजस्य तथोपाध्याय' इति कर्पूरमञ्जरीप्रस्तावनायाम् 'विभ्रमराजस्य

तथोपाध्याय 'इति कामराजसमत पाठ'. निर्भयराज इति महेन्द्रपालस्यैव नामान्तरमिति केचित्. महीपालदेवश्च चण्डकौशिकप्रस्तावनायामार्यक्षेमीश्वरेणापि वर्णित.

'कर्णाटीदशनाङ्कित वितमहाराष्ट्रीकटाक्षाहत प्रौढान्ध्रीस्तनपीडित प्रणयिनीभ्रूभङ्गवित्रासित । लाटीबाहुविवेष्टितश्च मलयस्त्रीतर्जनीतर्जित सोऽयं सम्प्रति राजशेखरकविर्वाराणसीं वाञ्छति ॥' अयं श्लोक औचित्यविचारचर्चायाम्, 'दातुर्वारिधरस्य-' इत्यादिश्लोका सुभाषितावल्याम्, 'भासो रासिलसौमिलौ' इत्याद्या श्लोका शार्ङ्गधरपद्धतौ, 'अकालजलदेन्दो सा' इत्याद्या बहव श्लोका सूक्तिमुक्तावलि-सुभाषितहारावल्यो राजशेखरनाम्ना समुद्धृता सन्ति ते च प्रसिद्धेषु राजशेखरग्रन्थेषु न प्राप्यन्ते तस्मात्सन्त्यन्येऽपि केचन राजशेखरकृता ग्रन्था इति ज्ञायते 'विद्धि न षट्प्रबन्धान्' इति च बालरामायणप्रस्तावनाया स्वयमेव राजशेखरो वदति. अस्य कवे शार्दूलविक्रीडितच्छन्दोनिबद्धा श्लोका अतिसमीचीना सन्ति. 'शार्दूलक्रीडितैरेव प्रत्यातो राजशेखर । शिखरीव परं वज्रै सोल्लेखैश्चशेखर ॥' इति सुवृत्ततिलके क्षेमेन्द्र 'आगस्कारिणि कैटभप्रमथने तत्ताडनार्थं रया नाभीपङ्कजमस्रतां गमयितुं जाते प्रयत्ने श्रिय । स्रावासोन्मथनोपपादितभयभ्रान्ताम्भसस्तत्क्षणादन्धाण्यपरा पुरातनमुनेर्वाग्वृत्तय पान्तु व ॥' अयं श्लोक सूक्तिमुक्तावलौ राजशेखरान्तेवासिनाम्ना समुद्धृत तेन राजशेखरस्य कश्चन शिष्योऽपि कविरासीत्

— राजशेखरकृतोऽन्यकविपरिचयः —

सूक्तिमुक्तावलि-सुभाषितहारावलि-शार्ङ्गधरपद्धतिषु राजशेखरकृता प्राचीनकवेः प्रशंसाश्लोका केचन समुपलभ्यन्ते, ते सर्वेऽप्यत्युत्तरवादत्र कविनामक्रमेण समुद्रियन्ते—

अकालजलदेन्दो. सा ह्यया वचनचन्द्रिका ।
नित्य कविचकोरैर्या पीयते न च हीयते ॥

(सूक्तिमुक्तावलि , सुभाषितहारावलि)

अकालजलदकवी राजशेखरस्य प्रपितामह आसीत् 'अकालजलदस्य प्रणमु' इति विद्धशालभञ्जिकाप्रस्तावनायाम् 'स मूर्तो यत्रासीद्गुणगण इवाकालजलद सुरानन्द सोऽपि श्रवणपुटपेयेन वचसा । न चान्ये गण्यन्ते-तरलकविराजप्रभृतयो महाभागस्तस्मिन्नयमजनि यायावरकुले ॥ तदामुष्यायणस्य महाराष्ट्रचूडामणेरकालजलदस्य चतुर्थो दौहित्रि (दौहित्रि) शीलवतीसूनुरुपाध्यायश्रीराजशेखर ' इति

च बालरामायणप्रस्तावनायां वर्तते. अकालजलदकृतः कोऽपि ग्रन्थो नाद्यापुपलब्धः. केवलं 'मेकैः कोटरशायिभिः' इत्यादिश्लोकः शार्ङ्गधरपद्धत्यादिषु लभ्यते.

ध्वनिनातिगभीरेण काव्यतत्त्वनिवेशिना ।
आनन्दवर्धनः कस्य नासीदानन्दवर्धनः ॥
(सूक्तिमुक्तावलि, सुभाषितहारावलिः.)

काव्यालोकादिग्रन्थकर्ता काश्मीरदेशोद्भवोऽवन्तिवर्मनृपतिसभाजनोऽयमानन्दवर्धनाचार्यः प्रसिद्ध एव.

अकालजलदश्लोकैश्चित्रमात्मकृतैरिव ।
जातः कादम्बरीरामो नाटके प्रवरः कविः ॥
(सूक्तिमुक्तावलिः.)

सरस्वतीव कर्णाटी विजयाङ्का जयत्यसौ ।
या वैदर्भगिरां वासः कालिदासादनन्तरम् ॥
(सूक्तिमुक्तावलिः, सुभाषितहारावलि.)

'एकेऽभूवलिनाम्नि पुटिनाद्वल्लीकरावारके सर्वे कवयो भवन्ति गुरवस्तेभ्यो नमोऽस्तु हरये । अर्थानो यदि गद्यपद्यरचने चेतो मनाङ्नैते तेषां मूर्ध्नि ददामि वामचरणं कर्णाटराजप्रिया ॥' एतच्छ्लोककर्त्री कदाचिदियमेव विजयाङ्का कर्णाटी स्यात्.

एकोऽपि जीयते हन्त कालिदासो न केनचित् ।
शृङ्गारे ललितोद्गारे कालिदासत्रयी किमु ॥
(सूक्तिमुक्तावलिः, सुभाषितहारावलिः.)

जानकीहरणं कर्तुं रघुवंशे स्थिते सति ।
कविः कुमारदासश्च रावणश्च यदि क्षमः ॥
(सूक्तिमुक्तावलिः.)

काव्यमालासंज्ञकगुच्छके औचित्यविचारचर्चायां १४४ पृष्ठे कुमारदासनामोपरि टिप्पणं द्रष्टव्यम्.

दूरादपि सता चित्ते लिखित्वाश्चर्यमञ्जरीम् ।
कुलशेखरवर्मा भ्या(?) चकाराश्चर्यमञ्जरीम् ॥

(सूक्तिमुक्तावलि ,)

आश्चर्यमञ्जरी कथन ग्रन्थ 'पाणिनिप्रख्याहारो वा महाप्राणसमाश्लिष्टो झषालिङ्गितश्च समुद्र , इत्याश्चर्यमञ्जरी' इत्यमरकोषपञ्जिकाया वारिवर्गे झषपदव्याख्याने मुकुट 'केरलोत्पत्ति-केरलविशेषमाहात्म्यनामकग्रन्थाभ्यां समुद्धृते कस्मिंश्चन लेखे केरलदेशक्षितिपाल कुलशेखर ३३२ मिते शिवसवत्सरे आसीदिति दर्शितम्' इति पामन-शिवराम-आपटेप्रणीताया राजशेखरवर्णनपुस्तिकाया १३ पृष्ठे टिप्पण्यां द्रष्टव्यम् कुलशेखरनृपतिकृता मुकुन्दमाला प्रसिद्धैव कुलशेखर एव राजशेखर इति मिथ्यैव केरलीयानां प्रवाद , यतो राजशेखरेणात्र कुलशेखरो वर्णित

आदौ गणपतिं वन्दे महामोदविधायिनम् ।
विद्याधरमणेर्यस्य पूज्यते कण्ठगर्जितम् ॥

(सूक्तमुक्तावलि , सुभाषितहारावलि)

'महामदविधायिनम्' इति पुस्तकान्तरपाठ

हृता शिरिनि गौणाढ्या श्लोकशेषापि सा कथा ।
सुरलीढेन्दुलेखेव लोके पूज्यतमाभवत् ।

(सुभाषितहारावलि ,)

गुणाढ्यप्रणीता बृहत्कथा पञ्चलक्षमितामेव दृश्या, केवलमेकलक्षमितावशिष्टा, इति कथासरित्सागरेऽप्यनन्तरं कथा द्रष्टव्या

अनुप्रासिनि संदर्भे गोनन्दनसम क्वुत ।
यथार्थनामतैवास्य यद्वाम्बदति चारुताम् ॥

(सूक्तिमुक्तावलि .)

यायावरकुलश्रेणेर्हारयष्टेश्च मण्डनम् ।
सुवर्णबन्धरुचिरस्तरलस्तरलो यथा ॥

(सूक्तिमुक्तावलि , सुभाषितहारावलि .)

तरलो हारमध्यमणिरपि अयमपि कवी राजशेखरस्य पूर्वपुरुष पूर्वमकालजल-दश्लोकटिप्पणे लिखितं बालरामायणप्रस्तावनापद्यं विलोकनीयम् राजशेखरोऽप्या-त्मानं यायावरकुलोत्पन्नमेव स्वग्रन्थेषु वर्णयति.

कर्तुं त्रिलोचनादन्यः कः पार्थविजय क्षमः ।
तदर्थः शक्यते द्रष्टुं लोचनद्वयिभिः कथम् ॥
(सुभाषितहारावलि.)

त्रयोऽग्नयस्त्रयो वेदास्त्रयो देवास्त्रयो गुणाः ।
त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः ॥
(शार्ङ्गधरपद्धति, सुभाषितहारावलि.)

दशकुमारचरितम्, काव्यादर्शश्चेति प्रबन्धद्वयमेव लभ्यते मत्तविलासप्रहसनं तद्-ण्डापरनामा रङ्गनाथकवि, न तु दण्डी कलापरिच्छेद-छन्दोविचित्यादय सन्त्यन्येऽपि दण्डिकृता ग्रन्था इति काव्यादर्शोऽवशायते कविरयं सप्तशतकप्रारम्भस्तुतेः.

सरस्वतीपवित्राणां जातिस्तत्र न कारणम् ।
व्यासस्पर्धी कुलालोऽभूद्भद्रोणो भारते कविः ॥
(शार्ङ्गधरपद्धति.)

पुनरान्तरे 'न देहिनाम्' इति पाठ.

द्विसंधाने निपुणता सा त्वा चके धनंजयः ।
यया जातं फलं तस्य सतां चक्रे धनं जयः ॥
(सूक्तिमुक्तावलि, सुभाषितहारावलि.)

यमुद्दिश्य कवेरियमुक्तिः द्विसंधानकाव्यकर्तृत्वं धनंजयनाम्नैव शार्ङ्गधर, सदुक्ति-कर्णामृतेऽपि द्विसंधानकाव्यस्य नामान्तरम् कविरात्मनः प्रसिद्धं मुद्रितं च राघव-पाण्डवीयकाव्यं तिलम्

सन्ति पाणिनये तर्का यस्य रुद्रमसादत ।
आदौ व्याकरणं पात्रमनु जाम्बवतीजयम् ॥
(सूक्तिमुक्तावलि, सुभाषितहारावलि.)

'पय पृथ्वीतिभि स्पृष्टा वान्ति वाता शनै शनै, इति जाम्बवतीविजयवाक्यम्', 'स पार्थैरभ्यरमापुपूरे, इति जाम्बवत्यां पाणिनि' इत्यादि जाम्बवतीजयकाव्यपद्यैकदेशा मुकुटेनामरकोषटीकायामुदाहृता सन्ति 'तथाहि पाणिने पातालविजये महाकाव्ये—सध्यावधूं गृह्य करेण' इत्यादि काव्यालंकारटीकायां नमिसाधुना चोदाहृतम् तेन जाम्बवतीजयस्य पातालविजयमित्यपि नामान्तरं भाति सुभाषितावलि-सदुक्तिकर्णामृतादिषु बहव पाणिनिश्लोका प्राप्यन्ते 'स्पृहणीयत्व चरितं पाणिनेरुपजातिभि । चमत्कारैकसारामिवद्यानस्येव जातिभिः ॥' इति सुभाषितावलिस्थश्लोकेनोपजातिच्छन्दोनिबद्धा पाणिनिश्लोका अयुक्तमा सन्तीति ज्ञायते य एव व्याकरणसूत्रकर्ता स एव जाम्बवतीजयकाव्यस्य कर्तेत्यस्माद्राजशेखरश्लोकात्स्फुटं प्रतीयत तस्मात्पाणिनिद्वयकल्पनं व्यर्थमेव

प्रद्युम्नान्नापरस्येह नाटके पत्यो गिर ।
प्रद्युम्नान्नापरस्येह पौष्पा अपि शरा खरा ॥

(सूक्तिमुक्तावलि)

सहर्षचरितारब्धाद्भुतकादम्बरीकथा ।
बाणस्य वाण्यनार्येव स्वच्छन्दा भ्रमति क्षितौ ॥
बाणेन हृदि लग्नेन यन्मन्दोऽपि पदक्रम ।
प्राय कविकुरङ्गाणा चापल तत्र कारणम् ॥

(सूक्तिमुक्तावलि)

सूक्तीनां सरकेलीना कलाना च विलासभू ।
प्रभुदेवी कविर्लोटी गतापि हृदि तिष्ठति ॥

(सूक्तिमुक्तावलि, सुभाषितहारावलि)

कृत्स्नप्रबोधकृद्वाणी भा रवेरिव भारवेः ।
माघेनेव च माघेन कम्प कस्य न जायते ॥

(सुभाषितहारावलि)

मायूराजसमो जज्ञे नान्यः करचुलिः कविः ।
उदन्वतः समुत्तस्थुः कति वा तुहिनांशवः ॥

(सूक्तिमुक्तावलिः, सुभाषितहारावलिः.)

हैहयवंशोद्भवाः करचुलि (कलचुरि) नामानः केचन क्षत्रिया अद्यापि 'रीमा' (रेवा)। राज्ये वर्तन्ते. राजशेखरसमये चेदिदेशान्तर्गता माहिष्मती नाम नगरी तेषां राजधान्यासीत्. 'यन्मेखला भवति मेकलशैलकन्या वीतेन्धनो वसति यत्र च चित्रभानुः। तामेष पाति कृतवीर्ययशोवतंसां माहिष्मतीं कलचुरेः कुलराजधानीम् ॥' इति बालरामायणम् (३।३५) मेकलसुता नर्मदा. सा च माहिष्मती इन्दोरनगरादक्षिणदिशि पञ्चदशयोजनान्तरे नर्मदादक्षिणतटेऽधुना 'महेश्वर' इति नाम्ना प्रसिद्धा इन्दोरनृपतेरेवाधीना वर्तते. चेदिदेश एव नर्मदोपकण्ठे त्रिपुरीनाम द्वितीयापि कलचुरिराजधान्यासीत. 'सीतास्वयंवरनिदानधनुर्धरेण दग्धात्पुरत्रितयतो विभुना भवेन। खण्डं निपत्य भुवि या नगरी बभूव तामेष चैद्यतिलकस्त्रिपुरीं प्रशास्ति ॥' इत्यपि बालरामायणम् (३।१८) 'त्रिपुरी चेदिनगरी' इति हैमनाममाला (४।४१) राजशेखरकृतविद्धशालभञ्जिकानायकः करचुलिकुलोत्पन्नोऽस्यामेव त्रिपुर्यामासीत्. 'करचुलितिलको वर्तते चक्रवर्ती' इति, 'स्वस्तिश्रीमत्त्रिपुर्यां तुहिनकरकुलावतंसविद्याचालितायाम्' इति च विद्धशालभञ्जिकाचतुर्थेऽङ्के वर्तते, तुहिनकरसुता सोमोद्भवा नर्मदा. सा च त्रिपुरी इदानीं 'तेवुर' इति नाम्ना प्रसिद्धा जबलपुरसमीपे वर्तते इति दक्षिणदेशेतिहासपुस्तके (३७ पृष्ठे) पण्डितवरभाण्डारकरः करचूलिवंशोद्भवोऽयं मायूराजवद्विन्ध्यदेश एवोत्पन्नः स्यात्. 'गण्डूषाम्भोपिताब्धिप्रकटजलधरोत्पालजातस्मितानां हेलाकृष्टार्कचन्द्राभिनवकृतमहाकुण्डलाभोगभाजाम्। पीनोरःस्थापिताशाद्विरदमदमषीमासलस्यासकानां दूरं यातस्य वत्स स्मरति दयाशिरास्त्वच्छिदुमीडितानाम् ॥' इत्याद्याः केचन श्लोका मायूराजनाम्ना समुद्धृताः सूक्तिमुक्तावल्यादिषु प्राप्यन्ते. तद्विलोकनेन च मायूराजः कस्यचिद्बालरामायणकथानुकूलनाटकस्य कर्तासीदिति ज्ञायते.

(वक्रोक्त्या मेण्ठराजस्य वहन्त्या क्षणिरूपताम् ।
आविद्धा इव धुन्वन्ति मूर्धानं कविकुञ्जराः ॥)

मेण्ठो हस्तिपकः; (पक्षे) राजशेखरेण बालभारत-बालरामायणप्रस्तावनायां गृहीतनामा काश्मीरदेशोद्भवो हयग्रीववधकाव्यकर्ता विक्रमादित्यसमकालीनो मेण्ठः

कवि अय श्लोकः सूक्तिमुक्तावलि-सुभाषितहारावल्यो राजशेखरश्लोकबहिर्भूत-स्तत्समीप एव तिष्ठति भाति चायमपि राजशेखरस्यैवेत्यतोऽत्र गृहीत.

मा स्म सन्तु हि चत्वारः प्रायो रत्नाकरा इमे ।
इतीव स कृतो धात्रा कविरत्नाकरोऽपरः ॥

(सूक्तिमुक्तावलि, सुभाषितहारावलि.)

हरविजयकाव्यकर्ता नवमशतकोत्तरभागे कश्मीरदेशे समुत्पन्नो रत्नाकरमहा-कवि प्रसिद्ध एव.

तौ शूद्रककथाकारौ रम्यौ रामिलसौमिलौ ।
काव्यं ययोर्द्वयोरासीदर्धनारीश्वरोपमम् ॥

(सुभाषितहारावलि.)

सौमिलस्य नाम मालविकाग्निमित्रप्रस्तावनायां वर्तते. तेन कालिदासात्सौमिल-स्तस्मादपि शूद्रक प्राचीन 'सव्याधे कृशता' इत्यादिश्लोक शार्ङ्गधरपद्धतौ रामिलसौमिलयोर्नाम्ना समुद्धृत. 'वरपुरुषादिव सवितु' इत्यादिरामिलश्लोक सुभाषितावलावप्यस्ति.

यथार्थता कथं नाम्नि मा मृद्वररुचेरिह ।
व्यधत्त कण्ठाभरण यः सदा रोहणप्रियः ॥

(सूक्तिमुक्तावलि.)

काव्यायनापरनामा वररुचि प्रसिद्ध एव ततश्चो व्याकरणवार्तिकपाठ प्राकृत-सूक्तानि च सर्वत्र सुलभान्येव. सुभाषितावल्यादिषु बहवो वररुचिकृता. श्लोकाः समुपलभ्यन्ते, तस्मात्किमपि काव्यमपि वररुचिना कृतमेव.

के चैकटनितम्बेन गिरां गुम्फेन रञ्जिताः ।
निन्दन्ति निजकान्तानां न सौन्दर्यमधुरं वचः ॥

(सूक्तिमुक्तावलि, सुभाषितहारावलि)

स्थिता माध्वीकपाकत्वान्निसर्गमधुरापि हि ।
किमपि स्वदते वाणी केषांचिद्यपि शांकरी ॥

(सूक्तिमुक्तावलि.)

अत्र बालरामायणप्रस्तावनायां गृहीतनामा स्वसमकालीन. कृष्णशंकरवर्मा राजशेखरस्य विवक्षित, न तु शंकराचार्य. कश्चिदन्यो वा शंकर इति भाति.

शब्दार्थयोः समो गुम्फः पाञ्चाली रीतिरुच्यते ।
शीलाभट्टारिकावाचि बाणोक्तिषु च सा यदि ॥

(सूक्तिमुक्तावलि, शार्ङ्गधरपद्धति.)

पृथिव्यां ग्रथिता गाथा सातवाहनभूभुजा ।
व्यधुर्धृतेस्तु विस्तारमहो चित्रपरम्परा ॥

(सूक्तिमुक्तावलिः.)

पार्थस्य मनसि स्थानं लेभे खलु सुभद्रया ।
कवीना च वचोवृत्तिचातुर्येण सुभद्रया ॥

(सूक्तिमुक्तावलि, सुभाषितहारावलिः.)

'दुग्धं च यत्तदनु' इत्यादिश्लोक सुभद्राकृत सुभाषितावली वर्तते.

नदीना मेकलसुता नृपाणां रणविग्रहः ।
कवीना च सुरानन्दश्चेदिमण्डलमण्डनम् ॥

(सूक्तिमुक्तावलि.)

मेकलसुता नर्मदा सुरानन्दो राजशेखरस्य पूर्वपुरुष इत्यकालजलदवर्णनश्लोकटिप्पणसमुद्धृते बालरामायणप्रस्तावनापद्ये द्रष्टव्यम् चेदिदेशो डाहलापरपर्याय. 'त्रैपुरास्तु डाहला स्युश्चैद्यास्ते चेदयश्च ते' इति हैमनाममाला (४।२२) 'डाहलाश्चेदयश्चैद्या.' इति त्रिकाण्डशेषे भूमिवर्ग 'नीत्वा गङ्गाधरधरतां डाहलाधीशकान्ति' इति विक्रमाङ्कदेवचरितम् (१८।९५)

भासो रामिलसोमिलौ वररुचिः श्रीसाहसाङ्कः कवि-
र्मौघो भारविकालिदासतरलाः स्कन्धः सुबन्धुश्च यः ।
दण्डी बाणदिवाकरा गणपतिः कान्तश्च रत्नाकरः
सिद्धा यस्य सरस्वती भगवती के तस्य सर्वेऽप्यमी ॥
(शार्ङ्गधरपद्धति-.)

एषु कविषु साहसाङ्क-स्कन्धयोर्विषये न किमपि ज्ञायते. कान्त इति तु रत्नाकरविशेषणम्.

— अत्रायं निष्कर्षः —

अस्य संपूर्णलेखस्य निष्कर्षस्त्वयम्—यन्महाराष्ट्रचेदिदेशयोरन्यतरोद्भवः कान्यकुब्जमहीपालस्य महेन्द्रपालस्याश्रितो ब्राह्मण क्षत्रियो वा राजशेखरकविः ८८४ क्रिस्तसंवत्सरादनन्तरं ९५९ संवत्सरात्पूर्वं चासीत्. राजशेखरस्य विस्तरेण वर्णने तु पुण्यपत्तनस्थार्यभूषणयन्त्रालये मुद्रितायाः फर्ग्युसनपाठशालाध्यक्षेण एम्. ए. पदवीभण्डितेन शिवरामसन्नुवामनपण्डितेन प्रणीतायाम् 'राजशेखर' हिज् लाइफ ऍन्ड रायटिङ्गस्' इति नामाङ्कितायाः पुस्तिकायां द्रष्टव्यम्. इत्यलं बहुभिः पिष्टस्य मुहुः पेषणेन.

महाकविश्रीराजशेखरकृता

कर्पूरमञ्जरी

वासुदेवकृतया टीकया समेता

—प्रथमं जवनिकान्तरम्—

भद्दं होउ सरस्सईअ कइणो णंदंतु वासाइणो
अण्णाणं पि परं पअट्टउ वरा वाणी छइल्लप्पिआ।
वच्छोमी तह माअही फुरदु णो सा किं च पंचालिआ
रीईओ विलिहंतु कव्वकुसला जोण्हं चओरा विअ ॥ १ ॥

दशास्योद्यदास्यच्छिदं जानकीश कुलोपास्यमानस्य साष्टाङ्गपातम्।
गणेशं च गण्डोल्लसद्गण्डखड्गं हरोच्चाङ्गसङ्गांश्च गङ्गातरङ्गान् ॥
तातं प्रभाकरं नत्वा मातरं गोमतीमपि।
कर्पूरमञ्जरीटीका वासुदेवेन तन्यते ॥

कर्पूरमञ्जर्याख्यसट्टकारम्भे सूत्रधार आशीरूपा नान्दीं पठति—

भद्दमिति।

भद्रं भवतु सरस्वत्याः कवयो नन्दन्तु व्यासादयः
अन्येषामपि परं प्रवर्तन्तां वरा वाणी विदग्धप्रिया।
वैदर्भी तथा मागधी स्फुरतु नः सा किं च पाञ्चालिका
रीतिका विलिहन्तु काव्यकुशला ज्योत्स्नां चकोरा इव ॥

अत्र च 'व्यासादय' इत्यादौ 'सरस्वत्या' इत्येतत्प्रभृति पञ्चन्तत्वोपक्रमभङ्गाभासेऽपि 'भवतु' इत्यादिप्रधानक्रियापदान्तो लोडन्तत्वप्रक्रमः सर्वत्राविहत इति न प्रक्रमभङ्गः शङ्क्यः। तेन रीतिर्नाम शब्दगुण। यथोक्तं सरस्वतीकण्ठाभरणे (१।७६)—'उपक्रमस्य निर्वाहो रीतिरित्यभिधीयते' इति। सरस्वत्याः सततं

---

१ अत्र 'साटक' इति पाठः क्वचित्; तल्लक्षणं चोक्तं साहित्यदर्पणे (६।२७६) 'सट्टकं प्राकृताशेषपाठ्यं स्यादप्रवेशकम्। न च विष्कम्भकोऽप्यत्र प्रचुरश्चाद्भुतो रसः॥ अङ्का जवनिकाख्याः, स्यादन्यन्नाटिकासमम्।' इति। विशेषस्तु भावप्रकाशे द्रष्टव्यः।

भद्रभाजनत्वादप्राप्तप्रार्थनारूपाशीरसंभवो यद्यपि, तथापि स्वसंबन्धिन्या वा तस्या मङ्गलाशंसनं संभवत्येव। अत एवान्येषामपीत्यत्र आशंसनम्। 'भवेत्तद्भिन्नवचनं यद्भिन्नवचनोपमम्' इत्युक्तत्वाज्ज्योत्स्नामित्युपमाने भिन्नवचनतादोषो न शङ्क्यः। 'यद्भिन्नलिङ्गमित्युक्तं तद्भिन्नवचनं भवेत्। उपमादूषणं तत्र यत्रोद्वेगो न धीमताम्॥' इति वृद्धैः, 'न लिङ्गवचने भिन्ने न हीनाधिकतापि वा। उपमादूषणायालं यत्रोद्वेगो न धीमताम्॥' (का. २।५१) इति दण्डिना चोक्तत्वात्, अत्र चालीयस्या अपि ज्योत्स्नाया अतितृप्तिजनकत्वेन लोकोत्तरत्वस्य 'पदैकदेशरचनावर्णेष्वपि रसादयः' (४।४३) इति काव्यप्रकाशकृदुक्तेरेकवचनेन व्यञ्जनादुद्वेगाभावो वेदितव्यः। विदग्धप्रियेति विविधगुणालंकारगुम्फितत्वं व्यङ्ग्यम्। रीतीनां प्रतिनामग्रहणेन तिस्रोऽप्यत्र सन्तीति ध्वनितम्। तदिदं वस्तुना वस्तु व्यज्यते। 'काव्यकुशला' इति तादृशानामेव सभ्यत्वमत्र सूचितम्। तल्लक्षणं भरते—'सभ्यास्तु विबुधैर्ज्ञेया ये विदग्धानिवेता जनाः। मध्यस्थाः सावधानाश्च वाग्मिनो न्यायवेदिनः॥ स्फुटितास्फुटितामिज्ञा विनयानन्वयंधराः। अगर्वा रससारज्ञाः सौम्यस्थितयबोधिदाः॥ असद्ग्राहनिषेद्धारः शतुरा मत्सरच्छिदः। अमन्दरसनिष्यन्दिदृढया भूषणोज्ज्वलाः॥ सुवेषा भोगिनो नानाभाषाचारविशारदाः। स्वसोचितस्थाननिष्ठास्तत्प्रशंसापरायणाः॥' इति। चकोरोपमानेन विवेचनकर्तृत्वप्रार्थना व्यङ्ग्या। सोऽयमलंकारेण वस्तुध्वनिः। विदग्धप्रियेति षष्ठीतत्पुरुषं कृत्वा वाण्या विशेषणम्। यद्वा,—वैदर्भ्यादीनाम्। अस्मिन्पक्षे कर्मधारयमाश्रित्य वैदर्भ्यादीनां वाग्मिनीत्वं व्यङ्ग्यम्। सोऽयं वस्तुनालंकारध्वनिः। वैदर्भ्यादयो रीतयः शब्दालंकाराः। तल्लक्षणं कण्ठाभरणे (२।२९)—'तत्राद्यसमासा नि दीर्घसमप्रगुणगुम्फिता। विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते॥ पूर्वरीतेरनिर्वाहे गम्भीरोक्तिषु मागधी। सन्ध्यक्षरपदप्रायोज्ज्वलकान्तिर्विपञ्चिताम्। मधुरां सुकुमारां च पाञ्चाली कवयो विदुः॥' इति। रीतिसामान्यलक्षणं च तत्रैव—'वैदर्भ्यादिरिहा. पन्थाः काव्ये मार्ग इति स्मृतः। रीङ् गतावित्ति धातोः सा व्युत्पत्त्या रीतिरिष्यते'॥(ग. क. २।२७) इति। गौडी लाटीनामेकस्यैकत्वादिगुणनेनोपादानम्। वर्णना इवेत्युपमालंकारः। तल्लक्षणं तत्रैव—'साधर्म्यमुपमा भेदे' (१०।८७) इति काव्यप्रकाशे। पामनेनाप्युक्तम्—(का. सू. ४।३।१२) 'उपमानोपमेययोर्गुणक्रियाभ्यां साम्यमुपमा' इति। दण्डिनाप्युक्तम् (का. २।१४)—'यथाकथंचिद्गाम्भीर्यं यत्रोत्तुङ्गैः प्रतीयते। उपमा तत्र सा तस्याः प्रकर्षोऽयं

निदर्श्यते ॥' इति। 'भद्द होदु' इत्यादौ छेकानुप्रास। 'कइणो' इत्यादौ वृत्त्यनुप्रास। स यथा तत्रैव—'वर्णसृतिरनुप्रास श्छेकवृत्तिगतो द्विधा। सोऽनेकस्य सकृत्पूर्वं एकस्याप्यसकृत्परः ॥' इति। इयं च वैदर्भी रीतिः। ओजःप्रसादश्लेषसमाधिमाधुर्यसौकुमार्योदार्यार्थव्यक्तिप्रभृतिबन्धगुणानामर्थगुणानां च विद्यमानत्वात्। एतेषां विवरणं न कृतम्, ग्रन्थगौरवभयात्। एवमन्येऽपि वैशिक्यादयः शब्दालंकारा ज्ञेयाः। 'ध्वनिमत्ता तु गाम्भीर्यम्' (स क १।७३) इत्युक्तत्वाद्गाम्भीर्यादयो गुणाश्च। केचित्तु रीत्यादीनामपि गुणत्वं मन्यन्ते। अत्र च 'रतिर्देवादिविषया' इत्युक्तत्वात्सरस्वत्यादिविषया रतिरुक्ता। विदग्धप्रियेत्येतेन विदर्भदेशोत्पन्ननायिकाबोधकेन वैदर्भ्यादिशब्देन च समासोक्त्या रीतेर्नायिकात्वारोपात्, 'काव्यकुशल'पदेन च तेषां नायकत्वारोपात् शृङ्गारो ध्वन्यते। स्थायादि स्वयमूह्यम्। इदं च शार्दूलविक्रीडितम्—'सूर्याश्वैर्मसजस्ततः सगुरवः शार्दूलविक्रीडितम्' इति। 'वर्णविन्यासयोगः पद्यादौ वाद्यवक्त्रे वचसि च सकले प्राकृतादौ समोऽयम्' इत्युक्तेर्गणादिविचारः क्रियते—तत्र 'मो भूमिस्त्रिगुरुः श्रियं दिशति' इत्युक्तत्वाद्गणशुद्धिरस्ति। 'सुखभयमरणक्लेशदुःखान्यवर्गाः' इत्युक्तेर्वर्णशुद्धिः। 'देवतावाचका शब्दा ये च मङ्गलादिवाचकाः। ते सर्वे नैव निन्द्या स्युर्लिखितो गणतोऽपि च ॥' इत्यभिधानात्। 'मगण नगण दुइ मित्त होइ भगण यगण होइ मित्त। उदासीण जत दुअ गणअ अवसिट्ठ दुइ अरि णित्त ॥', 'मित्रान्मित्रादयः स्युर्यदि धनमुदयः शून्यरन्ध्रं बन्धुपीडाम्' इत्यरिसंज्ञकस्य सगणस्य मित्रसंज्ञभगणोत्तरपठितस्य बन्धुपीडाप्रदत्वं न मन्तव्यम्। नान्दीलक्षणे 'शब्दतो वार्थतो वापि मनाङ्काव्यार्थसूचनम्' इत्युक्तेस्तदप्युच्यते—सरस्वत्या श्रीरत्नस्य कर्पूरमञ्जर्या। 'सरस्वती स्यात्तीरत्ने नद्यां नद्यन्तरे गवि' इत्यजयः। विविधं वस्त्वभिनवमा समन्तादस्यति क्षिपति दर्शयितुमिति व्यासो भैरवानन्दः। तदीयोयोगिनः कवयो विद्वांस एव कलाकुशलाः। वरा उत्कृष्टा वाणी यस्यां सा कर्पूरमञ्जरीसट्टकी कान्ता। विदर्भमगधपञ्चालदेशीयरीतिषु कं सुखं यागं ता नानाविलासिन्य काव्याभिज्ञा रसिका इति। 'हरोत्तमाङ्गस्थितवस्तुवर्णनैः' इत्युक्तं 'ज्योत्स्ना'पदेन शिवशिरःस्थितचन्द्रकलाग्रहणम्। भद्द इति भद्रशब्दे 'सर्वत्र ल्वराम्' इति सूत्रेण रलोपे 'शेषादेशयोर्द्वित्वमनादौ' इति दस्य द्वित्वे 'अतओ सो' इति सोरोकारादेशे प्राप्ते 'नपुंसके सोर्बिन्दुः' इत्यनुस्वारः। एवमग्रेऽपि प्राकृतप्रक्रिया ज्ञेया। क्वचिद्विशेषं वक्ष्यामः। दइ-वच्छोभीशब्दौ 'दाक्षादयो बहुलम्' इति विदग्धवैदर्भीशब्दयोः साधू। चाँदं इति ज्योत्स्नाशब्दे 'अधो मनयाम्'

अवि अ,—

अकलिअपरिरंभविब्भमाइं अजणिअचुंबणडंबराइं दूरं ।
अघडिअथणताडणाइँ णिच्चं णमह अणंगरईण मोहणाइं ॥ २ ॥

स्थापकः—

ससिहंडमंडणाणं छम्मुहणासाणँ सुरअणपिआणं ।
गिरिसगिरिंदसुआणं संघाडी वो सुहं देउ ॥ ३ ॥

इति नलोपे प्राप्ते 'न्हस्नष्णक्ष्णश्मा ण्ह' इति स्नस्य ण्हादेशे 'उपरि लोप—' इति तलोपे 'अधो मनयाम्' इति यलोपः ॥

अवि अ इति ।

अपि च,—

अकलितपरिरम्भविभ्रमाण्यजनितचुम्बनडम्बराणि दूरम् ।
अघटितघनताडनानि नित्यं नमतानङ्गरत्योर्मोहनानि ॥

दूरमत्यर्थं ताडनानि चन्द्रकलोद्बोधनार्थानि 'अङ्गुष्ठे चरणे च गुल्फनिलये' इत्यादिना पद्यमायकाक्तुक्तानि । 'ताडन'पदेन नखक्षतादीन्यपि उक्तानि । मोहनानि सुरतानि । अत्र संभोगशृङ्गार उक्तः । चुम्बनताडनपदाभ्यां तज्ज्ञानं लक्ष्यते । तेषां क्रियमाणत्वादेव । परिरम्भादिभेदास्त्वनतिप्रयोजनत्वान्न निर्दिष्टाः । अनङ्गरत्योरिति काव्यलिङ्गेन नमतेति पदस्योक्तं सम्भानामतिरिक्तं व्याख्यम् । सुरतानामनिर्दिष्टत्वं च मोहनानीति बहुवचनेनोक्तानङ्गरत्यादयः सर्वे सुरतभेदाः सूचिताः । तत्रापि परिरम्भादिषु तज्ज्ञानानुपयोगादिनैवोक्तिः । सा यथा काव्यप्रकाशे—(१०।९०८) 'विशेषोक्तिरखण्डेषु कारणेषु फलावचः' इति । काव्यार्थसूचनेऽनङ्गरतीत्यस्योक्तत्वात्कर्पूरमञ्जर्यामनङ्गरत्योर्मोहनानीति शेषम् ॥

स्थापकः—

अवि अ,—

ईसारोसप्पसाअप्पणइसु बहुसो सग्गगंगाजलेहिं
आमूलं पूरिआए तुहिणकरकलारुप्पसिप्पीए रद्धो ।
जोण्हामुत्ताहलिलं णअमउलेणिहित्तग्गहत्थेहिं दोहिं
अग्घ सिग्घं व देतो जअइ गिरिसुआपाअपंकेरुहाणं ॥ ४ ॥

तिरेकालंकारो व्यङ्ग्य । 'महाहिवल्या प्राप्ता चन्द्ररेखाविभूषणा' (सप्त. ८।१६) इत्यादौ देव्याश्चन्द्रचूडत्व प्रसिद्धम् । 'मण्डन'पदेन विरुद्धवेषस्याप्यलंकारकारित्व-सूचनाद्व्यतिरेकालंकार एव व्यङ्ग्य ॥

अवि अ इति ।

ईर्ष्यारोषप्रसादप्रणतिषु बहुश स्वर्गगङ्गाजलै-
रामूलं पूरितया तुहिनकरकलारूप्यशुक्त्या रद्ध ।
ज्योत्स्नामुक्ताफलाढ्यं नतमौलिनिहितास्यामग्रहस्ताभ्या द्वाभ्या-
मर्घ्यं शीघ्रमिव ददज्जयति गिरिसुतापादपङ्केरुहयो ॥

बहुश ईर्ष्यारोषयो सतो प्रसादार्थं क्रियमाणासु प्रणतिषु नतमौलिने क्षिप्ता-ग्रहस्ताभ्या द्वाभ्या गिरिसुतापादकमलयोश्चन्द्रकलारूप्यशुक्त्या शीघ्रमर्घमिव ददद्भो जयतीत्यन्वय । चन्द्रकलाया शुक्तित्वम् । अन्योऽपि भक्तो जलपूरितया रूप्य-शुक्त्या मुक्तायुक्त प्रणामपूर्वं हस्ताभ्यामर्घं ददातीत्यर्थश्चेय । बहुश इति तस्या मानिन्याश्चं व्यङ्ग्यम् । स्वर्गगङ्गेति भावित्वमभिप्रेत्योक्तम् । शीघ्रमिति मानवृद्धिभयं व्यङ्ग्यम् । देवीपादयोश्चन्द्रकलासम्बन्धकरण कदाचिदस्याश्चन्द्रस्योद्दीपकत्वान्मदनावे-शेन मानभङ्ग इति शङ्कया । अत्र रूपकम्—'उपमैव तिरोभूतभेदा रूपकमिष्यते' (का २।६६) इति तल्लक्षणात् । अर्घ्यमिवेत्युत्प्रेक्षा—'अन्यधैव स्थिता वृत्तिर्यत्रेत-नस्येतरस्य वा । अन्ययोत्प्रेक्ष्यते यत्तु तामुत्प्रेक्षा विदुर्बुधा ॥' (का २।२२१) इत्युक्तत्वात् । 'परोत्कर्षासहेर्ष्या स्यात्तैक्ष्ण्यान्मन्युरोऽपि वा' इति रसकलिका-यामुक्तत्वान्मन्दाक्षिणीरूपसपत्न्यामीर्ष्या ज्ञेया गौर्या । इय च स्वाधीनभर्तृका । सा यथा तत्रैव—'स्वाधीनपतिका सा तु यां न मुञ्चति वल्लभ' इति । अन्यो-ऽप्यवान्तरनायिकाभेदोऽस्या योजनीय । 'दाढादयो बहुलम्' इति 'शुक्ति'शब्दस्य सिप्पीत्यादेश । तदुक्तम्—'अधोमौक्तिकशुक्तीना वधूश्रमिनशब्दयो । हेट्टवेरिल्ल-अल्लिप्पी' इति । हल्लिकेति 'आल्लिकोल्लाल्पतेंता मनुप' इति मनुप इत्र । 'सेवादिषु वा' इति निर्देशेत्त्र वा द्विरुक्तम् ॥

(नान्यन्ते ।)

स्थापकः—(परिक्रम्य नेपथ्याभिमुखमवलोक्य ।) किं उण णट्टप्पउत्तो विअ दीसदि अम्हाणं कुसीलवाणं जणो । जदो एक्का पत्तोइदाइं सिअआइं उच्चिणेदि । इदरा कुसुमावलीओ गुंफेदि । अण्णा पडिसीसआइं पडिसारेदि । कावि हु वण्णिआओ पट्टए घट्टेदि । एसो वंसो ठाविदो ठाणे । इअं वीणा पडिसारीअदि । इमे तिण्णि वि मिअंगा सज्जीअंति ।

नान्यन्ते सूत्रधार इति कविवचनम् । एवमग्रेऽपि मध्ये मध्ये कविवचनं संसूचितं ज्ञेयम् । नान्दीलक्षणं तु—'आशीर्नमस्क्रियारूपः श्लोकः काव्यार्थसूचकः । नान्दीति कथ्यते' इत्यादि **भरते** । **नाट्यप्रदीपेऽपि**—'नन्दन्ति काव्यानि कवीन्द्रवर्याः कुशीलवाः पारिषदाश्च सन्तः । यस्मादतः सज्जनसिन्धुहृद्यी तस्मादतः सा कथितेह नान्दी ॥' इयं च मङ्गलार्था—'यथाव्यवपुनः पूर्वरङ्गं विघ्नोपशान्तये । कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते ॥ उत्थापकाः प्रकुर्वन्ति सन्ति भूयांसि यद्यपि । तथाप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये ॥' इत्युक्तत्वात् । सा चेहाष्टपदी कृता—'नाट्यपूर्वकृता नान्दी त्वाशीर्वचनसंयुता । अष्टाक्षरपदसंयुक्ता प्रशस्ता वेदसंमिता । नान्दी पदैर्द्वादशभिरष्टभिर्वाप्यलंकृता ॥' इति **भरतोक्तेः** । पदानि चात्र श्लोकचरणरूपाणि—'श्लोकाद्यं पदं केचिन्मुक्तिच्छन्दमपापरे । परेऽन्तरालवाक्यैकदेशरूपं पदं पुनः ॥' इति **नाट्यप्रदीपेऽभिहितत्वात्** । अन्तरालवाक्यखण्डो यदपदेयं इष्टव्या । सा चेयं सूत्रधारप्रयोज्या—'सूत्रधारः पटेनान्दीं मङ्गलं नाट्यमाश्रितः ।' इति **भरतोक्तेः** । इदृशीं नान्दीं पठित्वा सूत्रधारे गते पारिपार्श्वसूत्रधारः स्थापकश्चोदरः प्रविशतीति शेषः । उक्तं च दशरूपके—(३।२) 'पूर्वरङ्गं विधायादौ सूत्रधारे निवर्तते । प्रविश्य तद्वदपरः काव्यमार्गानुसेवटः ॥' इति । **भावप्रकाशेऽपि**—'इत्थं रङ्गं विधायादौ सूत्रधारे निवर्तते । तद्वदेवः प्रविश्यान्य. सूत्रधारानुगादृतः ॥' इति । पूर्वरङ्गशब्दार्थस्तूक्तो वृद्धैः—'पूर्वं रङ्गस्य इति पूर्वरङ्गो नाट्यशास्त्रे । षष्ठ्यन्तस्यैवमप्रयोग इति ।' अन्यत्रापि—'नमस्क्रिया तथा सभ्या नामतो वस्तुतोऽपि । अतो रङ्ग इति ह्येवं पूर्वरङ्गोऽभिधीयते । तस्मादयं पूर्वरङ्ग इति निर्विप्रतिपत्तयः ॥' इति । सूत्रधारप्रवृत्तिः **संगीतसर्वस्वे**—'नर्तनीयप्रयोगस्य प्रथमं येन सूच्यते ।

एस कासतालाणं पक्खाउज्जाण हल्लवोलो सुणीअदि। एदं धुवागीदं आलवीअदि। ता किं पि कुडुव हुंकारिअ पुच्छिस्सं। (नेपथ्याभिमुखमवलोक्य सज्ञापयति।)

रङ्गभूमिं समाक्रम्य सूत्रधार स उच्यते ॥' इति। लक्षण चास्य **मातृगुप्ताचार्यैरुक्तम्**—'चतुरातोद्यनिष्णातोऽनेकभूपालसमादृत। नानाभाषणतत्त्वज्ञो नीतिशास्त्रार्थतत्त्ववित् ॥ वेश्योपचारचतुर पौरुषेयविचक्षण। तत्तद्गीतानुगानेकलातालावधारण ॥ अवधार्य प्रयोक्ता च योक्तृणामुपदेशक। एवं गुणगणोपेत सूत्रधार स उच्यते ॥' इति। द्वितीयस्य स्थापकसज्ञा दर्शिता **भरते**—'स्थापक प्रविशेत्तत्र सूत्रधारगुणाकृति।' इति। सूत्रधार इत्यस्याग्रे क्वचिद्व्यङ्गोऽस्ति। **सूत्रधारपदं पुनरप्युच्चारणीयमिति तस्यार्थं**। तेन सूत्रधारो वदतीति द्वितीयपदस्यार्थं। एवमग्रेऽपि ज्ञेयम्। **नेपथ्याभिमुखमिति**। 'नेपथ्य स्याज्जवनिका रङ्गभूमिप्रसाधनम्।' इत्यजय।

किं उण इति।

किं पुनर्नृत्यप्रवृत्त इव दृश्यतेऽस्माकं सुशीलवाना परिजन।

जदो इति।

यत एका पात्रोचितानि सिचयान्युचिनोति। इतरा कुसुमावलीर्गुम्फति। अन्या प्रतिशीर्षकाणि प्रसारयति।

प्रतिशीर्षकाणि **नाट्यलोचने**—'अमात्यकञ्चुकिश्रेष्ठिविदूषकपुरोधसाम्। वेषनाम्नश्च पट्टानि प्रतिशीर्षाणि कारयेत् ॥' इति।

कापि खलु वर्णिका पट्टे वर्तयति।

चित्रफलकानि चित्रपटीत्यर्थं।

एष वंशो स्थापितो भ्वान।

वंशो वेणुवाद्यम्।

इयं वीणा प्रतिसार्यते। इमे त्रयोऽपि मृदङ्गा सु यन्ते।

त्रैविध्यं च **भरते**—'मायूरी अर्धमायूरा तृतीया चापि त्रिधा।' इति।

एष कासतालाना प्रक्षालनोज्ज्वलनां हल्लहल्ल श्रूयते।

'हल्लवोल' इति देशी।

एतद्ध्रुवागीतमालप्यते।

(ततः प्रविशति पारिपार्श्वकः ।)

पारिपार्श्वकः—आणवेदु भावो ।

स्थापकः—(विचिन्त्य ।) किं उण णट्टपउत्ता विअ दीसध ?

पारिपार्श्वकः—अध इं । सट्टअं णच्चिदव्वं ।

स्थापकः—को उण तस्स कई ?

पारिपार्श्वकः—

उक्तं च भरते—'प्रावेशिकी आक्षेपिणी कामिकी उत्थापिनी प्रासादिकी इति पञ्च ध्रुवाः ।' इति ।

तत्किमपि कुटुम्बमाकार्यं पृच्छामि ।

नेपथ्येति । संज्ञापनमाह्वानसंकेतकरणम् ।

तत इति । पारिपार्श्वकलक्षणं च 'तस्यानुचरः पारिपार्श्वकः' इति **साहित्यदर्पणे** ।

आणवेदु इति ।

आज्ञापयतु भावः ।

'भाव इत्युच्यते विद्वान्' इति भावलक्षणम् ।

स्थापकः—

किं पुनर्नृत्यप्रवृत्ता इव दृश्यध्वे ।

पारिपार्श्वकः—

अथ किम् । सट्टकं नर्तितव्यम् ।

सट्टकमिति । तल्लक्षणं च **भावप्रकाशे**—'सैव प्रवेशकेनापि विष्कम्भेण विना कृता । अङ्कस्थानीयविन्यस्तचतुर्जवनिकान्तरा ॥ प्रकृतप्राकृतमयी सट्टकं नामतो भवेत् ।'

स्थापकः—

कः पुनरस्य कविः ?

पारिपार्श्वकः—

भाव ! कहिज्जदु एअं को भण्णइ रअणिवल्लहसिहंडो ।
रहुउलचूडामणिणो महिंदवालस्स को अ गुरू ॥ ५ ॥

स्थापकः—(विचिन्त्य ।) अए, पण्होत्तरं खु एदं । (प्रकाशम् ।) राअसेहरो ।

पारिपार्श्वकः—सो एदस्स कई ।

स्थापकः—किं सट्टअं ?

पारिपार्श्वकः—(स्मृत्वा ।) कधिदं जेव छद्दलेहि,—

सो सट्टओ त्ति भण्णइ दूरं जो णाडिआपॅ अणुहरइ ।
किं उण पवेसविक्कंभंकाइं केवलं ण दीसंति ॥ ६ ॥

भाव ! कथ्यतामेतत्को भण्यते रजनीवल्लभशिखण्डः ।
रघुकुलचूडामणेर्महेन्द्रपालस्य कश्च गुरुः ॥

राजशेखरकविनाम्न पर्यायो रजनीत्यादि ।

स्थापकः—विचिन्तनं स्वगतपर्याय ।'अश्राव्य स्वगत मतम्' इति तल्लक्षणम् ।

पण्ह इति ।

अये, प्रश्नोत्तरं खल्वेतत् ।

मया पृष्टेऽनेनेदशमुक्त चेदमुत्तरमस्तीत्यर्थं ।

प्रकाशमिति । 'सर्वश्राव्यं प्रकाशं स्यात्' इति तल्लक्षणम् ।

राअ इति ।

राजशेखर. ।

काव्या वदति—

स एतस्य कवि. ।

'गोत्र नाम च यद्ब्रूयात्' इत्युक्ते कविनामोक्ति ।

किं सट्टकम् ?

कधिदं इति ।

कथितमेव विदग्धैः,—

सत्सट्टकमिति भण्यते दूर यो नाटिकाभिरनुहरति ।
किं पुनः प्रवेशकविष्कम्भकौ केवलं न दृश्यत. ॥

स्थापकः—(विचिन्त्य ।) ता किं ति सक्कदं परिहरिअ पाउदबंधे पउत्तो कई ?

पारिपार्श्वकः—सव्वभासाचउरेण तेण भणिदं जेव । जधा,—

अत्थविसेसा ते चिअ सद्दा ते चेअ परिणमंता वि ।
उत्तिविसेसो कव्वं भासा जा होइ सा होउ ॥ ७ ॥

अवि अ,—

परुसा सक्कअबंधा पाउअबंधो वि होइ सुउमारो ।
पुरिसमहिलाणँ जेत्तिअमिहंतरं तेत्तिअमिमाणं ॥ ८ ॥

दूरमत्यर्थम् । तल्लक्षणं **सुधाकरे**—'यत्रीचैः केवल पात्रैर्भाविभूतार्थसूचनम् । अङ्कयोरुभयोर्मध्ये स विज्ञेयः प्रवेशक· ॥' इति । 'तत्र विष्कम्भको भूतभाविवस्त्वंशसूचकः । अमुख्यपात्ररचितः संक्षेपैकप्रयोजनः ॥' तद्भेदा अपि तत्रैव—'द्विधा स शुद्धो मिश्रश्च मिश्र· स्यान्नीचमध्यमैः । शुद्धः केवलमध्योऽयमेकामेककृतो द्विधा ॥'

ता किं इति ।

तत्किमिति सस्कृतं परिहृत्य प्राकृतबन्धे प्रवृत्त· कवि ?

पारिपार्श्वकः—

सर्वभाषाचतुरेण तेन भणितमेव । यथा,—

अर्थनिवेशास्त एव शब्दास्त एव परिणमन्तोऽपि ।
उक्तिविशेषः काव्यं भाषा या भवति सा भवतु ॥

परिणमन्तोऽपीत्यनेन प्राकृतस्य सस्कृतयोनित्वमुक्तम् । तदुक्तं **प्राकृतसंजीविन्याम्**—'प्राकृतस्य तु सर्वमेव संस्कृतं योनि·' इति । **दण्डिना** चोक्तम् (का. १।३३)—'तद्भवस्तत्समो देशीत्यनेक· प्राकृतक्रमः ।' इति । उक्तिविशेष इति 'तददोषौ शब्दार्थौ' (१।४) इत्यादिना **काव्यप्रकाशे** नानाभेदभिन्नं काव्यमुपक्षिप्तम् । भाषाविशेषानादरश्चोक्त । **कण्ठाभरणे**— (२।७) 'संस्कृतेनैव कोऽप्यर्थ प्राकृतेनैव चापर· ।' इत्यादिना 'सर्वाभिरपि कथन' (स. क. २।११) इत्यन्तेन ।

अवि अ इति ।

अपि च,—

परुषाः संस्कृतगुम्फाः प्राकृतगुम्फोऽपि भवति सुकुमारः ।
पुरुषमहिलानां यावदिहान्तरं तेषु तावत् ॥

स्थापकः—ता अप्पा किं ण वण्णिदो तेण ?

पारिपार्श्वकः—सुणदु, वण्णिदो ज्जेव तक्कालम्मि ईणं मज्झम्मि मिअंकलेहाकआआरेण अवराइदेण । जधा,—

बालकई कइराओ णिब्भअराअस्स तह उवज्झाओ ।
इअ जस्स पपाहिं परंपराइ माहप्पमारूढं ॥ ९ ॥
सो अस्स कई सिरिराअसेहरो तिहुअणं पि धवलेंति ।
हरिणंकपाडिसिद्धीअ णिक्कलंका गुणा जस्स ॥ १० ॥

महिला कामिन्य ।

स्थापकः—

तदात्मा किं न वर्णितस्तेन ?

पारिपार्श्वकः—

शृणु, वर्णित एव तत्कालकवीनां मध्ये मृगाङ्कलेखाकथाकारेणापराजितेन । यथा,—

बालकविः कविराजो निर्भयराजस्य तथोपाध्यायः ।
इत्येतस्य परम्परया आत्मा माहात्म्यमारूढ ॥

यदा तु 'इति यस्य जयै परम्परामाहात्म्यमारूढम्' इति पाठस्तदा जयैरुत्कर्षैः । आरूढमिति भावे क्त । इयं च कारणमाला । सा यथा (का. प्र. १०।१२०)—'यथोत्तरं चेत्पूर्वस्य पूर्वस्यार्थस्य हेतुता । तदा कारणमाला स्यात्' इति । परिकरोऽप्यत्र । स यथा (का. प्र १०।११८)—'विशेषणैर्यत्साकूतैरुक्तः परिकरस्तु सः' इति । द्वितीयपाठे आरोहणस्य चेतनधर्मस्य जयेष्वारोपणादुत्तरोत्तरप्रसादित्वलक्षणया परमकाष्ठापन्नत्वं व्यङ्ग्यम् ।

सो इति ।

स एतस्य कविः श्रीराजशेखरस्त्रिभुवनमपि धवलयन्ति ।
हरिणाङ्कप्रतिसिद्ध्या निष्कलङ्का गुणा यस्य ॥

प्रतिकूलतया सिद्धिस्तत्कार्यकारित्वम् । त्रिभुवनमिति निष्कलङ्का इति च व्यतिरेकः । 'उपमानाद्यदन्यस्य व्यतिरेक स एव सः ।' (१०।१०५) इति काव्यप्रकाशे । अन्यस्य व्यतिरेको विशेषेणातिरेक आधिक्यं व्यतिरेक इत्यर्थः । 'विस्तरादुत सङ्क्षेपाद्विदधीत प्ररोचनाम्' इत्युक्तत्वात् 'प्रशंसा तु द्विधा ज्ञेया चेतनाचेतनाश्रया । चेत-

स्थापकः—ता केण समादिट्ठा पउंजध ?

पारिपार्श्वकः—

चाहुआणकुलमोलिमालिआ राअसेहरकइंदगेहिणी ।
भत्तुणो किइमवंतिसुंदरी सा पउंजइउमेअमिच्छइ ॥ ११ ॥

किं च,—

चंडवालधरणीहरिणंको चक्कवट्टिपअलाहणिमित्तं ।
एत्थ सट्टअवरे रससोत्ते कुंतलाहिवसुअ परिणेइ ॥ १२ ॥

स्थापकः—ता एहि । अणंतरकरणिज्जं संपादेम्ह । जदो महाराअदेवीणं भूमिअं घेत्तूण अज्जो अज्जभारिआ अ जवणिअंतरे वट्टंति ।

(इति परिक्रम्य निष्क्रान्तौ ।)

प्रस्तावना ।

नास्तु कथानायकविसम्भवनटा स्मृता ॥ अचेतनौ देशकालौ कालो मधुशरन्मुख ॥' इत्युक्तेश्च कविप्रशंसा कृता । नटप्रशंसा 'किं पुन.' इत्यादिना सूचिता ।

स्थापकः—

तत्केन समादिष्टा प्रयुङ्ग्ध्वम् ?

पारिपार्श्वकः—

चाहुवानकुलमौलिमालिका राजशेखरकवीन्द्रगेहिनी ।
भर्तुः कृतिमवन्तिसुन्दरी सा प्रयोजयितुमेतदिच्छति ॥

कवेर्भार्या प्रयोजिका ।

किं चेति ।

चण्डपालधरणीहरिणाङ्कश्चक्रवर्तिपदलाभनिमित्तम् ।
अत्र सट्टकवरे रससोतसि कुन्तलाधिपसुतां परिणयति ॥

रसाः शृङ्गारादयो जलं च । स्रोतः प्रवाहः । सट्टकलक्षणं त्वभ्यधायि । अत्र रूपकश्लेषानुप्रासाः । अनेन तथा नायकप्रशंसा सट्टकस्वरूपप्रशंसा च कृता । उक्तं हि—'वाद्यकलापः प्रथम कलाविधिरनन्तर' । वाद्यशून्या न दृश्यन्ते व्यवहाराः कथचन ॥ वाद्यरूपपरत्व कवेरभीष्टार्थप्रकाशनम् ।' इति ।

(ततः प्रविशति राजा देवी विदूषको विभवतश्च परिवारः । सर्वे परिक्रम्य यथोचितमुपविशन्ति ।)

राजा—देवि दक्खिणाहिवणरिंदणंदिणि ! वड्ढावीअसि इमिणा वसंतारंभेण । जदो,—

बिंबोट्ठे वहलं ण देंति मअणं णो गंधतेल्लाविला
वेणीओ विरअंति लेंति[1] ण तहा अंगम्मि कुप्पासअं ।
जं बाला मुहकुंकुमम्मि वि घणे वट्टंति ढिल्लाअरा
तं मण्णे सिसिरं विणिज्जिअ बला पत्तो वसंतूसवो ॥ १३ ॥

देवी—देव ! अहं पि तुज्झ पडिवड्ढाविआ भविस्सं । जधा,—

ता इति ।

स्थापकः—तद्भाव ! एहि; अनन्तरकरणीय सपादयावः । यतो महाराजदेव्यो-र्भूमिका गृहीत्वा आर्य आर्यभार्या च जवनिकान्तरे वर्तेते ।

तत इति । 'एवमन्यतमेनार्थं पात्रावाक्षिप्य सूत्रधृक् । प्रस्तावनान्ते निर्गच्छेत्ततो वस्तु प्रपञ्चयेत् ॥' (३।२१,२२) इति दशरूपके उक्तत्वात् । 'गूढमन्त्र. शुचिर्वाग्मी भक्तो नर्मविचक्षण' । स्यान्मंगचिवस्तस्य धूर्तस्त्रीप्रसादक' ॥' (शृं. ति. १।२९) इत्युक्त्वा 'पीठमर्दो विटश्चैव विदूषक इति त्रिधा ।' इति तद्भेदानुक्त्वा 'क्रीडाप्रायो विदूषक' । स्ववपुर्वेषभाषामिर्हास्यकारी स्वकर्मकृत् ।' (शृं ति. १।३१) इति विदूषकलक्षणमभिहितं शृङ्गारतिलके ।

राजेति ।

देवि दक्षिणापथनरेन्द्रनन्दिनि ! वर्धसेऽनेन वसन्तारम्भेण ।

जदो इति ।

यतः,—

बिम्बोष्ठे बहलं न ददति मदनं नो गन्धतैलाविला
वेणीर्विरचयन्त्यादृदति न तथाश्लेऽपि कूर्पासकम् ।
यद्बाला मुखकुङ्कुमेऽपि घने वर्तन्ते शिथिलादरा-
स्तन्मन्ये शिशिरं विनिर्जित्य बलात्प्राप्तो वसन्तोत्सवः ॥

कूर्पासकं चोलिका । 'बाला स्यात्षोडशाब्दा' इति बालालक्षणम् । अनेन तासां विलासवत्त्वं व्यङ्ग्यम् । बाला इत्यस्यार्थस्तैरर्थदीपकम् । 'अनेकशब्दोपादानक्रियै-

---

1 अत्र 'देंति' इति पाठो टीकानुगुण. ।

छोल्लंति दंतरअणाइ गए तुसारे
ईसीस चंदणरसम्मि मणं कुणंति ।
एण्हिं सुवंति घरमज्झिमसालिआसु
पाअंतपुंजिअपडं मिहुणाइ पेच्छ ॥ १४ ॥

(नेपथ्ये ।)

वैतालिकयोरेकः—जअ जअ पुव्वदिसंगणासुअंग चम्पाचम्पअकण्णऊर लीलाणिज्जिदराढाचंगत्तण विक्कमक्कंतकामरूव हरिकेलीकेलिआर

वैकात्र दीप्यते।' (का २।११२) इति **दण्डिनोक्तम्**। अत्र च 'देंति देंति' इति क्रियातपदत्वं काव्यदोषो न शङ्कनीय । विरअंति इत्येतेन चटेकानुप्रासनिर्वाहकत्वेन गुणत्वात् । तल्लक्षणं च 'सोऽनेकस्य सकृद्यूर्वं' (१।७९) इति **काव्यप्रकाशे** । अस्यार्थं —अनेकस्य व्यञ्जनस्य सकृदेकवार साम्ये पूर्वं यस्य स चटेकानुप्रास इति । न चाव्यवधानेन पूर्वतायामेव स इति वाच्यम् । 'तनोऽङ्गपरिस्पन्दमन्दीकृतवपुः शशी । दधे कामपरिक्षामकामिनीगण्डपाण्डुताम् ॥' इत्यादावप्यकारमकाराकारारकारकाराकारव्यवधानेन तदनुदाहरणवापातात् । यद्वा एकस्य 'देंति'पदस्य दानविशेषार्थान्तरसंक्रमितवाच्यत्वाददोष इति युक्तमुत्पश्यामः ।

देवी—

देव ! अहमपि तव प्रतिवर्धिका भविष्यामि ।

प्रतिवर्धयतीति प्रतिवर्धिका । वसन्तवर्णिकेत्यर्थः ।

जधा इति ।

यथा—

स्फुरन्ति दन्तरत्नानि गते तुषारे
ईषदीषच्चन्दनरसे मनः कुर्वन्ति ।
इदानीं स्वपन्ति गृहमध्यमशालिकासु
पादान्तपुञ्जितपटं मिथुनानि प्रेक्षस्व ॥

मध्यमशालिकास्वित्यनेनान्तर्गृहस्वापस्योक्त इत्युक्तम् । पादान्तेत्यादिना पत्रानपेक्षोक्ता । स्फुरन्तीत्यनेनोष्ठाना हाससहत्वमुक्तम् । यथा **शृङ्गारतिलके** (३।२)—'किंचिद्विकसितैर्गण्डै किंचिद्वेल्लत्कपोलैश्च । किंचिल्लक्ष्यद्विजैः सोऽयमुत्तमाना भवेद्यथा ॥' इति । मिथुनानीते विरहासहत्वं व्यङ्ग्यम् ।

अवमणिदजच्चसुवण्णवण्ण सव्वंगसुंदरत्तणरमणिज्ज, सुहाअ दे भोदु सुरहिसमारंभो । इध हि,–

पंडीणं गंडवालीपुलअणचवला कंचिवालावलीणं
माणं दोखंडअंता रइरहसअरा चोलसीमंतिणीणं ।
कण्णाडीणं कुणंता कुरलतरलणं कुंतलीणं पिएसुं
गुंफंता णेहगंठिं मलअसिहरिणो सीअला एंति वाआ ॥ १५ ॥

जयेति ।

जय जय पूर्वदिगङ्गनाभुजङ्ग चम्पाचम्पककर्णपूर लीलानिर्जितराढादेश विक्रमाक्रान्तकामरूप हरिकेलीकेलिकारक अपमानितजात्यसुवर्णवर्ण सर्वाङ्गसुन्दरत्वरमणीय, सुखाय ते भवतु सुरभिसमारम्भ ।

भुजंगः कामुक. । 'राढागाढत्व' 'चङ्गत्व' इति वा पाठः । 'अवमानितकर्णसुवर्णदान' इति वा पाठ । राज्ञ सर्वा· संबुद्धय· । चम्पाराढाकामरूपहरिकेल्याख्या देशा· । कामस्य रूपमिति न व्याख्या । प्रकृतभङ्गापत्ते । चङ्गत्वं नानाकलाकौशलत्वम् । आद्ययो· संबुद्धयो रूपकम् । हरिकेली कामिनीवेल्यर्थश्लेप· । सुरभिर्वसन्तः ।

इह हि,–

पाण्डीनां गण्डपालीपुलकनचपलाः काञ्चीवालावलीनां
मानं द्विः खण्डयन्तो रतिरभसकरा चोलसीमन्तिनीनाम् ।
कार्णाटीनां कुर्वन्तो कुन्तलतरलनं कुन्तलीनां प्रियेषु
गुम्फन्तः स्नेहग्रन्थिं मलयशिखरिणः शीतला यान्ति वाताः ॥

पाण्ड्यादयस्तत्तद्देशोद्भवाः स्त्रियः । पुलकनं पुलककरणम् । तरलनं तरलवत्त्वकरणम् । एतेन कामोद्दीपकत्वमुक्तं दाक्षिणात्यवायूनाम् । एतेन तत्तद्देशाधिपत्यं राज्ञो व्यङ्ग्यम् । अन्यथा विपक्षदेशवर्णनं रोषावहत्वादनौचितीमेव व्रजेत् । णेहेति 'स्नेहेति वा' इत्यनेन विप्रकर्षाभावपक्षे 'उपरि लोपः–' इत्यनेन सलोपः । लक्ष्यवशात्लक्षणप्रवृत्तेरङ्गीकारात्, परमपि 'अधो मनयाम्' इति प्राप्तं नलोपं बाधित्वा 'न्हक्णण्णां ण्ह.' इति ण्हादेशः । 'द्वेर्दो' इति द्विशब्दस्य दोआदेशः । अत्र कारकहेत्वलंकारः । 'हेतुश्च सूक्ष्मलेशौ च वाचामुत्तममूषणम् । कारकज्ञापकौ हेतू तौ चानेकविधौ यथा ॥' (का. २।२३५) इति दण्डिनोक्तत्वात् ।

(अत्रैव।)

द्वितीयः—

जाअं कुंकुमपंकलीढमरढीगंडप्पहं चंपअं
थोआवट्टिअदुद्धमुद्धकुसुमा पप्फुल्लिआ मल्लिआ।
मूले सामलमग्गलग्गभसलं लक्खिज्जए किंसुअं
पिज्जंतं भमलेहि दोसु वि दिसाभाएसु लग्गेहि व॥ १६॥

राजा—पिए विब्भमलेहे! एको अहं वड्ढावओ तुज्झ, का तुमं पि वड्ढाविआ मज्झ। किं उण दुवे वि अम्हे वड्ढाविदा कंचणचंडरदणचंडेहिं बंदीहिं? ता विब्भमप्पअट्टावअं तरट्टीणं, णट्टावअं मलअमारुदंदोलिदलदाणच्चणीणं, चारुप्पवंचिदपंचमं कलकंठिकंठेसुं, कंदलिदकंदप्पकोअंडदंडाखंडिदकंडचंडिमं, सिणिद्धबंधवं वसुंधरापुरंधीए पसारिदपसप्पमाणेहिं अच्छीहिं महूसवं जधिच्छं पेक्खदु देवी।

जादं इति।

जातं कुङ्कुमपङ्कलीढमहाराष्ट्रीगण्डप्रभं चम्पकं
स्तोकावर्तितदुग्धमुग्धकुसुमा प्रोत्फुल्लिता मल्लिका।
मूले श्यामलमग्नलग्नभ्रमरं लक्ष्यते किंशुकं
पीयमानं मधुपाभ्यां द्वाभ्यामपि दिशाभागेषु लग्नाभ्यामिव॥

मरढी इति दंष्ट्रादिः। थो इति 'स्तोक्य थः' इति थः। स्तोकपदमत्यन्तसादृश्यार्थम्। मुग्धा सुन्दरी। 'मुग्धः सुन्दरमूढयोः' इत्यभिधानात्। 'महाराष्ट्रो'पदं गौरत्वातिशयकथनार्थम्; स्वभावतस्तद्गण्डानां गौरत्वात्। भसलो भ्रमरः। अत्र रूपकस्वभावोत्प्रेक्षाः। स्वभावोक्तिर्दण्डिनोक्ता (का. २।८)—'नानावस्थं पदार्थानां रूपं साक्षाद्विवृण्वती। स्वभावोक्तिश्च जातिधेलाद्या मालंबिनिर्यथा॥' इति।

राजा—

प्रिये विभ्रमलेखे! एकोऽहं वर्धापकस्तव, एका त्वं वर्धापिका मम। किं पुनर्द्वावप्यावां वर्धापितौ काञ्चनचण्डरत्नचण्डाभ्यां बन्दिभ्याम्! तद्विभ्रमप्रवर्तकं तरुणीनाम्, नर्तकं मलयमारुतान्दोलितलतानर्तकीनाम्, चारुप्रपञ्चितपञ्चमं कलकण्ठीकण्ठेषु, कन्दलितकंदर्पकोदण्डदण्डखण्डितचण्डिमानम्, स्निग्धबान्धवं वसुंधरापुरंध्याः। प्रसारितप्रसर्पणाभ्यां अक्षिभ्यां मधूत्सवं यथेच्छं प्रेक्षतां देवी।

देवी—जधा णिवेदिद वदीहिं । पअट्टा जेव मलआणिला । तधा अ,—

लंकातोरणमालिआतरलिणो कुंभुब्भवस्सासमे
मंदंदोलिअचंदणद्दुमलदाकप्पूरसंपक्किणो ।
कक्केल्लीकुलकंपिणो फणिलदाणिप्पट्टणट्ठावआ
चंडं चुंबिदतंबपण्णिसलिला वाअंति चेत्तणिला ॥ १७ ॥

वर्धापन वर्णनम् । विभ्रमेत्यादि मधूत्सवविशेषणानि । तरट्टीति दंष्ट्रादित्वात् । णट्ठावअं इति वयोऽनुसारेण । तारुण्य हि विभ्रमनिदानम् । अथवा यथाऽय कामिनीना विभ्रमजनस्तथा वसन्तोत्सवोऽपि । कामुकान्हि विलोक्य कामिन्यो विभ्रमसमुद्यमा भवन्ति । अर्थत उपमानम् । तेन विभक्तित्वं न दोष । एतेन स्वस्य कामुकता व्यङ्ग्या । 'क्रोध स्मित च कुसुमाभरणादियाच्या तद्भर्जनं च सहसैव विमण्डनं च । आक्षिप्य कान्तवचनं स्वपन सखीमिर्निष्कारणस्थितगतेन स विभ्रम स्यात् ॥' इति विभ्रमलक्षणम् । 'तल्लास्यं ताण्डव चैव छलितं शम्भया सह । हल्लीसक च रासं च षड्प्रकार प्रचक्षते ॥' इति षड्भेदमपि नृत्त गृह्यते । पञ्चम स्वर । कलकण्ठी कोकिला । चाहिलादौ विशेषणद्वय बहुव्रीहि । विस्तार्येत्यादिना विस्तारिताख्यो दन्त्यिकार उक्त । तदुक्तम्—'आयत विस्फुरत्तार विस्फारितमुदाहृतम् ।' इति । एतेनादरातिशयो व्यङ्ग्य । अत्र हेतुरूपके । नर्तकमित्यादौ समाधि । 'अन्यधर्मस्ततोऽन्यत्र लाक्षणीमानुरोधिना । सम्यगाधीयते यत्र स समाधि स्मृतो यथा ॥' (का १।९३) इति दण्डी ।

देवी—

यथा किल निवेदितं वन्दिभ्याम् ।

सत्यमेवोक्तमित्यर्थ ।

प्रवृत्ता एव मलयानिला । तथा च,—

लङ्कातोरणमालिकातरलिनः कुम्भोद्भवस्याश्रमे
मन्दान्दोलितचन्दनद्रुमलताकर्पूरसंपर्किणः ।
कङ्केलीकुलकम्पिनः फणिलतानिष्पट्टनत्कोविदा
श्चण्डं चुम्बितताम्रपर्णीसलिला वान्ति चैत्रानिलाः ॥

अवि अ,—

माणं मुंचध देह वल्लहजणे दिट्ठिं तरंगुत्तरं
तारुण्णं दिअहाइ पंच दह वा पीणत्थणुत्थंभणं ।
इत्थं कोइलमंजुसिंजिदमिसा देवस्स पंचेसुणो
दिण्णा चेत्तमहूसवेण सहसा आण व्व सव्वंकसा ॥ १८ ॥

विदूषकः—भो, तुम्हाणं सव्वाणं मज्झे अहं एक्को कालक्खरिओ । जस्स मे ससुरससुरो परघरेसु पोत्थअभारं वहंतो आसि ।

कङ्केली वृक्षविशेषः । फणिलताः फणिरूपा लताः । लताविशेषा (ताम्बूलवल्लयः) वा । निष्पटं निःशेषं नितरां वा । महाराष्ट्रभाषायाम् 'निष्पट' इति प्रसिद्धम् । एतेन माध्यादिकमुक्तं वायोः । अत्र प्रसादमाधुर्यसौकुमार्यार्थव्यक्तयः कथाः । ते यथा काव्यालंकारे (१।६६)—'प्रसिद्धार्थपदत्वं यत्स प्रसादोऽभिधीयते । या पृथक्पदता वाक्ये तन्माधुर्यमिति स्मृतम् ॥ अनिष्ठुराक्षरप्रायं सुकुमारमिति स्मृतम् । यत्र संपूर्णवाक्यत्वमर्थव्यक्तिं वदन्ति ताम् ॥' इति । एवमन्येऽपि गुणा द्रष्टव्याः । अत्रानुप्रासससमाध्यर्थश्लेषाः ।

अपि च,—

मानं मुञ्चत दत्त वल्लभजने दृष्टिं तरङ्गोत्तरां
तारुण्यं दिवसानि पञ्च दश वा पीनस्तनस्तम्भनम् ।
इत्थं कोकिलमञ्जुसिञ्जनमिषादेवस्य पञ्चेषोः
दत्ता चैत्रमहोत्सवेन भुवने माज्ञेव सर्वंकषा ॥

मानलक्षणे (द्रं. ति २।३२)—'स मानो नायिका यस्मिन्नीर्ष्यया नायकं प्रति । धत्ते विकारमन्यस्त्रीसङ्गदोषवशाद्यथा ॥' इति । तरङ्गितेति सदाख्यो दृष्टिविकार उक्तः । 'कल्लोला इव यत्कान्तिविच्छर्दस्तत्तरङ्गितम् ।' इति साहित्यम् । चैत्रे मधूत्सवश्चैत्रमधूत्सवः । सर्वंकषेति तत्र कामुकरहितत्वं व्यावर्तम् । अत्र विभावालंकारः । कोकिलरवादयो विभावाः । दृष्टिविकारादयोऽनुभावा द्रष्टव्याः । निर्वेदादयो व्यभिचारिणश्च ।

विदूषकः—

भोः, युष्माकं सर्वेषां मध्येऽहमेकः कालाक्षरिकः । यस्य मे श्वशुरश्वशुरः पण्डितगृहे पुस्तकभारं वहन्नासीत् ।

---

1 'दट्ठिअघरे' इति टीकापाठः ।

चेटी—(विहस्य।) तदो कमागदं ते पंडिच्चं।

विदूषकः—(सक्रोधम्।) आः दासीए पूदे, भविस्सकुट्टिणि, णिल्लक्खणे, विअक्खणे! ईदिसोहं मुक्खो जो तए वि उवहसीआमि! अण्णं च, हे परपुत्तविट्टालिणि, भमरटेंटे, टेंटाकरले, दुट्ठसंघडिदे! परंपरा पंडिच्चम्स मह कि दूषणं आसि। पेक्ख अकालजलदवंससंभूदाण परंपराए पंडिच्चं। अथवा हत्थे कंकणं कि दप्पणेण!

विचक्षणा—(विभाव्य।) एवं णेदं, तुरंगम्म सिग्घत्तणे किं सक्खिणो पुच्छिअज्जंति? ता एणअ वसंतं।

कालाक्षराणि वेत्तीति कालाक्षरिक पण्डित।

चेटी—

सत्त क्रमागतं ते पाण्डित्यम्।

वंशक्रमागतमित्यर्थं।

विदूषकः—

आ दास्या पुत्रि, भविष्यन्कुट्टिनि, निर्लक्षणे, अविचक्षणे! ईदृशोऽहं मूर्खो यस्त्वयाप्युपहस्ये?

प्राकृत आत्मनेपदपरस्मैपदव्यत्यय। 'धूदे' इति दंष्ट्रादि।

अन्यच्च हे परपुत्रविट्टालिनि भ्रमरटेण्टे टेण्टाकराले दुष्टसघटिते। अथवा हस्ते स्थिते किं दर्पणेन?

इदानीमेव मया कवित्वं कर्तव्यमित्यर्थं। विट्टालिनी भ्रष्टिका। परपुरुषलम्पटेत्यर्थं। भ्रमरटेंटा कुचेष्टावती। टेंटाकराला व्यर्थप्रलापिनी। एते देशीशब्दाः। दोषा शपथास्तेषा शतेन वर्तनशीला, मिथ्याशपथकारिणीत्यर्थं।

विचक्षणा—

एवमेतत्। तुरंगस्य शीघ्रत्वे किं साक्षिण पृच्छ्यन्ते? तद्गच्छ वसन्तम्।

विदूषकः—कधं पंजरगदा सारि ब्व कुरुकुराअंती चिट्ठसि ! ण किं पि जाणासि । ता पिअवअस्सस्स देवी पुरदो पढिस्सं । जदो ण कत्थूरिआ कुग्गामे वणे वा विक्किणीअदि, णेदं सुवण्णं कसवट्टिअं विणा कसीअदि ।

राजा—पिअवअस्स ! ता पढ । सुणीअदु ।

(विदूषकः पठति ।)

फुल्लुक्करं कलमकूरसमं वहंति
जे सिंधुवारविडवा मह वल्लहा ते ।
जे गालिअस्स महिसीदहिणो सरिच्छा
ते किं च मुद्धविअहल्लपसूणपुंजा ॥ १९ ॥

विदूषकः—

एवं पुनः पञ्जरगता सारिकेव गुरुगुरायमाणा तिष्ठसि ! न किमपि जानासि । तत्प्रियवयस्यस्य देव्याः पुरतः पठिष्यामि । यतो न कस्तूरिका कुग्रामे वने वा विक्रीयते, न सुवर्णं कषपट्टिकां विना कष्यते ।

इदानविचाश्रयणायोग्यायां अज्ञायास्तव सन्निधे न पठिष्यामीति भावः ।

राजा—

प्रियवयस्य ! तत्पठ । श्रूयताम् ।

अस्माभिरिति शेषः ।

फुल्ल इति ।

फुल्लोत्करं कलमकूरसमं वहन्ति
ये सिन्धुवारविटपा मम वल्लभास्ते ।
ये गालितस्य महिषीदधिनः सदृशा-
स्ते किं च मुग्धविकसत्प्रसूनपुञ्जाः ॥

पूर्व ओदनः । द्वितीयस्तदनेदाः । 'मम वल्लभा' इत्यनेन मम कर्मकरणानुकूलत्वं व्यज्यम् ।

विचक्षणा—(विहस्य) णिअकतारत्तणजोग्ग ते वअण।

विदूषकः—किंपि उदारवअणा तुम पढ।

देवी—(किंचिद्विस्मिता।) सहि विअक्खणे! अम्हाण पुरदो तुव गाढकइत्तणेण गव्वुत्ताणा मोसि। ता पढ सपद अज्जउत्तस्स पुरदो सअ कद किंपि कव्व। जदो त कव्व ज सभाए पढीअदि, त सुवण्ण ज कसवट्टिआए णिवडदि, सा घरिणी जा पदिं रञ्जेदि, सो पुत्तो जो कुल उज्जलेदि।

विचक्षणा—ज देवी आणवेदि। (इति पठति।)

जे लङ्कागिरिमेहलाहिं खलिदा सभोअविण्णोरई
फारप्फुल्लफणावलीकवलणे पत्ता दरिद्दत्तण।

विचक्षणा—
निजकान्तारञ्जनयोग्यं ते वचनम्।
स्वबुद्धिमेव केवलमाश्रित्य रञ्जयसीति भाव।

विदूषक—
तदुदारवचने! त्वं पठ।

देवी—
सखि विचक्षणे! अस्माकं पुरतस्त्वं गाढकवित्वेन गर्वोत्ताना भवसि।
अतिगर्वायस इति भाव।

तत्पठ साम्प्रतमार्यपुत्रस्य पुरत स्वय कृत किमपि काव्यम्। यतस्तत्काव्यं यत्सभायां पठ्यते तत्सुवर्णं यत्कषपट्टिकाया निवर्तते, सा गृहिणी या पतिं रञ्जयति स पुत्रो य कुलमुज्ज्वलयति।

सर्वत्रापि पतिर्वाच्य आर्यपुत्रेति यौवने इत्युक्तेरार्यपुत्रमेवोक्तम्।

विचक्षणा—
यद्देव्याज्ञापयति।

जे इति।

ये लङ्कागिरिमेखलायां स्खलिता सभोगनिद्रोरगी
स्फारोत्फुल्लफणावलीकवलने प्राप्ता दरिद्रत्वम्।

---

1 ता उदारवअणे इति टीकाद्धृत पाठ।

ते एण्हिं मलआणिला विरहिणीणीसाससंपक्किणो
जादा झत्ति सिसुत्तणे वि वहला तारुण्णपुण्णा विअ ॥ २० ॥

राजा—सच्चं विअक्खणा विअक्खणा चदुरत्तणे उत्तीणं । ता किंपि अण्णं विचित्तदाए । कईणं सुकइत्ति । कइचूडामणित्तणे ठिदा एसा ।

विदूषकः—(सक्रोधम् ।) ता उज्जुअं जेव किं ण भण्णई अच्चुत्तमा विअक्खणा कव्वम्मि, अच्चाधमो कविंजलो बंभणो त्ति ?

विचक्षणा—अज्ज ! मा कुप्प । कव्वं जेव दे कइत्तणं पिसुणेदि । जदो णिअकंतारत्तणणिंदणिज्जे वि अत्थे सुउमारा दे वाणी, लंबत्थ-

---

त इदानीं मलयानिला विरहिणीनि.श्वाससंपर्किणो
जाता झटिति शिशुत्वेऽपि बहलास्तारुण्यपूर्णा इव ॥

अयं श्लोकः कविनिबद्धवक्तृप्रौढोक्तिनिर्मिते ध्वनौ नि श्वाससंपर्कित्वेन वस्तुना प्रतीयमानो. किंकिं न दुर्वत इति वस्तु व्यज्यत इत्युदाहरणविषयत्वेनोदाहृतः काव्यप्रकाशे [चतुर्थोल्लासे] । सख्या अत्युत्प्रेक्षाया व्यञ्जनेऽविवक्षितत्वाच्चालंकारव्यञ्जनोदाहरणम् । अत्र हेत्वुत्प्रेक्षासमाधिविभावना । विभावना दण्डिनोक्ता—(का.२।१९९) 'प्रसिद्धहेतुव्यावृत्त्या यत्किंचित्कारणान्तरम् । यत्र स्वाभाविकत्वं वा विभाव्यं सा विभावना ॥' इति ।

राजा—
सखे विचक्षणा विनक्षणा चतुरत्वेनोक्तीनाम् । तत्किमन्यत् । कविनामपि कवे । कविचूडामणित्वेन स्थितैषा ।

विदूषकः—
तदप्येव किं न भण्यते देव्या-अत्युत्तमा विचक्षणा काव्ये, अत्यधमः कविंजलब्राह्मण इति ?

विचक्षणा—
आर्य ! मा कुप्य । काव्यमेव ते कवित्वं पिशुनयति । यतो निजकान्तारत्वनयोग्यं

---

1 'कव्वम्मि देवि' इति टीकापाठः । 2 'निजकान्तारत्वनयोग्यं निजोरुभरेण' इति टीकापाठः ।

णीए विअ एक्कावली तुंडिलाए विअ कंचुलिआ, काणाए विअ कज्जलसलाआ, ण सुट्ठुदरं भादि रमणिज्जा ।

विदूषकः—तुम्ह उण रमणिज्जे वि अत्थे ण सुंदरा सद्दावली । कणअकडिसुत्तए विअ लोहकिंकिणीमाला, पडिपट्टे विअ टसरिविरअणा गोरंगीए विअ चंदणचच्चा ण चारुत्तण अवलंबेदि । तधा वि तुवं वण्णीअसि ।

विचक्षणा—अज्जे! का तुम्हेहि समं अम्हाणं पाडिसिद्धी? जदो तुवं णाराओ विअ णिरक्खरो वि रअणतुलाए णिउंजीअसि । अहं पुण तुल घ लद्धक्खरा वि ण सुवण्णतोलणे विणिउंजीआमि ।

निजोदरंभरित्वं निन्दनीयेऽप्यर्थे सुकुमारा ते वाणी, लम्बस्तन्या इवैकावली, तुन्दिलाया इव कञ्चुलिका, काणाया इव कज्जलशलाका, न सुष्ठुतर भाति रमणीया ।

ते वाणी न भातीत्यर्थ ।

विदूषकः—

तव पुना रमणीयेऽप्यर्थे न सुन्दरा शब्दावली । कनकवटिसूत्र इव लोहकिंकिणीमाला, प्रतिपट्ट इव असरविरचना गौराङ्ग्या इव चन्दनचर्चा, न चारुत्वमवलम्बते । तथापि त्वं वर्ण्यसे ।

प्रतिपट्ट पट्टसूत्रम् । चन्दनचर्चाया स्वत सुन्दरत्वेऽपि गौरेऽङ्गे परभागालाभादसौन्दर्यम् । अर्थासुन्दरत्वेऽपि काव्यकौशलादहं सुकवि, त्वमर्थसौन्दर्येऽप्यसुन्दरकवित्वे वर्ण्यसे च सर्वैरिति महदाश्चर्यमिति भाव ।

विचक्षणा—

आर्य! मा कुप्य । का युष्यामि सह (अस्माकं) प्रतिस्पर्धा[1]? यतस्त्वं नाराच इव निरक्षरोऽपि रत्नतुलायां नियुज्यसे । अहं पुनस्तुल्येव लब्धाक्षरापि न सुवर्णतोलने विनियुज्ये ।

नाराचो लोहशलाका । नाराचस्य हि रत्नतुलावेधनमुपयोग । तुलायास्तु सुवर्णतोलने न कोऽपीति निरक्षरलब्धाक्षरपदयोस्तात्पर्यम् ।

---

1 'अज्जे! मा कुप्य । का' इति टीकापाठः ।

विदूषकः—एवं मह भणंतीए तुह वामं दक्खिणं अ जुहिट्ठिल-जेट्ठभाअरणामधेअं अंगं तडत्ति उप्पाडइस्सं ।

विचक्षणा—अहं पि उत्तरफग्गुणीपुरस्सरणक्खत्तणामधेअं अंगं तुह तडत्ति खंडिस्सं ।

राजा—वअस्स ! मा एवं भण । कइत्तणे ट्ठिदा एसा ।

विदूषकः—(सक्रोधम् ।) ता उज्जुअं च्चेव किं ण भण्णइ, अम्हाणं चेडिआ हरिडङ्कणंदिउङ्कपोट्टिसहालप्पहुदीणं पि पुरदो सुकइ त्ति[1] !

राजा—एवं णेदं ।

(विदूषकः सक्रोधं परिक्रामति ।)

विचक्षणा—(विहस्य) तहिं गच्छ जहिं मे मादाए पढमसाडो-लिआ गदा ।

विदूषकः—

एवं मम भणन्त्याश्चव वामं दक्षिणं च युधिष्ठिरज्येष्ठभ्रातृनामधेयमङ्गं झटिति उत्पाटयिष्यामि ।

कर्परूपमित्यर्थः । भादर इति 'अंते अरः सुपि' (प्रा. ७।९) इत्यारादेशे कृते 'पितृभ्रातृजामातृणामरः' (प्रा. ५।१३) इत्यरः ।

विचक्षणा—

अहमप्युत्तराफाल्गुनीपुरःसरनक्षत्रनामधेयमङ्गं तव झटिति खण्डयिष्यामि हन्मीत्यर्थः ।

राजा—

वयस्य ! मैवं भण । कवित्वे स्थितैषा ।

विदूषकः—

ऋषय एव तावन्न भण्यन्ते, अस्माकं चेटिका हरिश्चन्द्रनन्दिचन्द्रचेटिसहालप्रभृतीनामपि पुरतः मुखरयति ।

परान्मिन्नु (?) मिति शेषः ।

राजा—एवमेतत् ।

विचक्षणा—

तत्र गच्छ यत्र मे प्रपिता मातुः खाटिका गता ।

---

1 'हरिश्चन्द्रनन्दिश्चन्द्रचेटिसहाल' इति टीकापाठः ।

विदूषकः—(वक्रितग्रीवम्।) तुवं उण तहि गच्छ जहिं मे मादाए पढमा दंतावली गदा। ईदिसस्स राउलस्स भद्दं भोदु, जहि चेडिआ बंभणेण समं समसीसिआए दीसदि। मद्दरा पंचगव्वं च एक्कस्सि भंडे कीरदि, कच्चं माणिक्कं च समं आहरणे पउंजीअदि।

चेटी—इह राउले तं ते भोदु कंठट्ठिदं ज भअवं तिलोअणो सीसे समुव्वहदि। तेणं च दे मुहं चूरीअदु जेण असोअतरु दोहलं लहेदि।

विदूषकः—

त्वं पुनरत्र गच्छ यत्र मे मातुः प्रथमा दन्तावली गता।

कर्णेजपिकेत्यर्थः।

ईदिसस्स इति।

ईदृशस्य राजकुलस्य भद्रं भवतु, यत्र चेटिका ब्राह्मणेन समं समशीर्षिकया दृश्यते।

समशीर्षिका प्रतिस्पर्धा।

मद्दरा इति।

मदिरा पञ्चगव्ये चैकस्मिन्भाण्डे क्रियते, काचं माणिक्यं च समभाजने प्रयुज्यते।

चेटिका—

इह राजकुले तव भवतु यच्छशिनं सङ्गमाभिलाषेण शीर्षे समुद्वहति।

अर्धचन्द्र इत्यर्थः।

तेणं इति।

तेन च ते मुखं चूर्यतां येनाशोकतरुर्दोहदं लभते।

चरणप्रहारेणेत्यर्थः। 'पादाहतो वदनतो विकसत्यशोकः' इति प्रसिद्धिः।

विदूषकः—आ, दासीए पुत्ति! टेटाकराले, कोससदचट्टणि, रच्छालोट्टणि! एवं मं भणसि! ता मह महाबंभणस्स वअदेण तं तुमं लह जं फग्गुणसमए सोहंजणो दोहलं लहेदि। जं च पामराहितो गलिबइल्लो लहेदि।

विचक्षणा—अहं पुण तुह एवं भणंतस्स णेउरस्स विअ पाअलग्गस्स पाएण मुहं चूरइस्सं। अण्णं च, उत्तरासाढापुरस्सरणक्खत्तणामधेअं अंगजुअलं उप्पाडिअ घल्लिस्स।

(विदूषकः सक्रोधं परिक्रामति)

(जवनिकान्तरे किंचिदुच्चैः।) ईरिस राउलं दूरेण वंदीअदि जहिं दासी बंभणेण समं पाडिसिद्धिं करेदि। ता अज्जप्पहुदि णिअवसुंधराबंभणीए चलणसुस्सूसओ भविअ गेहे चेव चिट्ठिस्सं।

(सर्वे हसन्ति।)

विदूषकः—

'आ दासीए' इत्यादि व्याख्यातम् (पृ० १९)।

एवं इति।

एवं मां भणसि! तन्मम महाब्राह्मणस्य वचनेन तरुं लभस्व यत्फाल्गुनसमये शोभाञ्जनो दोहदं लभते। यत्पामरेभ्यो बलीवर्दं लभते।

फाल्गुनसमय इति धूलीक्रीडोपादिकम्। बलीवर्द इति नासाच्छेदनिषेधः।

विचक्षणा—

अहं पुनस्त्वयैवं भणतो नूपुरस्येव पादलग्नस्य पादेन मुखं चूर्णयिष्यामि।

नूपुरदृष्टान्तेन स्वयंग्रहणोपयोगित्वमस्योक्तम्।

अण्णं च इति।

अन्यच्च, उत्तराषाढापुरःसरनक्षत्रनामधेयमङ्गयुगलमुत्पाट्य क्षेपस्यामि।

अवमर्दशकलनिषेधः। 'घल्लिस्सं' इति देशी। 'अन्यच्च ते वचनेनोत्क्रमणोपरक्तानमङ्गं खण्डयित्वा क्षेप्स्यामि' इति क्वचित् पाठः।

जवनिकान्तर इति। 'अरी कालपटिका प्रतिहारि जवनिका स्थिरा क्रियताम्' इति तदर्थः।

ईरिसं इति।

देवी—कीदिसी अज्जकविंजलेण विणा गोट्ठी, कीदिसी उण णअणंजणेण विणा पसाहणालच्छी ।

(नेपथ्ये ।)

ण हु ण हु आगमिस्सं । अण्णो को वि पिअवअस्सो अण्णेसीअदु । अहवा एसा दुट्ठदासी लंबकुच्चं टप्परकण्णं पडिसीसअं देइअ मह ट्ठाणे उवहसणत्थं कीरदु । अहं एक्को मुदो तुम्हाणं सव्वाणं मज्झम्मि । तुग्हे उण वरिससअं जीवध ।

विचक्षणा—मा अणुसंधेध । अणुणअकक्कसो खु कविंजलो बंभणो सलिलसित्तो विअ सणगुणगंठी दिढं गाढदरो भोदि । णं दंसणीअं दीसदु ।

ईदृशं राजकुलं दूरे वन्द्यता यत्र दासी ब्राह्मणेन समं प्रतिस्पर्धां करोति । तदद्यप्रभृति निजगेहिन्या वसुंधरानामधेयाया ब्राह्मण्याश्चरणशुश्रूषुर्भूत्वा गेह एव स्थास्यामि ।

देवी—

आर्यपुत्र ! कीदृशी आर्यकपिञ्जलेन विना गोष्ठी, कीदृशी पुनर्नयनाञ्जनेन विना प्रसाधनलक्ष्मीः ।

ण इति ।

न खलु न खल्वागमिष्यामि । अन्यः कोऽपि प्रियवयस्योऽन्विष्यताम् । अथवैषा दुष्टदासी लम्बकुच्चा टप्परकर्णा प्रतिशीर्षकं दत्त्वा मम स्थान उपहसनार्थं क्रियताम् । अहमेको मृतो युष्माकं सर्वेषां मध्ये, यूयं पुनर्वर्षशतं जीवत ।

टप्परो वंशपात्रम् । 'टोपला' इति भाषायाम् । तद्वत्कर्णौ यस्याः । प्रतिशीर्षकलक्षणमुक्तम् । मम स्थान इति मदीयो वेषोऽन्यस्मै दातव्य इत्यर्थः ।

विचक्षणा—

माऽनुषग्नीत । अनुनयकर्कशः खलु कपिञ्जलब्राह्मणः सलिलसिक्त इव शणगुणग्रन्थिर्दृढं गाढतरो भवति । नन्वु दर्शनीयं दृश्यताम् ।

देवी—(समन्तादवलोक्य ।)

गाअंतगोवअवहूपअपेखिदासु
दोलासु विब्भमवदीसु [1]णिविट्ठदिट्ठी ।
जं जादि खंजिदतुरंगरहो दिणेसो
तेण घ होंति दिअहा अइदीहदीहा ॥ २१ ॥

(प्रविश्यापटीक्षेपेण ।)

विदूषकः—आसणं आसणं ।

देवी—

गायद्गोपवधूपदप्रेङ्खितासु
दोलासु विभ्रमवतीषु निषण्णदृष्टिः ।
यद्याति रञ्जिततुरङ्गरथो दिनेश-
स्तेनैव भवन्ति दिवसा अतिदीर्घदीर्घाः ॥

पदैश्चरणैः । प्रेङ्खिताश्चान्दोलिताश्च । गोष्ठीभिर्विनातिदीर्घा दिवसा आलस्यमाबद्नतीत्यानीयतां कपिञ्जलब्राह्मण इति ध्वन्यते, तेन प्रकृतसंगतिः । अत्र हेत्वतिशयोक्तिपर्यायोक्तवस्तुत्प्रेक्षाः । अतिशयोक्तिपर्यायोक्ती दण्डिनोक्ते—(का. २।२१४) 'विवक्षा या विशेषस्य लोकसीमानिवर्तिनी । असावतिशयोक्तिः स्यादलंकारोत्तमा यथा ॥' इति । 'अर्थमिष्टमनाख्याय साक्षात्तस्यैव सिद्धये । यत्प्रकारान्तराख्यानं पर्यायोक्तमितीष्यते ॥' (का. २।२९५) इति ।

प्रविश्येति । अपटी जवनिका ।

विदूषकः—

आसनमासनम् ।
दीयतामिति शेषः ।

---

1 'निमग्न' इति टीकानुगुणः पाठः ।

राजा—किं तेण ?

विदूषकः—भइरवाणंदो दुआरे चिट्ठदि ।

देवी—किं सो, जो जणवअणादो अचब्भुदसिद्धी सुणीअदि ?

विदूषकः—अध इं ।

राजा—पवेसअ ।

(विदूषको निष्क्रम्य तेनैव सह प्रविशति ।)

भैरवानन्दः—(किंचिन्मदमभिनीय ।)

मंतो ण तंतो ण अ किं पि जाणे झाणं च णो किं पि गुरुप्पसादा ।
मज्जं पिवामो महिलं रमामो मोक्खं च जामो कुलमग्गलग्गा ॥ २२ ॥

राजा—

किं तेन ?

प्रयोजनमिति शेषः ।

विदूषकः—

भैरवानन्दो द्वारे तिष्ठति ।

देवी—

किं सः, यो जनवचनादत्यद्भुतसिद्धि श्रूयते ?

विदूषकः—

अथ किम् ।

राजा—

प्रवेशय ।

मंतो इति ।

मन्त्रो न तन्त्रं न च किमपि ध्यानं ज्ञानं च नो किमपि गुरुप्रसादात् ।
मद्यं पिबामो महिलां रमयामो मोक्षं च यामः कुलमार्गलग्नाः ॥

अवि अ,—

रंडा चंडा दिक्खिदा धम्मदारा
मज्जं मंसं पिज्जए खज्जए अ ।
भिक्खा भोज्जं चम्मखंडं च सेज्जा
कोलो धम्मो कस्स णो भादि रम्मो ॥ २३ ॥

किं च,—

मुत्तिं भणंति हरिबम्हमुहा वि देवा
झाणेण वेअपढणेण कदुक्किआहिं ।
एक्केण केवलमुमादइदेण दिट्ठो
मोक्खो समं सुरअकेलिसुगारसेहिं ॥ २४ ॥

राजा—इदं आसणं । उवविसदु भइरवाणंदो ।

मन्त्रादिलक्षणान्यतिप्रयोजनतया न लिख्यन्ते । अत्र विरोधाभासः । स यथा दण्डिना प्रोक्तः (का. २।३३१)—'विरुद्धानां पदार्थानां यत्र संसर्गदर्शनम् विशेषदर्शनायैव स विरोधः स्मृतो यथा ॥' इति ।

अवि अ इति ।

अपि च,—

रण्डा चण्डा दीक्षिता धर्मदारा
मद्यं मांसं पीयते खाद्यते च ।
भिक्षा भोज्यं चर्मखण्डं च शय्या
कौलो धर्मः कस्य नो भाति रम्यः ॥

किं च इति,—

मुक्तिं भणन्ति हरिब्रह्ममुखादिदेवा
ध्यानेन वेदपठनेन कदुक्रियाभिः ।
एकेन केवलमुमादयितेन दृष्टो
मोक्षः समं सुरतकेलिसुखारसैः ।

हरिब्रह्ममुखाश्च ते आदिदेवाश्चेति विग्रहः । अत्र व्यतिरेकः ।

राजा—

इदमासनम् । उपविशतु भैरवानन्दः ।

भैरवानन्दः—(उपविश्य ।) किं कांदर्षं !

राजा—कहिं पि विसए अच्छरिअं दट्ठुं इच्छामि ।

भैरवानन्दः—

दंसेमि तं पि ससिणं वसुहावइण्णं
धंमेमि तस्स वि रविस्स रहं णहद्धे ।
आणेमि जक्खसुरसिद्धगणंगणाओ
तं णत्थि भूमिवलए मह जं ण सज्झं ॥ २५ ॥

ता मण किं कीरदु ।

भैरवानन्दः—

—किं कर्तव्यम् ?

किमप्यस्ति ते मया कर्तव्यमित्यर्थः ।

राजा—

कस्मिन्नपि विषये आश्चर्यं द्रष्टुमिच्छामि ।

अनेन कारणाव्यमन्त्रमुक्तम् । 'प्रकृतार्थस्य चारम्भः कारणं नाम तद्भवेत् ।' इत्युक्तत्वात् ।

भैरवानन्दः—

दर्शयामि तमपि शशिनं वसुधावतीर्णं
लप्स्यामि तस्यापि रवे रथं नभोऽर्धे ।
आनयामि यक्षसुरसिद्धगणाङ्गना-
स्तप्तास्ति भूमिवलये मम यन्न साध्यम् ॥

एतेनावमर्शसंध्यङ्गो व्यवसाय उक्तः । तत्रावमर्शलक्षणं दशरूपके (१।४३)—'क्रोधेनावमृशेद्यत्र व्यसनाद्वापि लोभनात् । 'गर्भनिर्भिन्नबीजार्थः सोऽवमर्श इति स्मृतः ॥' इति । व्यवसायलक्षणमपि तत्रैव 'व्यवसायः स्वशक्त्युक्तिः' (१।४७) इति ।

ता इति ।

तद्भण किं क्रियताम् ।

विदूषकः—

ण्हाणावमुक्काहरणुज्जआए तरंगभंगक्खदमंडणाए ।
ओल्लंसुउल्लासिथणुल्लआए सुंदेरसव्वस्समिमीअ दिट्ठी ॥ २८ ॥

नायिका—(सर्वानवलोक्य । स्वगतम् ।) एसो महाराओ को वि इमिणा गंभीरमहुरेण सोहासमुदाएण जाणीअदि । एसा वि एदस्स महादेवी लक्खीअदि । अद्धणारीसरस्स वामद्धे विअ अकहिआ वि गोरी मुणीज्जदि । एसो को वि जोईसरो । एस उग्ग परिअणो । (विचिन्त्य ।) ता किं ति एदस्स महिलासहिदस्स वि दिट्ठी मं बहु मण्णेदि । (इति व्यलं वीक्षते ।)

लगतीत्यर्थः । अत्र प्रलयाख्यः सात्त्विको भावः । स यथा रसकलिकायाम्—'प्रलयो रागदुःखादेरिन्द्रियास्तमयो मतः ।' इति । स एव चानुभावः । चिन्तादयो व्यभिचारिणः यौवनादय आलम्बनगुणा विभावाः । अभिलाषाख्या शृङ्गारावस्था ।

विदूषकः—

स्नानावमुक्ताभरणोचयायास्तरङ्गभङ्गक्षतमण्डनायाः ।
आर्द्रांशुकोल्लासितनुलतायाः सौन्दर्यसर्वस्वमस्या दृष्टिः ॥

दृष्टिरत्र तटस्थः । अन्यत्पूर्ववत् । अत्र रूपमुक्तम् । तद्यथा सुधाकरे—'अन्यान्यभूषितान्येव प्रक्षेपार्थैर्विभूषणैः । येन भूषितवद्भान्ति तद्रूपमिह कथ्यते ॥' इति । मृदवं नामाङ्गमायुक्तम्—'दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत् ।' इति तल्लक्षणम् । 'सुश्लिष्टसृष्टिबन्धो यस्तत्सौन्दर्यमितीर्यते' । इति सौन्दर्यलक्षणम् ।

नायिका—एसो इति ।

एष महाराजः कोऽप्यनेन गम्भीरमधुरेण शोभासमुदायेन ज्ञायते । एषाप्यस्य महादेवी लक्ष्यते । अर्धनारीश्वरस्य वामार्धेवाकथितापि गौरी । एषः योऽपि योगीश्वरः । एष पुनः परिजनः । तत्किमिलेतस्य महिलासहितस्यापि दृष्टिर्मां बहु मन्यते ?

व्यलमिति क्रियाविशेषणम् । अनेन कातराक्ष्यं दर्शनमुक्तम् । 'सशयान्वेषणपरं यत्तत्कातरमुच्यते ।' इति तल्लक्षणम् ।

राजा—(विदूषकमपवार्य ।)

जं मुद्धा सवणंतरेण सहसा तिक्खा कडक्खच्छडा
भिंगाहिट्ठिदचेदअग्गिमदलद्दोणीसरिच्छच्छवी ।
तं कप्पूररसेण णं धवलिदो जोण्हाइ ण ण्हाविदो
मुत्ताण घणरेणुणा व छुरिदो जादो म्हि एत्थंतरे ॥ २९ ॥

राजा—अपवार्येति । अपवारणेन जनान्तिकमुच्यते । अत एवोक्तं दशरूपके (१।६५-६६)—'त्रिपताकरेणान्यानपवार्यान्तरा कथाम् । अन्योन्याभाषणं यत्स्याज्जनान्तिकमेव तत् ॥' इति । त्रिपताका तु संगीतरत्नाकरे—'तर्जनीमूलसंलग्नमध्यमाङ्गुष्ठको भवेत् । पताक सहताकार प्रसारितकराङ्गुलि ॥ स एव त्रिपताख्यः स्याद्वलितानामिकाङ्गुलि ।' इति ।

यन्मुक्ता श्रवणान्तरेण सहसा तीक्ष्णा कटाक्षच्छटा
भृङ्गाधिष्ठितचेतकाग्निमदलद्रोणीसरश्चच्छवि ।

विदूषकः—अहो से रूवसोहा ।

मण्णे मज्झ तिवलिवलिअ डिंभमुट्ठिअ गेज्झं
णो बाहूहि रमणफलअ वेट्ठिदु जादि दोहि ।
णेत्तच्छेत्त तरुणिपसईदिज्जमाणोवमाणं
ता पच्चक्ख मह विलिहिदु जादि एसा ण चित्ते ॥ ३० ॥

कध ण्हाणधोदविलेवणा वि समुच्चारितविभूसणा वि रमणिज्जा। अह वा,—

रूवेण मुक्का वि विभूसअंति ताणं अलंकारवसेण सोहा ।
णिसग्गचंगस्स वि[1] माणुसस्स सोहा समुम्मीलदि भूसणेहिं ॥३१॥

विदूषकः—

अहो अस्या रूपरेखा ।

मन्ये मध्य त्रिवलिवलित डिम्भमुष्टया ग्राह्यं
नो बाहुभ्या रमणफलक वेष्टितु याति द्वाभ्याम् ।
नेत्रक्षेत्र तरुणीप्रसूनिर्दीयमानोपमानं
तत्प्रत्यक्ष मया विलिखितुं याप्येषा न चित्ते ॥

रमणफलक जघनपरिसर । नेत्रक्षेत्रं चक्षु परिसर । चित्ते विलिखितुं धारयितुं न शक्नोमीत्यर्थ । डिम्भो बाल । 'क्षेत्र'शब्देन नानादृग्विषयाश्रयत्वं व्यङ्ग्यम् । अत्र रूपकव्यतिरेकसौन्दर्योक्तानि । लावण्य तु 'मुक्तास्वेषु च्छायायास्तरलत्वमिवान्तरा । प्रतिभाति यदङ्गेषु लावण्य तदिहोच्यते ॥' इति । उपमालङ्कार । शृङ्गारस्य दीप्तत्वात् 'कान्तिर्दीप्तिरुच्यते' इति कान्तिर्व्यक्तार्थगुण उक्त । गाम्भीर्यं च । विभावादिक तु पूर्ववत् ॥

कथं स्नानधौतविलेपना समुच्चारितविभूषणापि रमणीया । अथवा,—

या रूपमुक्ता अपि विभूषयन्ति तासामलंकारवशेन शोभा ।
निसर्गचङ्गस्यापि मानुषस्य शोभा समुन्मीलति भूषणैः ॥

यासा सौन्दर्यं नास्ति तासामलंकारेण शोभा । यस्य तु मनुष्यस्य नैसर्गिकं सौन्दर्यं तस्यालंकारः कान्तिमुन्मीलति, न त्वमलत्व जनयत इत्यर्थ । अत्र समाधि । यथा काव्यप्रकाशे (१०।१२५) —'समाधि सुकरे कार्ये कारणान्तरयोगत' ॥

---

1 'णो रूवेण' इति क्वचित्पाठः । 2 'न मनुष्यस्य' इति क्वचित्पाठः ।

इत्थं जाणं अवअवगदा का वि सुंदेरमुद्दा
मण्णे ताणं वलइदधणू णिच्चभिच्चो अणंगो ॥ ३३ ॥

अवि अ, एदाए—

तहा रमणवित्थरो जह ण ठाइ कंचीलदा
तहा [1]सिहिणतुंगिमा जह [2]णिएइ णाहिं ण हु ।
तहा णअणवहिमा जह ण किंपि कण्णुप्पलं
तहा अ मुहमुज्जलं दुरसिणी जहा पुण्णिमा ॥ ३४ ॥

देवी—अज्ज कविंजल ! पुच्छिअ जाणं का एस त्ति ।

इत्थं यासामवयवगता कापि सौन्दर्यमुद्रा
मन्ये तासां वलयितधनुर्नित्यभृत्योऽनङ्गः ॥

अवयवगतेति । सर्वाङ्गव्यापि सौन्दर्यमुक्तम् । नित्यभृत्य इति । भृत्यो यथा भर्त्राज्ञामन्तरेणापि तदाशयमेव विज्ञाय कार्यं कुरुते तथा कामिनीकटाक्षमात्रेणैव कामिनो वशी करोति काम इत्युत्प्रेक्षयोपमा ध्वन्यते । अत्र सारः । स यथा काव्यप्रकाशे (१०।१२३)—'उत्तरोत्तरमुत्कर्षो भवेत्सारः परावधिः ।' इति ॥

अपि च, एतस्याः—

तथा रमणविस्तरो यथा न तिष्ठति काञ्चीलता
तथा च स्तनतुङ्गिमा यथा नैनि नाभिं मुखम् ।
तथा नयनवहिमा यथा न किमपि कर्णोत्पलं
तथा च मुखमुज्ज्वलं दुरसिनी यथा पूर्णिमा ॥

न किमपीति न शोभावहमित्यर्थः । क्वचित् 'वुड्ढिमा' इति पाठः । क्वचिच्च 'वहिमा' इति । तदुभयमप्यप्रमाणम् । 'वृद्धवृत्तशब्दाभ्याम्' इति वृ. क्वचिददर्शनात् । दुरसिनीति 'नद्यृतश्च' (पा.५।४।१५३) इति न कप् । अनित्यत्वात् । अद्भुतोपमया वपुषः परमाह्लादकरत्वं ध्वन्यते । चरणन्यासेऽतिशयोक्तिहेतुः । चतुर्थे सुषमायाः पूर्णत्वात्प्रक्रमभङ्गः 'तहा अ मुहमुज्जलं जह ण उज्जलं कंचणं' इति पठित्वा समाधेयः ॥

देवी—

अज्ज कविंजल ! पुट्ठा जाणीहि वेअरिं ।

---

1 'तहा अ कडी' इति पाठः । 2 'ण दरं णाहिं पुरं' इति क्वचित् ।

नायिका—तस्स घरणी ससिप्पहा णाम ।

देवी—(स्वगतम् ।) सा वि मे माउच्छिआ ।

नायिका—(विहस्य ।) तेहि अहं खलखंडेहि कीणिदा दुहिद त्ति वुच्चामि ।

देवी—(स्वगतम् ।) ण हु ससिप्पहागव्भुप्पत्तिं अंतरेण ईदिसी रूवसोहा । ण हु विदूरभूमिं अंतरेण वेरुलिअमणिसलाआ णिप्पज्जदि । (प्रकाशम् ।) णं तुवं कप्पूरमंजरी ।

(नायिका सलज्जमधोमुखी तिष्ठति ।)

देवी—एहि वहिणिए ! आलिंगसु मं । (इति परिष्वजेते ।)

कर्पूरमञ्जरी—अम्महे, कप्पूरमंजरीए एसो पढमो पणामो ।

नायिका—
तस्य गृहिणी शशिप्रभा नाम ।

देवी—
सापि मे मातृष्वसा ।

नायिका—
ताभ्यामहं खलिखण्डैः क्रीणिता दुहितेति ।

देवी—
न खलु शशिप्रभागर्भोत्पत्तिमन्तरेणेदृशी रूपरेखा । न खलु वैदूर्यभूमिमन्तरेण वैदूर्यमणिशलाका निष्पद्यते । ननु त्वं कर्पूरमञ्जरी ।

देवी—
एहि भगिनिके ! आलिङ्गय माम् ।

कर्पूरमञ्जरी—
आर्ये ! कर्पूरमञ्जर्या एष प्रथमः प्रणामः ।
प्रथम इत्येतावन्तं कालमदृष्टपूर्वप्रणामस्य प्राथम्यमुक्तम् ।

देवी—अज्ज भइरवाणंद ! तुज्झ प्पसाएण अपुव्वं सविहाणअं अणुभविदं कप्पूरमंजरीदंसणेण । ता चिट्ठदु दाव एसा पंचदसदिवसाइं । पच्छा झाणविमाणेण णइस्सध ।

भैरवानन्दः—जं भणादि देवी ।

विदूषकः—(राजानमुद्दिश्य ।) भो वअस्स ! अम्हे परं दुवे वि गाहिरा तुवं अह च । जदो एदाणं मिलिद कुडुंबं वट्टदि । जदो इमीओ दो वि बहिणिआओ । भइरवाणंदो उण एदाणं संजोअअरो अच्चिदो महग्घिदो अ । एसा विअक्खणा महीअलसरस्सदी अ कुट्टिणी[1] देवी जेव देहंतरेण ।

देवी—विअक्खणे ! णिअजेट्ठबहिणिअ सुलक्खणं भणिअ भइरवाणंदस्स हिअइच्छिदा सपज्जा कादव्वा ।

देवी—

आर्य भैरवानन्द ! तव प्रसादेनापूर्वं सविधानकमनुभूतं कर्पूरमञ्जरीदर्शनेन । तत्तिष्ठतु तावदेषा पञ्चदशदिवसान् । पश्चाद्ध्यानविमानेन नेष्यथ ।

सविधानकमुपचारः । ध्यानलब्धं विमानं ध्यानविमानम् । नेष्यथेति पूजाया बहुवचनम् ।

भैरवानन्दः—

यदाज्ञापयति देवी ।

विदूषकः—

भो वयस्य ! आवां परं द्वावपि भ्रातरौ त्वमहं च । यत एतासां मिलितं कुटुम्बं वर्तते । यत इमे द्वे अपि भगिन्यौ । भैरवानन्द पुनरेतयोः संयोगकरोऽर्चितो महार्घितश्च । एषा विचक्षणा महीतलसरस्वती च कुट्टनी देहान्तरेण देव्येव । यथा राशीकृतेना तर्पयमपीति शोभनम् ।

देवी—

विचक्षणे ! निजज्येष्ठभगिनिकां सुलक्षणां भणित्वा भैरवानन्दस्य हृदयेप्सिता सपर्या वर्तयस्व ।

हृदयप्सितेन सार्धं । तदा मनसिलषितसिद्धिरर्थ ।

---

1 'देहान्तरेण देवी जेव' इति टीकासम्मतः पाठः ।

विचक्षणा—जं देवी आणवेदि ।

देवी—(राजानं प्रति ।) अज्जउत्त ! पेसिहि मं, जेण अहं बहिणीए एदावत्थाए णेवच्छलच्छीलीलाणिमित्तं अंतेउरं गमिस्सं ।

राजा—जुज्जदि चंपअलदाए कत्थूरिआकप्पूररसेहिं आलवालपरिपूरणं ।

(नेपथ्ये ।)

वैतालिकयोरेकः—सुहसंझा भोदु देवस्स ।

एदं वासरजीवपिंडसरिसं चंडंसुणो मंडलं
को जाणादि कहिं पि संपदि गअं पत्तम्मि कालंतरे।
जादा किं च इअ पि दीहविरहा सोऊण णाहे गदे
[1]णिद्दामुद्दिदलोअण व णलिणी मीलंतपंकेरुहा ॥ ३५ ॥

विचक्षणा—
यद्देव्याज्ञापयति ।

देवी—
आर्यपुत्र ! प्रेषय माम्, येनाहं भगिन्या एतदवस्थाया नेपथ्यलक्ष्मीलीलानिमित्तमन्तःपुरं गमिष्यामि ।

राजा—
युज्यते चम्पकलतायाः कस्तूरीकर्पूरैरालवालपरिपूरणम् ।
अत्रयमस्या नेपथ्यं कर्तव्यमित्यर्थः । समासोक्तिरत्र । सा यथा काव्यप्रकाशे (१०।९७)—'परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः' इति ।

वैतालिकः—
सुरायं सन्ध्या भवतु देवस्य ।

एतद्वासरजीवपिण्डसदृशं चण्डांशोर्मण्डलं
को जानाति क्वापि संप्रति गतमेतस्मिन्कालान्तरे ।
जाता किं चैवमपि दीर्घविरहा शोकेन नाथे गते
मुष्णन्मुद्रितलोचनेव नलिनी म्लायत्पङ्केरुहा ॥

---

[1] 'मुण्णमुद्दिअ" इति दीपार्थतः पाठः ।

द्वितीयं जवनिकान्तरम्

(ततः प्रविशति राजा प्रतीहारी च ।)

प्रतीहारी—(परिक्रामितकेन ।) इदो इदो महाराओ ।

राजा—(कतिचित्पदानि गत्वा । तामनुसंधाय ।) तहिं खु अवसरे

ण ट्ठाणाहिं तिलंतरं पि चलिदा सुत्था णिअंबत्थली
थोउद्वेल्लवलीतरंगमुदरं कंठो तिरिच्छिट्ठिदो ।
वेणीए उण आणणेंदुभमणे लद्धं थणालिंगणं
जादा तीअ चउव्विहा तणुलदा तंसं वलंती मए ॥ १ ॥[1]

प्रतीहारी—

इत इतो महाराजः ।

राजा—

गत्वेत्यनन्तरमाह सेनेति शेषः ।

तस्मिन्नल्पवसरे,—

न स्थानात्तिलमात्रमप्यचलिता स्वस्था नितम्बस्थली
स्तोकोद्वेल्लदलीतरङ्गमुदरं कण्ठस्तिर्यक्स्थितः ।
वेण्या पुनराननेन्दुभ्रमणे लब्धं स्तनालिङ्गनं
जातान्तस्याश्चतुर्विधा तनुलता निध्याययन्त्या माम् ॥

अत्र स्मृतिः । तल्लक्षणं **साहित्यदर्पणे** (३।१६२)—'सदृशज्ञानचिन्ताद्यैर्नृ-समुदयनादिदृक् । स्मृतिः पूर्वानुभूतार्थविषयज्ञानमुच्यते ॥' परिकरोऽलंकारः । तल्लक्षणमुक्तं वृद्धैः—'विशेषणसामिप्रायत्वे परिकरः' इति । अत्र च स्थलीतरङ्गादिविशेषणानां तथात्वमूह्यम् । रूपकं चात्र । तल्लक्षणमुक्तं **भरतेन**—(ना. प्र. १०।९३) 'तद्रूपकमभेदो य उपमानोपमेययोः ।' इति न स्थानात्तिलमात्रमपीत्यनेन नितम्बस्य गरिमातिशयो ध्वन्यते । 'वलीतरङ्गम्' इत्यनेन स्वच्छतातिशयो व्यज्यते । 'तनु-लता' इत्यनेन च वादर्यचापल्यशीलादितानुगवत्त्वं वपुषो ध्वन्यते ।

---

1 'निश्चलभ्रमंशीव ग' इति टीकापाठः; 'तंसं पुलंती अ मं' इत्यपि पाठः क्वचित् ।

प्रतीहारी—(स्वगतम् ।) कहं अज्ज वि सो ज्जेव सिरितालीपत्तसंचओ, ताओ ज्जेव अक्खरपंतीओ । ता वसंतवण्णणेण सिढिलआमि से तग्गदं हिअआवज्जं । (प्रकाशम् ।) दिट्ठिं देदु महाराओ ईसीसि जरढाअमाणे कुसुमाअरम्मि ।

मूलाहिंतो परहुदवहूकंठमुद्दं दलंता
देंता दीहमहुरिमगुणं जंपिए छप्पआणं ।
संचारेंता विरहिसु णवं पंचमं किं च रागं
राउम्मत्ता रइकुलहरा घासरा वित्थरंति ॥ २ ॥

प्रतीहारी—

कथमद्यापि स एव श्रीताडीपत्रसचयः, ता एवाक्षरपङ्क्तयः । तद्वसन्तवर्णनेन शिथिलयाम्यस्य तद्गतं हृदयावेगम् ।

'आवेग'शब्देन यद्यपि सर्वथा नास्य तन्मनस्कता निराकर्तुं शक्यते, तथापि विषयान्तरसंचारेण किंचिच्छिथिलयामीति चोच्यते ।

दिट्ठिं इति ।

दृष्टिं ददातु महाराज ! ईषदीषज्जरठायमाणे कुसुमाकरे ।

कुसुमानामाकर उत्पत्तिस्थानमित्यर्थः । कुसुमानामाकरः समूहो यस्मिन्निति वा । कुसुमैराकर इति वा । 'आकरो निवहोत्पत्तिस्थानश्रेष्ठेषु कथ्यते ।' इति विश्वः ।

मूला इति ।

मूलाप्रभृति परभृतवधूकण्ठमुद्रां दलन्तो
दत्तो दीर्घं मधुरिमगुणं जल्पिते षट्पदानाम् ।
संचारयन्तो विरहिषु नवं पञ्चमं किंचिदागं
रागोन्मत्ता रतिकुलगृहा वासरा विस्मीयन्ते ॥

परभृतवध्वः कोकिलस्त्रियः । परभृता वध्व इवेति वा । षट्पदेष्वपि समो भ्रमरो ध्वनिः । मधुरिमैव गुणः । मधुरिम्णा गुणविशेष इति वा । तेन दुःसहा च सेवा तस्य भावादिति भावः (?) । 'पुष्पसाधारणे काले पिकः कूजति पञ्चमम्' 'किंचिदागम्' इति 'पञ्चमम्' इत्यस्य विशेषणम् । किंचिदागो यस्यां क्रियायामिति व

राजा—(तदनाकर्ण्य सानुरागम्।)

आत्थाणीजणलोअणाण वहला लावण्णकल्लोलिणी
लीलाविब्भमहासवासणअरी सोहग्गपालित्तिआ।
णेत्तेंदीवरदीहिआ मह पुणो सिंगारसंजीविणी
[1]जं जादा अह मम्महेण धणुहे तिक्खो सरो [2]संधिदो ॥३॥

(सोन्मादमिव।) दंसणक्खणादो पहुदि कुरंगच्छी

भवति तयेति क्रियाविशेषणं वा। रतयः संभोगास्तेषां कुले समूहस्य गृहाः स्थानानीत्यर्थः। यद्वा,-रतिकुलस्य प्रीतिसमुदायस्य गृहाः स्थानानि। तज्जनकत्वादित्याशयः।

राजा—

आस्थानीजनलोचनानां वहला लावण्यकल्लोलिनी
लीलाविभ्रमहासवासनगरी सौभाग्यपालिस्थिता।
नेत्रेन्दीवरदीर्घिका मम पुनः शृङ्गारसंजीविनी
संजातायं मन्मथेन धनुषि तीक्ष्णः शरः पुनितः॥

'लावण्यकल्लोलिनी' इत्यनेन प्रतिक्षणं सौन्दर्यातिशयस्तद्विर्व्यज्यते। 'वासनगरी' इत्यनेन क्षणमपि तद्विच्छेदासहो ध्वन्यते। 'तीक्ष्ण' इत्यनेन पूर्वमपि शरसंधानमासीदेव, इदानीं त्वतिदुःसहं तदेतादृशशरनिस्सारणं योत्यते।

सोन्मादमिति। उन्मादलक्षणं शृङ्गारतिलके (२।१२)—'श्वासप्रोद्वेगोत्कम्पवशुभोन्मत्तरूपि। व्यापारो जायते यत्र स उन्मादः स्मृतो यथा॥' इति। साहित्यदर्पणेऽपि (३।१६०)—'चित्तस्य भ्रम उन्मादः कामशोकभयादिभिः। अत्यानन्दासदृशचिन्तनिष्प्रलपनादिकृत्॥' इति।

दंसण इति।

दर्शनक्षणात्प्रभृति पुरश्चारी

---

1 'तेत्तेण' इति दीक्षितः पठः। 2 'पुणिदो' इति दीक्षितः पाठः।

चित्ते वहुट्टदि ण खुट्टदि सा गुणेसुं
सेज्जाइ लुट्टदि विसप्पदि दिङ्मुहेसुं ।
वोल्लम्मि वट्टदि पअट्टदि कव्ववधे
झाणे ण तुट्टदि चिरं तरुणी तरट्टी ॥ ४ ॥

अवि अ,—

जे तीअ तिक्खचलचक्खुतिहायदिट्ठा
ते कामचंदमहुपंचममारणिज्जा ।
जेसुं पुणो णिवडिआ सअला वि दिट्ठी
वट्टन्ति ते तिलजलंजलिदाणजोग्गा ॥ ५ ॥

(सम्मरणमिव ।) अवि अ,—

अवरम्मि भिंगसरणी णअणाण तीए
मज्झे पुणो वढिददुद्धनरंगमाला ।

चित्तं प्रस्फुटति न क्षीयते सा गुणेषु
शय्यायां लुठति विसर्पति दिङ्मुखेषु ।
वचने वर्तते प्रवर्तते काव्यबन्धे
ध्याने न त्रुट्यति चिरं तरुणी चलाक्षी ॥

अपि च,—

ये तया सौष्ठवचलचक्षुस्त्रिभागदृष्टा-
स्ते कामचन्द्रमधुपञ्चममार्गणीया ।
येषु पुनर्निपतिता सकलापि दृष्टि-
र्वर्तन्ते ते तिलजलाञ्जलिदानयोग्याः ॥

मधुरमन्त । रगतिरक्षणम् ।

अपि च,—

अग्रे भृङ्गसरस्तिनयनयोस्तस्या
मध्ये पुनः कठिनदुग्धतरङ्गमाला ।

पच्छा अ से सरदि तंसणिरिक्खदेसुं
आअण्णमंडलिदचावहरो अणंगो ॥ ६ ॥

(विचिन्त्य ।) चिराअदि पिअवअस्सो ।

(प्रविश्य विदूषको विचक्षणा च परिक्रामतः ।)

विदूषकः—अइ विअक्खणे ! सव्वं सच्चं एदं ?

विचक्षणा—सव्वं सच्चअरं ।

विदूषकः—णाहं पत्तिज्जामि, जंदो परिहाससीला खु तुवं ।

विचक्षणा—अज्ज ! मा एवं भण । अण्णो वक्करकालो, अण्णो कज्जविआरकालो ।

पश्चाच्च तस्याः सरसि तिर्यङ्निरीक्षितेषु
आकर्णमण्डलितचापधरोऽनङ्गः ॥

तद्वक्त्रनिरीक्षणादनु मदनकृतविमनस्कतावश्यं भवतीति भावः । अयं च कविनिबद्धवक्तृप्रौढोक्तिसिद्धो ध्वनिः ।

चिरयति प्रियवयस्यः ।

विदूषकः—
अयि विचक्षणे ! सर्वं सत्यमिदम् ?

विचक्षणा—
सर्वं सत्यतरम् ।

विदूषकः—
नाहं प्रत्येमि, यतः परिहासशीला खलु त्वम् ।
कदाचिदयमपि परिहास एव भवेदिति भावः ।

विचक्षणा—
आर्य ! मैवं भण । अन्यो वर्करकालः, अन्यः कार्यविचारकालः ।
तथा च नेदं सर्वमत्यमिति भावः ।

---

1 'मण्डलिद' इति टीकापाठः । 2 वर्करकालः=सोत्कण्ठभावगम्मयः ।

विदूषकः—(पुरोऽवलोक्य।) एसो पिअवअस्सो हंसो विअ विमुक्कमाणसो, करी विअ मअक्खामो, मुणालदंडो विअ घणघम्ममिलाणो, दिणदिण्णदीवो विअ विअलिअच्छाओ, पभादपुण्णिमाचंदो विअ पंडुरपरिक्खीणो चिट्ठदि।

उभौ—(परिक्रम्य।) जअदु जअदु महाराओ।

राजा—वअस्स! कहं पुणो वि विअक्खणाए मिलिदो सि?

विदूषकः—अज्ज विअक्खणा मए सह संधिं काडुं आअदा। किदसंधीए एदाए सह मंतअंतस्स एत्तिआ वेला लग्गा।

राजा—संधिकरणस्स किं फलं?

विदूषकः—

एष प्रियवयस्यो हंस इव विमुक्तमानसः, करीव मदशामः, मृणालदण्ड इव घनघर्मम्लानः, दिनदीप इव विगलितच्छायः, प्रभातपूर्णिमाचन्द्र इव पाण्डुरपरिक्षीणश्चिष्ठति।

विमुक्तमानस उद्विग्नमनाः। हंसपक्षे-विमुक्तं स्वच्छं मानसं सरो येनेत्यर्थः। हंसोपमानेन पाण्डुरतातिशयोऽस्य द्योत्यते। पाण्डुरश्च परिक्षीणश्चेत्यर्थः।

उभौ—

जयतु जयतु महाराजः।

राजा—

वयस्य! कथं पुनरपि विचक्षणया मिश्रितोऽसि?

विदूषकः—

अद्य विचक्षणा मया सह संधिं कर्तुमागता। कृतसंधित्वेतया सह मन्त्रयमाणस्यैतावती वेला लग्ना।

राजा—

संधिकरणस्य किं फलम्?

विदूषकः—एसा अहिमदजणपेसिदलेहहत्था णं विअक्खणा आगदा ।

राजा—(गन्धं सूचयित्वा ।) केदईकुसुमगंधो विअ आआदि ।

विचक्षणा—केदईदललेहो एव्व एसो मह हत्थे ।

राजा—भद्दसमए किं केदईकुसुमं ?

विचक्षणा—भइरवाणंददिण्णमंतप्पहावेण देवीभवणुज्जाणे केदईल्हीए एक्को दाव पसवो दंसिदो । तस्स दोहि दलसंपुडेहिं अज्ज हिंदोलअप्पभंजणीए चउत्थीए हरवल्लहाए देवीए देवी अच्चिदा । अण्णं च दलसंपुडजुअलं पुण कणिट्ठभइणिआए कप्पूरमंजरीए पसादीकिदं । तीए वि एक्केण दलसंपुडेण भअवदी गोरी ज्जेव अच्चिदा । अण्णं च,—

विदूषकः—
एषाऽभिमतजनप्रेषितलेखहस्ता ननु विचक्षणा आगता ।
इदमेव संधिफलमित्याशयः ।

राजा—
केतकीकुसुमगन्ध इवायाति ।

विचक्षणा—
केतकीदललेख एवैष मम हस्ते ।
तस्यैव गन्ध इत्याशयः ।

राजा—
भद्रसमये किं केतकीकुसुमम् ?

विचक्षणा—
भैरवानन्ददत्तमन्त्रप्रभावेण देवीभवनोद्याने केतकीलतैयकस्तावत्प्रसवो दर्शितः । तस्य दलसंपुटैरद्य हिन्दोलप्रभञ्जन्यां चतुर्थ्यां हरवल्लभया देव्या देवी अर्चिता । अन्यच्च दलसंपुटयुगलं पुनः कनिष्ठभगिन्यै कर्पूरमञ्जर्यै प्रसादीकृतम् । तयाप्येकेन दलसंपुटेन भगवती गौर्येवार्चिता । अन्यच्च,—

केदईकुसुमपत्तसंपुडं पाहुडं तुअ सहीअ पेसिदं ।
एणणाहिमसिवण्णसोहिणा तं सिलोअजुअलेण लंछिदं ॥ ७ ॥

(इति लेखमर्पयति ।)

राजा—(गृहीत्वा वाचयति ।)

हंसिं कुंकुमपंकपिंजरतणुं काऊण जं वंचिदो
तब्भत्ता किल चक्कवाअघरणी एस त्ति मण्णंतओ ।
एदं तं मह दुक्खिदं परिणदं दुक्खाण सिक्खावणं
पक्खत्तो वि ण जासि जेण विसअ दिट्ठीतिहाअस्स वि ॥ ८ ॥

(राजा तदेव द्विस्त्रिर्वाचयति ।)

विदूषकः—एदाइं ताइं मअणरसाअणाइं अक्खराइं ।

विचक्षणा—दुदिओ उण मए पिअसहीए अवत्थाणिवेदओ कदुअ सिलोओ लिहिदो एत्थ । तं वाचेदु महाराओ ।

केतकीकुसुमपत्रसंपुटं प्राभृतं मम सख्या प्रेषितम् ।
एणनाभिमषीवर्णशोभिना तच्छ्लोकयुगलेन लाञ्छितम् ॥

राजा—

हंसीं कुङ्कुमपङ्कपिञ्जरतनुं कृत्वा यद्वञ्चितः
तद्भर्ता किल चक्रवाकगृहिणीमेषेति मन्यमानः ।
एवं मन्मन दुष्कृतं परिणतं दुःखानां शिक्षकं
पक्षत्वोऽपि न यासि येन विषयं दृष्टिस्त्रिभागस्थापि ॥

विदूषकः—एतानि तानि मदनरसायनाक्षराणि ।

विचक्षणा—

द्वितीयः पुनर्मया प्रियसख्या अवस्थानिवेदकः कृत्वा श्लोको लिखितोऽत्र । तं वाचयतु महाराजः ।

राजा—(वाचयति ।)

सह दिवसणिसाहिं दीहरा सासदंडा
सह मणिवलएहिं वाहधारा गलंति ।
तुह सुहअ विओए तीअ उव्विविरीए[1]
सह अ तणुलदाए दुव्वला जीविदासा ॥ ९ ॥

विचक्षणा—इह जेव एदाए अवत्थाए मह महल्लबहिणिआए सुलक्खणाए ओलग्गा भविअ सिलोगो कदो, तं महाराओ सुणदु । (पठति ।)

णीसासा हारजट्ठीसरिसपसरणा चंदणुच्छोडकारी[2]
चंदो देहस्स दाहो सुमरणसरणा हाससोहा मुहम्मि ।
अंगाणं पंडुभावो दिअहससिकलाकोमलो किं च तीए
णिच्चं बाहप्पवाहा तुह सुहअ ! कदे होंति कुल्लाहि तुल्ला ॥ १० ॥[3]

राजा—

सह दिवसनिशाभ्यां दीर्घा श्वासदण्डा
सह मणिवलयैर्वाष्पधारा गलन्ति ।
तव सुभग ! वियोगे तस्या उद्वेगिन्या
सह च तनुतया दुर्बला जीविताशा ॥

'श्वासदण्डा' इत्यनेन नि श्वासप्राचुर्यं व्यज्यते । इयं च सहोक्ति । तल्लक्षणमुक्तं वृद्धैः—'सहभावकथनं सहोक्ति' इति ।

विचक्षणा—

इहैवैतस्या अवस्थाया मम ज्येष्ठभगिन्या सुलक्षणया आदेशकारिण्या भूत्वा श्लोकः कृतः, तं महाराजः शृणोतु ।

णीसासा इति—

नि श्वासा हारयष्टिसदृशप्रसरणाश्चन्दनं स्फोटकारी
चन्द्रो देहस्य दाहः स्मरणसरणी हासशोभा मुखे ।
अङ्गानां पाण्डुभावो दिवसशशिकलाकोमलः किं च तस्या
नित्यं बाष्पप्रवाहास्तव सुभग ! कृते भवन्ति कुल्याभिस्तुल्याः ॥

---

1 'उव्वेअगीए' इति टीकाकृत पाठः । 2 'चंदणुच्छोडकारी' इति टीकाकृत पाठः । 3 'सुमरणसरिसी' इति टीकाकृत पाठः ।

राजा—(निःश्वस्य) किं भण्णइ—कइत्तणेण तुह जेट्ठबहिणिआ खु एसा ?

विदूषकः—एसा विअक्खणा महीअलसरस्सई। एदाए उण जेट्ठबहिणिआ तिहुअणसरस्सई। ता एदाहिं समं पाडिसिद्धिं ण करिस्सं। किं पुण पिअवअस्सस्स पुरदो मअणावत्थं अत्तणो उचिदेहिं अक्खरेहिं णिवेदेमि।

राजा—पढ। एदं सुणीअदि।

विदूषकः—

परं जोण्हा उण्हा गरलसरिसो चंदणरसो
खरक्कारो हारो रअणिपवणा देहतवणा।

स्मरणसदृशी तदानव्यञ्जिकेत्यर्थः। दिवसशशिलक्ष्मसाम्येन निष्प्रभत्वमज्ञानामिव्यज्यते।

राजा—

किं भण्यते—कविरयं तव ज्येष्ठभगिनेयः सर्वज्ञः ?

विदूषकः—

एषा विचक्षणा महीतलसरस्वती। एतस्याः पुनर्ज्येष्ठभगिनिका त्रिभुवनसरस्वती। तदेताभ्यः सम्यं प्रतिस्पर्धां न करिष्यामि। किं पुनः प्रियवयस्यस्य पुरतो मदनावस्थामात्मन उचितैरक्षरैर्निवेदयामि।

मदनावस्थानिरूपनानन्तरं 'तस्मात्' इति शेषः।

राजा—

पठ। एतदपि श्रूयते।

विदूषकः—

मुणाली वाणाली जलइ अ जलद्दा तणुलदा
वरिट्ठा जं दिट्ठा कमलवअणा सा सुणअणा ॥ ११ ॥

राजा—वअस्स ! तुमं पि थोएण चंदणरसेण समालिहिज्जसि। ता कहेसु तग्गदं किं पि वुत्तंतं। अध अंतेउरे णइअ देवीए किं किदं तिस्सा ?

विदूषकः—विअक्खणे ! किं किदं ?

विचक्षणा—देव ! मंडिदा टिकिदा भूसिदा तोसिदा अ।

राजा—कधं विअ ?

विचक्षणा—

घणमुव्वट्टिदमंगं कुंकुमरसपंकपिंजरं तिस्सा।

मृणाली वाणाली ज्वलति च जलार्द्रा तनुलता
वरिष्ठा यद्दृष्टा कमलवदना सा सुनयना ॥

क्षते क्षार इवेत्यर्थः; तस्यात्यन्तदुःसहत्वात्। 'रजनिपवनाः' इत्यनेन तेषामतिशीतलत्वं व्यज्यम्, देहे तपना इवेत्यर्थः; अत्यन्तदाहकत्वात्। वाणालीवेत्यर्थः; अत्यन्तखेदप्रदत्वात्। अत्रोपमोत्प्रेक्षारूपकादयोऽर्थालंकाराः। चेत्येकलाटानुप्रासादयश्च शब्दालंकारा ऊह्याः। तादृशं चोक्तं प्राक्।

राजा—
वयस्य ! तत् त्वमपि स्तोकेन चन्दनरसेन समालभ्यसे। तत्कथय तद्गतं किमपि वृत्तान्तम्। अथान्तःपुरं नीत्वा देव्या किं कृतं तस्याः ?

विदूषकः—
विचक्षणे ! किं कृतम् ?

विचक्षणा—
देव ! मण्डिता तिलकिता भूषिता तोषिता च।

राजा—
कथमिव ?

विचक्षणा—

घनमुद्वर्तितमङ्गं कुङ्कुमरसपङ्कपिञ्जरं तस्याः।

राजा—

रोसाणिअ फुडं ता कंचणमअवालिआरूवं ॥ १२ ॥

विचक्षणा—

मरगअमंजीरजुअं चरणा से लंबिआ चअंसीहिं ।

राजा—

भमिअमहोमुहपंकअजुअलं ता भमरमालाए ॥ १३ ॥

विचक्षणा—

राअसुअपिच्छणीलं पट्टंसुअजुअलअ णिअत्था सा ।

राजा—

कअलीअ कंदली ता सरपवणपणोल्लिअदलग्गा ॥ १४ ॥

राजा—

उज्ज्वलीकृतं तत्काञ्चनमयवालिकारूपम् ॥

'रोसाणिअ' इत्युज्ज्वलार्थे देशी । काञ्चनमयेत्यस्य प्रकृतिपीतमेव तद्रूपमिदानीं पीततरेण कुङ्कुमेनोद्वर्तनाच्छोभातिशयो जात इति भावः ।

विचक्षणा—

मरकतमञ्जीरयुगं चरणावस्था लम्बितौ यत्स्वामिः ।

राजा—

भ्रमितमयो मुखपङ्कजयुगलं तद्भ्रमरमालया ॥

अस्याधरणौ मरकतमञ्जीरयुग मरकतनूपुरयुगलं लम्बितौ श्रापितौ । तत्स्थौ कृताविति यावत् । भ्रमितेत्यादिना तच्चरणयुगलस्य पङ्कजयुगेन मञ्जीरयुगलस्य च भ्रमरमालया साम्यं प्रकटितम् ।

विचक्षणा—

राजसुकपिच्छनीलं पट्टांशुकयुगलक निवसिता सा ।

राजा—

कदलीकन्दली तत्सरपवनविलोलितदलाग्रा ॥

एतावत् तद्वोः कदलीकन्दस्य गमनस्य च तद्दलानां साम्यमुक्तम् ।

---

1 'विलोलिअ' इति टीकाकृत्सम्मतः पाठः । 2 अभीरमाकाम्य कालिदासीयमेघदूते (उ. ११) 'संभोगान्ते मम समुचितो हस्तसंवाहनानां यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम्' इत्यत्र विमर्शोऽयम् ।

विचक्षणा—

तीए णिअंबफलए णिवेसिआ पोमराअमणिकंची ।

राजा—

कंचणसेलसिलाए घरिही ता कारिओ णट्टं ॥ १५ ॥

विचक्षणा—

दिण्णा वलआवलीउ करकमलपओट्ठणालजुअलम्मि ।

राजा—

ता भण किं ण रेहइ विपरीअं मअणतोणीरं ॥ १६ ॥

विचक्षणा—

कंठम्मि तीअ ठविदो छम्मासिअमोत्तिआण वरहारो ।

राजा—

सेवइ ता पंतीहिं मुहचंदं तारआणिअरो ॥ १७ ॥

विचक्षणा—

तस्या नितम्बफलके निवेशिता पद्मरागमणिकाञ्ची ।

राजा—

काञ्चनशैलशिलायां तद्दर्ही कारितो नृत्यम् ॥

अनेन नितम्बस्य पीवरत्वेन काञ्चनशिलासाम्यं काञ्च्याश्च बर्हिसाम्यं प्रकाशितम् ।

विचक्षणा—

दत्ता वलयावलयः करकमलप्रकोष्ठनालयुगे ।

राजा—

तद्भग किं न शोभने विपरीतं मदनतूणीरम् ॥

विचक्षणा—

कण्ठे तस्याः स्थापितः पाण्मासिकमौक्तिकानां वरहारः ।

राजा—

सेवते तत्पङ्क्तिभिर्मुखचन्द्रं तारकानिकरः ॥

विचक्षणा—

उहपसु वि सवणेसुं णिवेसिअं रअणकुंडलजुअं से।

राजा—

ता चअणमम्महरहो दोहि वि चक्केहिं चंकमिदो ॥ १८ ॥

विचक्षणा—

जअंजणजणिद्दपसाहणाइं जादाइं तीए कआइं णअणाइं।

राजा—

ता उप्पीउ णअकुवलअसिलिम्मुहे पंचवाणस्स ॥ १९ ॥

विचक्षणा—

कुडिलालआण माला ललाउलोलग्गसंगिणी रइआ।

तारकानिकर· पङ्क्तिभि श्रेणीभिः कृत्वा मुखचन्द्रं सेवते तदित्यन्वयः । तथा च मुक्ताहारस्य तारकानिकरोपमा व्यज्यते ।

विचक्षणा—

उभयोरपि श्रवणयोर्निवेशितं रत्नकुण्डलयुगं तस्याः ।

राजा—

तद्वदनमन्मथरथो द्वाभ्यामिव चक्राभ्यां चङ्क्रमितः ॥

चङ्क्रमितो युक्त इत्यर्थः । अत्र कुण्डलयुगलस्य चक्रद्वयसाम्यं द्योत्यते ।

विचक्षणा—

जात्याञ्जननिर्मितप्रसाधने जाते तस्याः (दृशे) नयने ।

राजा—

राजा—

ता ससिबिंबस्सोवरि वट्टइ मज्झाउ[1] सारंगो ॥ २० ॥

विचक्षणा—

घणसारतारणअणाइ गूढकुसुमुच्चओ चिहुरभारो ।

राजा—

ससिराहुमल्लजुज्झं व दंसिदमेणणअणाए ॥ २१ ॥

विचक्षणा—

इअ देवीअ जहिच्छं पसाहणेहिं पसाहिआ कुमरी ।

राजा—

ता केलिकाणणमही विहूसिआ सुरहिलच्छीए ॥ २२ ॥

राजा—

तच्छशिबिम्बस्योपरि वर्तते मध्ये कृष्ण सारङ्गः ॥

शशिबिम्बसाम्यं वदनस्य कृष्णमृगसाम्यं चालकमालानामनेनोक्तम् ।

विचक्षणा—

घनसारतारनयनाया गूढकुसुमोच्चयश्चिकुरभारः ।

राजा—

शशिराहुमल्लयुद्धमिव दर्शितमेणनयनायाम् ॥

कुसुमनिचयस्य चन्द्रशाबल्यम्, चिकुरकलापस्य च राहुसाम्यमभिव्यञ्जितम् । 'मल्लयुद्धम्' इत्यनेन तयोः समबलत्वं तेन च तुल्यशोभत्वं ध्वन्यते ।

विचक्षणा—

इति देव्या यथेच्छं प्रसाधनैः प्रसाधिता कुमारी ।

राजा—

तत्केलिकाननमही विभूषिता सुरभिलक्ष्म्या ॥

केलीनां क्रीडानां काननं समूहस्तत्संबन्धिनी मही उत्पत्तिस्थानम् । तत्साम्यं कुमार्या वसन्तलक्ष्मीसाम्यं देव्या अनेन प्रकटितम् ।

---

1 'किमत्रमारंग' इति टीकापाठः ।

विदूषकः—देव ! इदं परमत्थ विण्णवीअदि,—

जिस्सा दिट्ठी सरलधवला कज्जलं तीअ जोग्गं
जा विन्थिण्णत्थणकलसिणी रेहइ तीअ हारो ।
चक्काआरे रमणफलए को वि कंचीमरट्ठो
जिस्सा तिस्सा पुण वि भणिमो भूसणं दूसणं च ॥ २३ ॥

राजा—(पुनर्नामनुमृश्य ।)

तिवलिपरिक्खिणाहीराहुमूलेसु लग्गं
थणकलसणिभग्गाडम्बरेसूसवंत ।

विदूषकः—

देव ! एतत्परमार्थं विज्ञाप्यते,—

यस्या दृष्टिस्सरलधवला कज्जलं तस्या योग्यं
या विस्तीर्णस्तनकलशिनी शोभते तस्या हारः ।
चक्राकारे रमणफलके कोऽपि काञ्चीकलापो
यस्यास्तस्या पुनरपि भणामो भूषणं दूषणं च ॥

यद्येतादृशं दृष्टादि कान्तायामिष्टति तदा भूषणाभावेऽपि शोभाविशेष स्वाभाविकोऽवभासत एवेति नातिप्रयोजनवत्त्वाद्भूषणमपि दूषणमिव भवतीति दूषणभूषणयो प्रयोजनाभावत्वेन साम्यम् । अथवा दूषणं भूषणमिव भवति । अयमर्थः—एतादृशदृष्टादिमत्ता असमीचीनवस्तुसंबन्धोऽपि भूषणतुल्य एव भवति, शोभाहानिरत्वाभावात् । अत एव कविकुलगुरुणा भगवता कालिदासेनापि वर्णितम्—'विकृतिरपि मनुष्यानां सहते नाकृतीनाम्' (शाकु० १।२०) इति ।

राजा—

त्रिवलिपरिक्षिप्तनाभीराहुमूलेषु लग्नं
स्तनकलशनिभाडम्बरेषूत्सवन्त ।

---

1 विशेषणं इदं भाव्यमिति पाठं कचित्पठन्ति । 2 'तरलधवला' इति क्वचित् पुस्तके ।

जलणिविडमिमीए लेण्हअं ण्हाणपोत्तं
पिसुणदि तणुलच्छीलंगिमं चंगिमं च ॥ २४ ॥

विदूषकः—(सक्रोधमिव ।) भो ! मए सव्वालंकारसहिदा वण्णिदा । तुमं पुण जलविलुत्तपसाहणं जेव सुमरसि । ता किं ण सुदं देवेण ?

णिसग्गचंगस्स वि माणुसस्स सोहा समुम्मीलदि भूसणेहिं ।
मणीणं जच्चाणं वि कंचणेण विभूसणे लब्भदि का वि लच्छी ॥ २५ ॥

राजा—

मुद्धाण णाम हिअआइँ हरंति हंत
णेवच्छकप्पणगुणेण णिअंबिणीओ ।
छेआ पुणो पअइचंगिमभावणिज्जा
दक्खारसो ण महुरज्जदि सक्कराए ॥ २६ ॥

जलनिविडमेतस्याः श्लक्ष्णं स्नानवस्त्रं
पिशुनयति तनुयष्टितारुण्यं चङ्गिमानं च ॥

'लंगिमं' तारुण्यमिति देशी ।

विदूषकः—

भोः ! मया सर्वालंकारसहिता वर्णिता । त्वं पुनर्जलविलुप्तप्रसाधनामेव स्मरसि । तत्किं न श्रुतं देवेन ?

निसर्गचङ्गस्यापि मानुषस्य शोभा समुन्मीलति भूषणैः ।
मणीनां जात्यानामपि काञ्चनेन विभूषणे सज्जति कापि लक्ष्मीः ॥

राजा—

मुग्धानां नाम हृदयानि हरन्ति हन्त
नेपथ्यकल्पनगुणेन नितम्बिन्यः ।
ये पुनः प्रकृतिचङ्गिमभावनीया
द्राक्षारसो न मधुरीयति शर्करया ॥

येषां हृदयानि नेपथ्यकल्पनगुणेन नितम्बिन्यो हरन्ति ते मुग्धा अविदग्धा एवेत्याशयः । ये पुनः प्रकृत्या स्वभावेन चङ्गिमा सौन्दर्यं यासां नितम्बिनीनां सा

---

1 'निसग्ग' इति दीपानुगः पाठः । 2 'लब्भदि' इति दीपानुगः पाठः ।

विचक्षणा—जधा देवेण आदिट्ठं,—

थोराणं थणआण कणअकलिआलंघीण अच्छीण वा
भूचंदस्स मुहस्स कंतिसरिआसोत्तस्स गत्तस्स अ।
को णेवच्छकलाअ कीरदि गुणो जं तं पि सव्वं पिअं
सुंत्तव्वं सुण तत्थ कारणमिमं रूढीअ का खंडणा ॥ २७ ॥

राजा—(विदूषकमुद्दिश्य।) सुप्पंजल कविंजल! एस सिक्खावीअसि।

किं कज्जं कित्तिमेणं विरअणविहिणा सो णडीणं विडंबो
तं चंगं जं णिसग्गं जणमणहरणं तेण सीमंतिणीओ।

भावयन्ति त एव विदग्धा इति भाव.। द्राक्षारससाम्यं स्वभावसौन्दर्यस्य, शर्करा-साम्यं भूषणानामुपदर्शितम्।

विचक्षणा—

यथा देवेनादिष्टम्,—

स्थूलानां स्तनानां कर्णकलिकालङ्घिनोरक्ष्णोर्वा
भूचन्द्रस्य मुखस्य कान्तिसरित्स्रोतसो गात्रस्य च।
को नेपथ्यकलाभिः क्रियते गुणो यत्तदपि सर्वं प्रियं
संयुक्तं शृणु तत्र कारणमिदं रूढेः का खण्डना॥

रूढियोगमपहरतीति यथा रूढेर्योगापेक्षया प्राबल्यं तथा सहजसौन्दर्यस्यापीति भावः।

राजा—

सुप्राञ्जल कपिञ्जल! एष शिक्ष्यसे।

सुप्राञ्जलः सुसरल.। तथा च चातुर्यलेशोऽपि तव नास्तीति भावः।

किं कार्यं कृत्रिमेण विरचनविधिना स नटीनां विडम्ब-
स्तच्चारु यन्निसर्गं जनमनोहरणं तेन सीमन्तिन्यः।

---

1 अत्र 'भूचंदस्स मुहस्स कंति' इति टीकानुसृतः पाठः। 2 अत्र 'संजुत्तं' इति टीकानुसृतः पाठः। 3 अत्र 'णिअं' इति टीकानुसृतपाठः।

जस्सिं सव्वंगसंगो सअलगुणगणो सो अदंभो अलंभो
तस्सिं णेच्छंति काले परमसुहअरे किं पि णेवच्छलच्छिं २८॥

विचक्षणा—देव ! इदं विण्णवीअदि—ण केवलं देवीणिअमेण तिस्सा अणुगद म्हि। तारामेत्तीए वि सहित्तणं उवगदा कप्पूरमंजरीए। तेण तक्कज्जसज्जा अहं पुण ओलग्गाविआ भविस्सं।

यस्मिन्सर्वाङ्गसङ्गः सकलगुणगण सोऽदम्भोऽलभ्य-
स्तस्मिन्नेच्छन्ति काले परमसुखकरे कामपि नेपथ्यलक्ष्मीम् ॥

कृत्रिमभूषाभिर्नटीनामेवापाततः सौन्दर्यमुल्लसति, न पुनः सीमन्तिनीनामित्यर्थः। यच्चाङ्गं समीचीन तदेव निजाङ्गं स्वस्याङ्गमाह्लादकमित्याह्लादकत्वविशिष्टाङ्गेऽङ्गमात्रवाचकाङ्गपदवाच्यसङ्क्रमादयमर्थान्तरसङ्क्रमितवाच्यो लक्षणामूलो ध्वनि । तेन स्वाभाविकाङ्गसौन्दर्येणैव सीमन्तिन्य कुलाङ्गना जनमनोहरणं भवन्तीत्यर्थ । यद्यपि 'जनमनोहरणम्' इति भिन्नलिङ्गवचनं पदं न 'सीमन्तिन्य' इति पदस्य विशेषणत्वमर्हति, तथापि वस्तुपदाध्याहारेण योज्यम् । तस्य चाजहल्लिङ्गत्वान्न दोष इति ध्येयम्। अथवा जनमनोहरणमिति काक्वाक्षिगोलकन्यायेनोभयत्र सबध्यते। तथा च यन्निजाङ्गं स्वाभाविकाङ्गं च तदेव जनमनोहरणं भवतीत्यर्थ । यदा पूर्वत्रैव सबध्यते तदा च तेन स्वाभाविकाङ्गत्वेनैव सीमन्तिन्यो भवन्ति। तासामुत्तमसीमन्तिनीत्वं भवतीत्यर्थः । तथा च 'सीमन्तिनी'पदवाच्यस्यैवोत्तमत्वविशिष्टे तस्मिन्सङ्क्रमादव्याप्यर्थान्तरसङ्क्रमितवाच्यो ध्वनि । यस्मिन्काले सकल सपूर्णो गुणाना गण समूहः सर्वाङ्गसङ्ग सर्वेष्वङ्गेषु सङ्गो यस्य तादृशः, अदम्भः न विद्यते दम्भो यत्रासावदम्भः स्वाभाविकः, अलभ्योऽप्राप्योऽस्ति, अथ च तस्मिन्काले सुखकरे कामपि नेपथ्यलक्ष्मीं नेच्छन्ति। विदग्धा इति शेष । निजाङ्गमित्येकवचनेनैकमपि स्वाभाविकसुन्दरमङ्गं लोकहृदयहरणसमर्थं किमुत सर्वाङ्गाणीति ध्वन्यते। अत्र च नटीसीमन्तिन्योर्व्यतिरेकालंकारो व्याप्यः । च्छेकवृत्त्यनुप्रासालंकारावप्यत्र बोध्यौ। तल्लक्षणं प्रागेवोक्तम्।

विचक्षणा—

देव! एतद्विज्ञाप्यते—न केवलं देव्या नियोगेन तस्या अनुगताऽस्मि। तारामैत्र्यापि सखीत्वं प्राप्ता कर्पूरमञ्जर्याः। तेन तत्कार्ये सज्जाऽहं पुनः सेवकीभूय निवेदयिष्यामि।

---

1 'देवीए णिओएण' इति टीकानुसारी पाठः। 2 'पत्ता कप्पूरमञ्जरीए' इति टीकानुसृतपाठः। 3 'भविस्स णिवेदइस्सं' इति टीकापाठः।

तिस्सा तावपरिक्खणाअ णिहिदो हत्थो थणुत्थंगदो
दाहुट्ठामरिदो सहीहि बहुसो हेलाअ कड्ढिज्जदि ।
किं तेणावि इमं णिसामअ गिरं संतोसणिं तासणिं
हत्थच्छत्तणिवारिदिंदुकिरणा बोलेइ सा जामिणीं ॥ २९ ॥

कज्जसेसं कविंजलो णिवेदइस्सदि । तं च देवेण तधा कादव्वं । (इति परिक्रम्य निष्क्रान्ता ।)

राजा—वअस्स ! किं पुण तं कज्जसेसं ?

विदूषकः—अज्ज हिंदोलअचउत्थी । तहि गोरिं कदुअ देवीए

तस्यास्तावत्परीक्षणाय निहितो हस्तः स्तनोरन्तरे
दाहोष्णामरितः सखीभिर्बहुशो हेलया कृष्यते ।
किं तेनापीमां निशामय गिरं संतोषिणीं त्रासिनीं
हस्तच्छत्रनिवारितेन्दुकिरणानिग्राह्यति सा यामिनीम् ॥

हेलयाऽवज्ञया कृष्यते तयेति शेषः । स्वसबन्धिविरहार्तिभाजनत्वेन । त्रासिनीमिति चैतादृशदुःसहवियोगपीडितापि सहस्रेनैवेन्दुकराधिवारयतीति तेषां हस्तस्पर्शोऽपनीयमपि मरणादिकं सभाव्यत इति त्रासकरत्वम् । अथवा बलात्कारेण यथेन्दुकिरणस्पर्शो भवति तथा विधत्त इत्यतिदुष्करमिति त्रासकरणं ज्ञेयम् । यद्वा हस्तच्छत्रेत्यनेन हस्तस्य सपूर्णशरीरे चन्द्रकरस्पर्शनिवारकत्वासंभवाद्धस्तावच्छन्नप्रदेशे शशिकरस्पर्शावश्यभावस्तत्कारण वेदितव्यः । अनेन विधानं नाम मुखसध्यङ्गमुक्तम् । तल्लक्षणं दशरूपके (१।२८)—'विधानं मुखदं सदृत्तं' इति । अत्रापि रूपकश्लेषानुप्रासादयः शब्दार्थालंकारा ऊह्याः । लक्षणं तूह्यम् ।

कार्यशेषं कपिञ्जलो निवेदयिष्यति । तच्च देवेन तथा कर्तव्यम् ।

कपिञ्जलो विदूषकः ।

राजा—
वयस्य ! किं पुनस्तत्कार्यशेषम् ?

विदूषकः—
अद्य हिन्दोलनचतुर्थी । तत्र गौरीं कृत्वा देव्या कर्पूरमञ्जरी हिन्दोलके आरोह-

कप्पूरमंजरी हिंदोलए आरोइदव्वा । ता मरगअपुंजट्ठिदेण जेव देवेण कप्पूरमंजरी हिंदोलअंती दट्ठव्वा । एदं तं कज्जसेसं ।

राजा—(विचिन्त्य ।) ता अदिणिउणा वि छलिदा देवी ।

विदूषकः—पाइदा जुण्णमज्जारिआ दुद्धं त्ति तक्कं ।

राजा—वअस्स ! को अण्णो तुम्हाहिंतो मे कज्जसज्जो ? को अण्णो चंदाहिंतो समुद्दवड्ढणणिट्ठो ?

(इति परिक्रम्य कदलीगृहप्रवेशं नाटयतः ।)

विदूषकः—इअं उत्तुंगा फलिहमणिवेदिआ । ता इह उवविसदु पिअवअस्सो ।

(राजा तथा करोति ।)

विदूषकः—(हस्तमुद्यम्य) भो दीसदु पुण्णिमाचंदो ।

राजा—(विलोक्य ।) अए ! दोलारूढाए मह वल्लहाए वअणं पुण्णिमाचंदो त्ति णिद्दिसदि । (समन्तादवलोक्य ।)

यितव्या । तन्मरकतपुञ्जस्थितेनेव देवेन कर्पूरमञ्जरी हिन्दोल्यंती द्रष्टव्या । एतत्तत्कार्यशेषम् ।

राजा—सदनिपुणापि छलिता देवी ।

विदूषकः—पायिता जीर्णमार्जारिका दुग्धमिति तक्रम् ।

मरकतपुञ्जः प्रासादविशेषः ।

राजा—कोऽन्यो युष्मत्तो मम कार्यसज्जः ? कोऽन्यश्चन्द्रतः समुद्रवर्धननिपुणः ?

विदूषकः—

इयमुत्तुङ्गा स्फटिकमणिवेदिका । तदिहोपविशतु प्रियवयस्यः ।

विदूषकः—

भोः ! दृश्यतां पूर्णिमाचन्द्रः ।

राजा—

अये ! दोलारूढाया मम वल्लभाया वदनं पूर्णिमाचन्द्र इति निर्दिशति ।

विच्छायंतो णअररमणीमंडलस्साणणाइं
विच्छालेंतो गयणकुहरं कंतिजोण्हाजलेण ।
पेच्छंतीणं हिअअणिहिदं णिद्दलंतो अ दप्पं
दोलालीलासरलतरलो दीसए से मुहेंदू ॥ ३० ॥

अवि अ,—

उच्चेहिं गोउरेहिं धुअधवलवडाडंबरिल्लावलीहिं
घंटाहिं विंदुरिल्लासुरतरणिविमाणाणुसारं लहंती ।
पाआरं लंघअंती कुणदि रअवसा उण्णमंती णमंती
एंती जंती अ दोला जणमणहरणी चुट्टणुच्चुट्टणेहिं ॥ ३१ ॥

विच्छाययन्नगररमणीमण्डलस्याननानि
प्रक्षालयन् गगनकुहरं कान्तिज्योत्स्नाजलेन ।
प्रेक्षमाणानां हृदयनिहितं निर्दलयंश्च दर्पं
दोलालीलासरलतरलो दृश्यतेऽस्या मुखेन्दुः ॥

विच्छाययन् विगतच्छायानि कुर्वन्, म्लानीकुर्वन्नित्यर्थः । कान्तिरेव ज्योत्स्ना चन्द्रिका तस्या जलं पाथश्चयं तेन गगनं खमेव कुहरं क्षालयन्प्रकाशयन्। जलेन क्षालनमुचितमेवेति भाव । 'सरलतरल' इत्यान्दोलनवशायातायातमाचरन्नित्यर्थः । अत्र रूपकश्लेषावृत्त्यनुप्रासरूपा. शब्दार्थालंकारा विभाव्या. । स्पष्टमन्यत् ।

अपि च,—

उच्चेषु गोपुरेषु धवलध्वजपटाडम्बरबद्धावलीषु
घण्टाभिर्विंद्राणसुरतरणिविमानानुसारं वहन्ती ।
प्राकारं लङ्घयन्ती करोति रयवशादुच्चमन्ती नमन्ती
यान्ती याती च दोला जनमनोहरणं कर्षणोत्कर्षणैः ॥

धवलध्वजपटाडम्बराणां बद्धा आवल्यो येषु तादृशेषु गोपुरेषु पुरद्वारेषु घण्टाभिरलङ्कृतं विद्राणं येन तच्चैत्रसुरतरणिविमानं देवाङ्गनाधिमानं तदनुरूपं तत्तुल्यं प्राकारं वहन्ती विभाति । कर्षणोत्कर्षणैः रयवशादुच्चमन्ती । सरलतम-

---

1 'पच्छाएंतो' इति टीकानुगतः पाठः । 2 'धवलध्वजपटाडम्बरि" इति टीकानुगतः पाठः । 3 "हरणं कड्ढणुक्कड्ढणेहिं" इति टीकानुगतपाठः ।

अवि अ,—

रणंतमणिणेउरं झणझणंतहारच्छडं
कलक्कणिदकिंकिणीमुहरमेहलाडंबरं ।
विलोलवलआवलीजणिदमंजुसिंजारवं
ण कस्स मणमोहणं ससिमुहीअ हिंदोलणं ॥ ३२ ॥

विदूषकः—भो ! सुत्तआरो तुवं । अहं पुण वित्तिआरो भविअ वित्थरेण वण्णेमि ।

नादुन्नमन्ती ऊर्ध्वं गच्छन्ती नमन्ती पुनरधो यान्ती आयान्ती यान्ती चेयं दोला कस्य कामिनो मनोहरणं न करोति ? अपि तु सर्वस्य विधत्त इति काक्वर्थः । इयं च दोलास्वरूपवर्णनाजातिः । तल्लक्षणं काव्यादर्शे दण्डिनोक्तम् (२।८)—'नानावस्थं पदार्थानां रूपं साक्षाद्विदृण्वती । स्वभावोक्तिश्च जातिर्थेलाद्या साऽलंकृतिर्यथा ॥' इति । उपमानुप्रासादयोऽन्येऽप्यलंकारा ज्ञेयाः ।

अपि च,—

रणन्मणिनूपुरं झणाझणायमानहारच्छटं
कलक्वणितकिङ्किणीमुखरमेखलाडम्बरम् ।
विलोलवलयावलीजनितमञ्जुशिञ्जारवं
न कस्य मनोमोहन शशिमुख्या हिन्दोलनम् ॥

शशिमुख्या हिन्दोलनं कस्य कामिनो मनोमोहनं न, मनो मानसं मोहयति तदेतादृशं न ? अपि तु सर्वस्यापीति काकु । किभूतम् ? रणन्तो मणयो ययोस्ते रणन्मणी, रणन्मणी नूपुरे यत्र तत् । झणझणायमाना हारच्छटा यत्र । इत्यादीनामान्दोलनविशेषणत्वम् । अथवा क्रियाविशेषणानि । यद्वा,—शशिमुख्या रणन्नूपुरादिकस्य मनोमोहनं नेति प्रत्येकमेव विधिः । तदा दोलनाशे प्रत्यक्षमन्यादृशं स्मरणम् । 'रण शब्दे' । 'झणझणायमानं' इत्यादि शब्दानुरणनम् । अत्राप्यनुप्रासजातायाः शब्दार्थालंकारा ज्ञेयाः ।

विदूषकः—

भोः ! सूत्रकारत्वम् । अहं पुनर्वृत्तिकारो भूत्वा विस्तरेण वर्णयामि ।

सूचनादि सूत्रत्वं भवतीति भावः । अत एव तल्लक्षणमुक्तमभियुक्तैः—'स्वल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम् । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥' इति ।

उवरिट्ठिअथणप्पब्भारचंपिअं चरणपंकआण जुअं ।
पुणरुत्त घ्व मअणं रणंतमणिणेउररवेण ॥ ३३ ॥
हिंदोलणलीलाललणलंपडं रह चक्कवद्धलं रमणं ।
किलकिलइ घ्व सहरिसं कच्चीमणिकिंकिणिरवेण ॥ ३४ ॥
तारंदोलणहेलामरंतसरिअच्छलेण से हारो ।
विक्किरइ घ्व कुसुमाउहणरवइणो कित्तिवल्लीओ ॥ ३५ ॥
संमुहपवणपणोल्लिअवरिट्ठदरदाविआइं अंगाइं ।
एक्कारिऊण मअणं पासम्मि णिवेसअंति घ्व ॥ ३६ ॥
ताडंकजुअं गंडेसु वहलघुसिणेसु घडणलीलाहिं ।
देइ व दोलंदोलणरेहाओ गणणकोट्टेण ॥ ३७ ॥

उपरिस्थितस्तनप्राग्भारपीडितं चरणपङ्कजयुगं तस्याः ।
पूत्कारयतीव मदनं रणन्मणिनूपुररवेण ॥

एतन्मणिनूपुररवश्रवणसमकालमेव कामिनां मदनकृता मनोविप्लुतता भवतीति भावः । अत्रापि ज्ञाप्युत्प्रेक्षे अलङ्कारौ ।

हिन्दोलनलीलाललनलम्पटं चक्रवर्तुलं रमणम् ।
किलकिलायतीव सहर्षं काञ्चीमणिकिङ्किणिरवेण ॥

अत्रापि किलकिलायतीति शब्दानुकरणम् । रमणं जघनम् ।

दोलान्दोलनलीलासरसरिताच्छलेनास्या हारः ।
विस्तारयतीव कुसुमायुधनरपतेः कीर्तिवल्लीः ॥

सरिता मुक्तापङ्क्तिः । अत्रोत्प्रेक्षालङ्कारः ।

संमुखपवनप्रेरितोपरिस्थदरदर्शितान्यङ्गानि ।
आकार्य मदनं पार्श्वे निवेशयन्तीव ॥

अत्रापि स एवालङ्कारः ।

ताटङ्कयुगं गण्डयोर्बहलघुसृणघोटनलीलाभिः ।
ददातीव दोलान्दोलनरेखा गणनकोष्ठेन ॥

अत्राप्युत्प्रेक्षालङ्कारः ।

---

1 "दोलान्दोलन" इति क्षीरस्वामी । 2 "दोलन्दोलन" इति क्षीरस्वामी ।

णअणाइँ पसइसरिसाइँ झत्ति फुल्लाइँ कोदुहल्लेण ।
अप्पेंति व कुवलअसिलिम्मुहे पंचवाणस्स ॥ ३८ ॥
दोलारअविच्छेओ कहं पि मा होहि इत्ति पडइ व्व ।
पिट्ठिम्मि वेणिदंडो मम्महचम्मट्ठिआअंतो ॥ ३९ ॥
इअ एआइ विलासुज्जलाइँ दोलापवंचचरिआइं ।
कस्स ण लिहंइ व चित्ते णिउणं कंदप्पचित्तअरो ॥ ४० ॥

राजा—(सविषादम् ।)अँवइण्णा कप्पूरमंजरी ! रित्ता दोला, रित्तं अ मज्झ चित्तं, रित्ताइं दंसणुस्सुअजणणअणाइं ।

विदूषकः—ता विज्जलेह व्व खणदिट्ठणट्ठा ।

नयने प्रसृतिसदृशे झटिति फुल्ले कौतूहलेन ।
अर्पयत इव कुवलयशिलीमुखे पञ्चबाणस्य ॥

कुवलये एव शिलीमुखौ शरौ । कुसुमशरत्वात्तस्येति भावः । रूपकमुत्प्रेक्षा चालंकारः । तल्लक्षणं तु पूर्वोक्तमेव ।

दोलारसविच्छेदः कथमपि मा भवत्विति पततीव ।
पृष्ठे वेणिदण्डो मन्मथचर्मयष्टिकायमानः ॥

अत्रापि रूपकोत्प्रेक्षे ।

इत्येतानि विलासोज्वलानि दोलाप्रपञ्चचरितानि ।
कस्य न लिखति चित्ते निपुणः कंदर्पचित्रकरः ॥

इत्यमुना प्रकारेणैतानि दोलाप्रपञ्चचरितानि कर्मभूतानि कंदर्पचित्रकरः कर्ता कस्य कामिनश्चित्ते न लिखति ? अपि तु सर्वस्यापीत्यर्थः । किंभूतानि ? विलासा उज्वलाः शुचयो येषु तानि । विलास उज्वलश्च येषु तानीति वा । 'शृङ्गारः शुचिरुज्वलः' इति कोषात् । अत्र रूपकम् ।

राजा—

कथमवतीर्णा कर्पूरमञ्जरी ! रिक्ता दोला, रिक्तं च मम चित्तम्, रिक्तानि दर्शनोत्सुकानि मम नयनानि ।

विदूषकः—

तद्विद्युद्देशेव क्षणदृष्टनष्टा ।

---

1 'रित्त चित्ते' इति टीकापाठः । 2 'कथमवरुणा' इति टीकाभिमतः पाठः ।

राजा—भा एवं भण । हरिअंदपुरि व दिट्ठा पणट्ठा अ ।
(स्मृतिनाटितेन ।)

मंजिट्ठी ओट्ठमुद्दा णवघडिअसुवण्णुज्जला अंगलट्ठी
दिट्ठी यालिंदुलेहाधवलिमजअणी कुंतला कज्जलाहा ।
इत्थं वण्णाण रेहा विहरइ हरिणीचंचलच्छी अ एसा
कंदप्पो [1]जामदप्पो जुअजणजअणे पुण्णलक्खो [2]विभाइ ॥४१॥

राजा—

मैवं भण ! हरिश्चन्द्रपुरीव दृष्टा प्रनष्टा च ।

स्मृतीति । स्मृतिलक्षणमुक्तं प्राक् ।

मंजिट्ठी इति ।

माञ्जिष्ठी ओष्ठमुद्रा नवघटनसुवर्णोज्ज्वलाङ्गयष्टि-
र्दृष्टिर्बालेन्दुरेखाधवलिमजयिनी कुन्तलाः कज्जलाभाः ।
इत्थं वर्णानां रेखा विहरति हरिणीचञ्चलाक्षी चैषा
कंदर्पो दीर्घदर्पो युवजनजयने पूर्णलक्ष इव भाति ॥

माञ्जिष्ठीलक्षणेन मञ्जिष्ठानिष्टरक्तातिशयवत्त्वमोष्ठमुद्रायां व्यज्यते । नवा घटना यस्येति बहुव्रीहिः । तथा च तादृशसुवर्णनिरूपितचाकचक्यातिशयवत्त्वमङ्गेषु व्यज्यते । यष्टिरूपकेण च तन्निष्ठाधिकदृढत्वमङ्गेषु द्योत्यते । 'इन्दुरेखा' इत्यनेन चारुत्वद्वित्वं ज्ञाप्यते । 'कज्जलाभा' इत्यनेन कज्जलनिष्ठनीलिमातिशयवत्त्वं कुन्तलेष्वभिव्यज्यते । अथवा कज्जले आभा येषामिति विपर्यासोपमा, तदुक्तं काव्यादर्शे दण्डिनोक्तम् (२।१७) 'गां प्रतिदिविपर्यासादिषर्यासोपमेष्यते ।' इति । इत्थमनिर्वचनीयाः । 'रेखा'पदेन चोत्कारगतातिशयविशेषो लक्ष्यते । दीर्घो दर्पोऽस्यास्तीति दीर्घदर्पा । अनेन च लक्ष्यस्वाधीनीकरणे क्रेशलेशस्याप्यभावादपर्वकोऽपि न दोष इति भावः । पूर्णलक्ष्यत्वं स्वाधीनं यावच्छब्दयोगेन । अत्रापि रूपकोपमोत्प्रेक्षानुप्रासलक्षणाः शब्दार्थालंकारा ज्ञेयाः ।

---

1 'जणदप्पो' इति टीकानुसारी पाठः । 2 'दीरदप्पो' इति टीकानुसारी पाठः । 3 'विभादि' टीकासंमतः ।

विदूषकः—एदं तं मरगअपुंजं । इह उवविसिअ पिअवअस्सो पडिवालेदु तं । सङ्खा वि सणिहिदा वट्टदि ।

(उभौ तथा कुरुतः ।)

राजा—अइसिसिरं पि हिमाणिं सतावदाइणिं मज्झण्णवेलं अणुहवामि ।

विदूषकः—ता लच्छीसहअरो खणं चिट्ठदु देवो, जाव अहं सिसिरोवआरसामग्गिं संपादेमि । (इति नाट्येन निष्क्रम्य पुरोऽवलोक्य च ।) किं पुण एसा विअक्खणा इदो णिअडिआ आगच्छदि ।

राजा—सणिहिदो सकेदकालो कहिदो [1]मंतीहिं पि । (स्मृत्वा । मदनावृतमभिनीय ।)

किसलअकरचरणा वि हु कुवलअणअणा मिअकवअणा वि ।
अहह णवचंपअग्गी तह वि हु तावेइ अच्चरिअ ॥ ४२ ॥

विदूषकः—

एतत्तन्मरकतपुञ्जम् । इहोपविश्य प्रियवयस्यः प्रतिपालयतु ताम् । संध्यापि संनिहिता वर्तते ।

वयस्येति सबुद्धिश्च । 'विदूषकेन वक्तव्यो वयस्येति च भूपतिः ।' इत्युक्तेः ।

राजा—

अतिशिशिरामपि हिमानीं संतापदायिनीं (मध्याह्नवेलां) अनुभवामि ।

'हिमानी हिमसहति' इति त्रिकाण्डी ।

विदूषकः—

तल्लक्ष्मीसहचरः क्षणं तिष्ठतु देवः, यावदहं शिशिरोपचारसामग्रीं संपादयामि । किं पुनरेषा विचक्षणा इतो निकटा आगच्छति ।

तल्लक्ष्मीः तत्कान्तिः, तन्मात्रसहाय इत्यर्थः ।

राजा—

संनिहितः संकेतकालः पथिनो मन्त्रिभ्यामपि ।

विमलयकरचरणापि खलु कुवलयनयना मृगाङ्कवदनापि ।
अहह नवचम्पकाग्नी तयापि तापयत्याश्चर्यम् ॥

---

1 'सहीहिं' इति पाठः ।

विदूषकः—(सम्यगवलोक्य ।) अहो, विअक्खणा सिसिरोवआरसामग्गीसहिदा आअदा ।

(ततः प्रविशति शिशिरोपचारसामग्रीसहिता विचक्षणा ।)

विचक्षणा—(परिक्रम्य ।) अहो, पिअसहीए महंतो खु विरहदाहज्जरो ।

विदूषकः—(उपसृत्य ।) भोदि ! किं एदं ?

विचक्षणा—सिसिरोवआरसामग्गी ।

विदूषकः—कस्स कदे ?

अत्रापि चेष्टानुप्रासविभावनारूपकाऽहेतुसमरूपा शब्दार्थालंकारा उक्ता । विभावनालक्षणमुक्तमभियुक्तैः—'कारणाभावेऽपि कार्योत्पत्तेर्यो विभाव्यते' इति । अहेतुलक्षणमप्युक्तम्—'कारणे सत्यपि कार्याभावोऽहेतुः' इति । अन्यैव सज्ञा विशेषोक्तिरिति **काव्यप्रकाशे** । समलक्षणमप्युक्तम्—'स्वातन्त्र्येणाज्ञात्वेन सदादेर्नैरूप्येण वाऽन्यैकारणामेकत्रायत्नानं समः' इति ।

विदूषकः—
अये, विचक्षणा शिशिरोपचारसामग्रीसहितदूरागता ।
'नानुचितस्य पात्रस्य प्रवेशः' इति पूर्वमेव विदूषकमुखेन सूचनम् ।

विचक्षणा—
अहो, प्रियसख्या महान्खलु विरहदाहज्वरः ।

विदूषकः—
भवति ! किमेतत् ?

विचक्षणा—
शिशिरोपचारसामग्री ।

विदूषकः—
कस्य कृते ?

---

1 'सामग्ग'सहिदहाणा' इति टीकानुसृतः पाठः ।

विचक्षणा—पिअसहीए कदे ।

विदूषकः—ता मह वि अद्धं देहि ।

विचक्षणा—किं णिमित्तं ?

विदूषकः—महाराअस्स कदे ।

विचक्षणा—कि पुण कारणं तस्स ?

विदूषकः—कप्पूरमंजरीए वि कि ?

विचक्षणा—किं ण जाणासि महाराअस्स दंसणं ?

विदूषकः—तुवं पि कि ण जाणासि महाराअस्स कप्पूरमंजरीए दंसणं ?

(इत्युभौ हसतः ।)

विचक्षणा—
प्रियसख्याः कृते ।

विदूषकः—
तन्ममाप्यर्धं देहि ।

विचक्षणा—
किं निमित्तम् ?

विदूषकः—
महाराजस्य कृते ।

विचक्षणा—
किं पुनः कारणं तस्य ?

विदूषकः—
कर्पूरमञ्जर्या अपि किम् ?
कारणमिति पूर्वतनाध्याहारः ।

विचक्षणा—
किं न जानासि महाराजस्य दर्शनम् ?

विदूषकः—
त्वमपि किं जानासि महाराजस्य कर्पूरमञ्जर्या दर्शनम् ?

विचक्षणा—ता कहिं महाराओ ?

विदूषकः—तुह वअणेण मरगअपुंजे चिट्ठदि ।

विचक्षणा—ता महाराएण सह मरगअपुंजदुआरे चिट्ठ खणं, जेण उहअदंसणे जादे सिसिरोवआरसामग्गीए जलंजली दिज्जदि ।

विदूषकः—(तामुपसृत्य ।) तहिं गच्छ जदो णागच्छसि । (इति क्षिपति ।) (पुनस्त्रा प्रति ।) ता कीस दुआरदेसे भविदव्वं ?

विचक्षणा—देवीए आदेसेण कप्पूरमंजरी समाअच्छदि ।

विदूषकः—किं तीए आदेसो ?

विचक्षणा—तहि देवीए बालतरुणो तिण्णि आरोविदा ।

विचक्षणा—
तत्रैव महाराजः ?
विदूषकः—
तव वचनेन मरकतपुञ्जे तिष्ठति ।
विचक्षणा—
तन्महाराजेन सह मरकतपुञ्जद्वारे तिष्ठ क्षणम्, येनोभयदर्शने जाते शिशिरोपचारसामग्र्या जलाञ्जलिर्दीयते ।
विदूषकः—
तत्र गच्छ यतो नागच्छसि । तत्रैव द्वारदेशे भवितव्यम् ?
विचक्षणा—
देव्या आदेशेन कर्पूरमञ्जरी समागच्छति ।
विदूषकः—
किं तस्या आदेशः ?
विचक्षणा—
तत्र देव्या बालतरुणा आरोपिताः ।

विदूषकः—के के ?

विचक्षणा—कुरवअतिलअअसोआ ।

विदूषकः—ता किं तेहि ?

विचक्षणा—भणिदा सा देवीए । जधा,—

कुरवअतिलअअसोआ आलिंगणदंसणग्गचलणहआ ।
विअसंति कामिणीणं ता ताणं देहि दोहलअ ॥ ४२ ॥

एण्हि तं संपादइस्सदि ।

विदूषकः—
कः क. ?
विचक्षणा—
कुरवकतिलकाशोकाः ।
विदूषकः—
तत्किं तैः ?
विचक्षणा—
भणिता सा देव्या । यथा,—

कुरवकतिलकाशोका आलिङ्गनदर्शनाग्रचरणहताः ।
विकसन्ति कामिनीनां तेषां देहि दोहदकम् ॥

यस्मात्कारणात्कामिनीनामालिङ्गनदर्शनाग्रचरणहता सन्तः कुरवकादयो वृक्षा विकसन्ति उत्फुल्ला भवन्ति, तत्तस्मात्तेषां दोहदकं देहीति यत्पदाध्याहारेण योज्यम् । यद्वा,—तदिदमिति सच्छब्देन पूर्वोक्तालिङ्गनादि परामृश्य योज्यम्, तदा न यत्पदाध्याहारः । कुरवकादिद्रुमस्य कामिन्यालिङ्गनादिद्वयेनैव विकासो यस्मिन् इति कविसंप्रदायः । तथोक्तम्—'पादाहतः प्रमदया विकसत्यशोकः शोकं जहाति बकुलो मुखसीधुसिक्तः । आलिङ्गितः कुरबकः कुरुते विकासमालोकितस्तिलक उत्कलिको बिभाति ॥' इति । 'आलिङ्गनेनैव मृगयज्ञाक्ष्याः प्रफुल्लतां यं तिलकः

विदूषकः—ता मरगअपुंजादो पिअवअस्सं आणिअ तमालविडवंतरिअं ठाविअ एदं पच्चक्खं करइस्सं। (तथा नाटयित्वा। राजानं प्रति।) भो भो, उट्ठिअ पेक्ख णिअहिअअसमुद्दचंदलेहं।

(राजा तथा करोति।)

(ततः प्रविशति विशेषभूषिताङ्गी कर्पूरमञ्जरी।)

कर्पूरमञ्जरी—कहि पुण विअक्खणा?

विचक्षणा—(तामुपसृत्य।) सहि! कीरदु देवीए समादिट्ठं।

राजा—वअस्स! किं पुण तं?

विदूषकः—तमालविडवंतरिदो भविअ जाण।

(राजा तथा करोति।)

प्रयाति। अशोकशाखी पुनरद्विपातैर्विवेकशाखी विरलो हि लोके॥' इति च। अन्यापि लोकानुरागः।

इदानीं रङ्गमुपादयिष्यति।

विदूषकः—

तन्मरकतपुञ्जात्प्रियवयस्यमानीय तमालविटपान्तरितं स्थापयित्वा एतत्प्रत्यक्षं कारयिष्यामि। भो भोः, उत्थाय प्रेक्षस्व निजहृदयसमुद्रचन्द्रलेखाम्।

निजहृदयमेव समुद्रस्तत्र चन्द्रलेखेव कर्पूरमञ्जरी ताम्।

कर्पूरमञ्जरी—

अये पुनर्विचक्षणे!

विचक्षणा—

सखि! किमपि देव्या समादिष्टम्।

पुरस्कारिणो वा दोहदस्यानिष्पत्तेः।

राजा—

वयस्य! किं पुनस्तत्?

विदूषकः—

तमालविटपान्तरितो भूत्वा (भूत्वा) जानीहि।

विचक्षणा—एस कुरवअतरू ।

(कर्पूरमञ्जरी तमालिङ्गति ।)

राजा—

णवकुरवअरुक्खो कुंभथोरत्थणीए
रहसविरइदेणं णिब्भरालिंगणेणं ।
तह कुसुमसमिद्धिं लंभिदो सुंदरीए
जह भसलकुलाणं एत्थ जत्ता समत्ता ॥ ४४ ॥

विदूषकः—भो, पेक्ख पेक्ख महेंदजालं । जेण,—

बालो वि कुरवअतरू तरुणीए गाढमुवगूढो ।
सहस त्ति कुसुमणिअरं मअणसरे विअ समुग्गिरइ ॥ ४५ ॥

विचक्षणा—

एष कुरवकतरुः ।

राजा—

नवकुरवकवृक्षः कुम्भस्थूलस्तन्या
रभसविरचितेन निर्भरालिङ्गनेन ।
तथा कुसुमसमृद्धिं लम्भितः सुन्दर्या
यथा भ्रमरकुलानां तत्र यात्रा प्रवृत्ता ॥

जातेति यावत् । 'अथ च तत्र' इति 'ततः' इत्यर्थे । तत्र ततो यात्रा गमनागमनं समाप्तमित्यर्थः । सर्वदा तत्रैव तिष्ठन्तीति भावः । यद्वा,—असमाप्तेति नञ्प्रश्लेषः । तत्रेति विषयसप्तमी । तथा च तद्विषये यात्रा वृक्षान्तरात्तत्रागमनं तत्र समाप्तमित्यर्थ । अनेन पुष्पोद्गमः, तत्र च सौरभातिशयो ध्वन्यते । अत्रापि च्छेकानुप्रासरूपकोपमासंकरा अलंकाराः ।

विदूषकः—

भोः, प्रेक्षस्व प्रेक्षस्व महेन्द्रजालम् । येन,—

बालोऽपि कुरवकतरुस्तरुण्या गाढमुपगूढः ।
सहसेति कुसुमनिकरं मदनशरमिव समुद्गिरति ॥

---

[1] इति दीक्षितः पाठः । [2] 'मदनशरं' इति दीक्षितपाठः ।

राजा—ईदिसो जेव दोहलस्स पहावो ।

विचक्षणा—अअं तिलअहुमो ।

(कर्पूरमञ्जरी चिरं निर्वर्ण्यावलोकयति ।)

राजा—

तियसाणं तरलाणं कज्जलकलासंवलिदाणं पि से
पासे पंचसरं सिलीमुहधरं णिच्चं कुणंताणं अ ।
णेत्ताणं तिलअहुमे णिवडिदा धाडी मअच्छीअ जं
तं सो मंजरिपुंजदंतुरसिरो रोमंचिदो व्व ट्ठिओ ॥ ४६ ॥

विचक्षणा—एसो वि असोअसाही ।

(कर्पूरमञ्जरी चरणताडनं नाटयति ।)

राजा—

ईदृश एव दोहदस्य प्रभावः ।

विचक्षणा—

अयं तिलकद्रुमः ।

राजा—

क्षीणयोर्मरलयोः कज्जलकलासंवलितयोरप्यस्याः
पार्श्वे पञ्चशरं शिलीमुखधरं नित्यं कुर्वतोश्च ।
नेत्रयोस्तिलकद्रुमे निपतिता धाटी मृगाक्ष्या यत्
तस्मात् मञ्जरीपुञ्जदन्तुरशिरो रोमाञ्चित इव स्थितः ॥

क्षीणयोर्दीर्घतारयोः, कज्जलकला मूर्ता कज्जलं तरलेन्द्रियतयोस्संबद्धयोः, पञ्चशरं कामस्यास्याः कर्पूरमञ्जर्याः पार्श्वे शिलीमुखधरं बाणधरं नित्यं सर्वदा कुर्वतोः, मृगाक्ष्या नेत्रयोर्धाटी रचनास्वाभाविकीयालक्षद्रुमे यद्यस्मात्कारणात्पतितस्तस्मात् तिलकद्रुमशिरो पुलकसमूहेन दन्तुरं बाधुरं शिरोऽग्रं यस्य सः । अत एव रोमाञ्चित इव रोमाञ्चयुक्त इव दर्शनं दृष्टवान् । शिलीमुखधरं पञ्चशरं पार्श्वे नित्यं कुर्वतोरित्यनेन मरलयोर्दीर्घतारत्वमस्याः नेत्रयोर्दर्शितम् । तेन च कामिनीनयनयोर्दीर्घतारत्वे कामसाम्राज्यस्थैर्यं प्रत्यवायाभावश्च दर्शितः । अत्रापि पूर्वोदाहरणवदुत्प्रेक्षालंकारेणाङ्गाङ्गिभावेन शृङ्गारो व्यञ्जितः ।

विचक्षणा—

एष तिलकद्रुमः ।

विचक्षणा—एस कुरवअतरू ।

(कर्पूरमञ्जरी तमालिङ्गति ।)

राजा—

णवकुरवअरुक्खो कुंभथोरत्थणीए
रहसविरइदेणं णिब्भरालिंगणेणं ।
तह कुसुमसमिद्धिं लंभिदो सुंदरीए
जह भसलकुलाणं एत्थ जत्ता समत्ता ॥ ४४ ॥

विदूषकः—भो, पेक्ख पेक्ख महेंदजालं । जेण,—

बालो वि कुरवअतरू तरुणीए गाढमुवगूढो ।
सहस त्ति कुसुमणिअरं मंअणसरे विअ समुग्गिरइ ॥ ४५ ॥

विचक्षणा—

एष कुरवकतरुः ।

राजा—

नवकुरवकवृक्षः कुम्भस्थूलस्तन्या
रभसविरचितेन निर्भरालिङ्गनेन ।
तथा कुसुमसमृद्धिं लम्भितः सुन्दर्या
यथा भ्रमरकुलानां तत्र यात्रा प्रवृत्ता ॥

जातेति यावत् । 'अथ च तत्र' इति 'ततः' इत्यर्थे । तत्र ततो यात्रा गमनागमनं समाप्तमित्यर्थः । सर्वदा तत्रैव तिष्ठन्तीति भावः । यद्वा,—अत्रमाप्तेति नञ्प्रश्लेषः । तत्रेति विषयसप्तमी । तथा च तद्विषये यात्रा देशान्तरात्तत्रागमनं राज्ञ समाप्तमित्यर्थः । अनेन कुसुमोद्गमः, तत्र च सौरभातिशयो व्यज्यते । अत्रापि पूर्वानुरूपश्लेषसमुत्थिता अलंकाराः ।

विदूषकः—

राजा—ईदिसो जेव दोहलस्स पहावो ।

विचक्षणा—अअं तिलअहुमो ।

(कर्पूरमञ्जरी चिरं निर्वर्ण्य लज्जते ।)

राजा—

तिअसाणं तरलाणं कज्जलकलासंवग्गिदाणं पि से
पासे पंचसरं सिलीमुहधरं णिच्चं कुणंताणं अ ।
णेत्ताणं तिलअहुमे णिवडिदा धाडी मअच्छीअ जं
तं सो मंजरिपुंजदंतुरसिरो रोमंचिदो व्व ट्ठिओ ॥ ४६ ॥

विचक्षणा—एसो वि असोअसाही ।

(कर्पूरमञ्जरी चरणताडनं नाटयति ।)

राजा—
ईदृश एव दोहदस्य प्रभावः ।

विचक्षणा—
अयं तिलकद्रुमः ।

राजा—

असोअतरुताडणं रणिद्दगेउरेणांहिणा
कदं च मअलंछणच्छविमुहीअ हेलुल्लसं।
सिहासु सअलासु वि त्थवअमंडणाडंबरं
ठिदं च गअणगणे जणणिरिक्खणिज्जं खणं ॥ ४७ ॥

विदूषकः—भो वअस्स! ज सअ ण कद दोहलदाणं देवीए जाणासि एत्थ कि कारणं?

राजा—तुवं जाणासि?

विदूषकः—भणामि जइ देवो ण कुप्पदि।

राजा—को एत्थ रोसावसरो? भण उम्मुद्दिदा जीहा।

राजा—

अशोकतरुताडनं रणितनूपुरेणाङ्घ्रिणा
कृतं च मृगलाञ्छनच्छविमुखी हेलोल्लसम्।
शिबासु सकलास्वपि स्तवकमण्डनाडम्बरं
स्थितं च गगनाङ्गणे जननिरीक्षणीयं क्षणम् ॥

मृगलाञ्छनच्छविः शशाङ्ककान्तिर्मुखे यस्या। मृगलाञ्छनस्य रङ्कविर्यस्मिन् तादृशं मुखं यस्या इति वा। तादृश्या कर्पूरमञ्जर्या। यद्यपेऽभयत्रापि समकाले बोद्धव्यमिति योज्यते। अत्रापि पूर्वानुभूतिसंस्कारानुप्रवेशमादायोत्प्रेक्षालंकारः कृतः।

विदूषकः—

विदूषकः—

इह जइ वि कामिणीणं सुंदेरं धरइ अवअवाण सिरी ।
अहिदेवअ व्व णिवसइ तह वि हु तारुण्णए[2] लच्छी ॥ ४८ ॥

राजा—सुणिदो[3] दे अहिप्पाओ । किं पुण किं पि भणामो ।

बालाओ होंति कोऊहलेण एमेव चवलचित्ताओ ।
दंसेंति[4] लसिअथणीओ पुण धरंति मअरद्धअरहस्सं ॥ ४९ ॥

विदूषकः—तरुणो वि रूअरेहारहस्सेण फुल्लंति । ण उणो रइ-रहस्स जाणंति ।

(नेपथ्ये ।)

वैतालिकः—सुरसज्झा भोदु देवस्स ।

विदूषकः—

इह यद्यपि कामिनीना सौन्दर्यं धारयलावयजाना श्रीः ।
अधिदेवतेव निवसति तथापि तरुणे तरुण्ये लक्ष्मी ॥

अत्रापि व्यतिरेकोपमे ।

राजा—

श्रुतमेऽभिप्राय । किं पुनः किमपि भणाम ।

बाला भवन्ति कौतूहलेनैवमेव चपलचित्ता ।
दर्शयन्त्यपि पुनर्निगूहन्ति मकरध्वजरहस्यम् ॥

विदूषकः—
तरुणोऽपि रूपरेखारहस्येन विजानन्ति । न पुना रतिरहस्य जानन्ति ।
यतस्तरुणीकुचस्पर्शेन विनापि विकसन्तीति भावः ।

वैतालिकः—
सुरासख्या भवतु देवस्य,—

---

1 'विम्हरि' इति पाठः । 2 'डीए' इति पाठः । 3 'सुणिदो' इति टीकाभिमतः पाठः । 4 'दरिसंति अथणीसु पुणो णिवहइ मअर' इति टीकाभिमतः पाठः ।

लोआणं लोअणेहिं सह कमलवणं अद्धणिद्दं कुणंतो
मुंचंतो तिव्वभावं सह अ संहरिसं माणिणीमाणसेहिं।
मंजिट्ठारत्तसुत्तच्छविकिरणचओ चक्कवाएकमित्तो
जादो अत्थाचलत्थो उवह दिणमणी पक्कणारंगपिंगो॥ ५०

राजा—भो वअस्स! संणिहिदो सज्झासमओ वट्टदि।

विदूषकः—संकेदकालो कधिदो बंदीहि।

कर्पूरमञ्जरी—सहि विअक्खणे! गमिस्सं दाव। विआलो संपत्तो।

विचक्षणा—एवं कीरदु।

(इति परिक्रम्य निष्क्रान्ताः सर्वे।)

इति द्वितीयं जवनिकान्तरम्।

तृतीयं जवनिकान्तरम्

(ततः प्रविशति राजा विदूषकश्च ।)

राजा—(तामनुध्याय ।)

दूरे किञ्जदु चंपअस्स कलिआ कज्जं हलिद्दीअ किं
ओलोहाइ वि कंचणेण गणणा का णाम जच्चेण वि ।
लावण्णस्स णउग्गदिंदुमहुरच्छायस्स तिस्सा पुरो
पद्मग्गेहि वि केसरस्स कुसुमुक्केरेहि किं कारणं ॥ १ ॥

अपि च,—

मरगअमणिगुच्छा हारलट्ठि व्व तारा
भमरकवलिअंता मालईमालिअ व्व ।
रहसवलिअकंठी तीअ दिट्ठी चरिट्ठा
सवणपहुणिविट्ठा माणसं मे पइट्ठा ॥ २ ॥

दूरे इति ।

दूरे कियती चम्पकस्य कलिका कार्यं हरिद्रया किं
उल्लेख च काञ्चनेन गणना का नाम जात्येनापि ।
लावण्यस्य नवोद्गतेन्दुमधुरच्छायस्य तस्याः पुरः
प्रत्यग्रैरपि केसरस्य कुसुमोत्करैः किं कारणम् ॥

तस्या लावण्यस्येति सम्बन्धः । अत्राक्षेपोपमे । आक्षेपलक्षणमुक्तं पूर्वैः—'प्रतिषेधपुरःसरोक्तिराक्षेपः ।' काव्यादर्शेऽपि (२।१२०)—'प्रतिषेधोक्तिराक्षेपः' इति ।

अपि च,—

मरकतमणिगुच्छा हारयष्टिरिव तारा
भ्रमरकवलिताग्रा मालतीमालिकेव ।
रभसवलितकण्ठी तस्या दृष्टिश्चरिष्णुः
श्रवणपथनिविष्टा मानसं मे प्रविष्टा ॥

तारैव भ्रमरेण कवलितमग्रं यस्या इति सा । अत्रापि रूपकोत्प्रेक्षे ।

---

1 'उल्लेख अ' इति टीकासम्मतः । 2 'दृष्टिश्चरिष्णुः' इति टीकासम्मतः पाठः ।

विदूषकः—भो वअस्स ! किं तुवं भज्जाजिदो पेइव किंपि किंपि कुरुकुराअंतो चिट्ठसि ?

राजा—वअस्स ! पिअं सुविणअं दिट्ठं । तं अणुसंधामि ।

विदूषकः—ता कीदिसं तं कधेदु पिअवअस्सो ।

राजा—

जाणे पंकरुहाणणा सुविणए मं केलिसज्जागदं
कंदोट्टेण तडत्ति ताडिदुमणा हत्थंतरे संठिदा ।
ता कोट्टेण मए वि हत्ति गहिदा दिट्ठं परिट्ठंचले
तं मोत्तूण गदं च तीअ सहसा णट्ठा खु णिद्दा वि मे ॥ ३ ॥

विदूषकः—(स्वगतम् ।) मोदु एवं दाव । (प्रकाशम् ।) भो वअस्स ! अज्ज मए वि सुविणअं दिट्ठं ।

राजा—(सत्वरम् ।) ता कहिज्जदु कीदिसं तं सुविणअं ।

विदूषकः—
भो वयस्य ! किं त्वं भार्याजित इव किमपि किमपि कुरुराजमा—चेष्टसे ?

राजा—
वयस्य ! [प्रिये] स्वप्ने दृष्टम् । तमनुसंदधामि ।

विदूषकः—तत् [कीदृशं तत्] कथयतु प्रियवयस्यः ।

राजा—

विदूषकः—अज्ज ! जाणे सुविणए सुरसरिसोत्ते सुत्तो म्हि ।

राजा—तदो तदो ?

विदूषकः—ता हरसिरोवरि दिण्णलीलावआए गंगाए पक्खालिदो म्हि तोएण ।

राजा—तदो तदो ?

विदूषकः—तदो सरअसमअवरिसिणा जलहरेण जहिच्छं पीदो म्हि ।

राजा—अच्छरिअं अच्छरिअं, तदो तदो ?

विदूषकः—तदो चित्ताणक्खत्तगदे भअवदि मत्तंडे तंबवण्णीणदी-सोत्ते समुद्दं गदो सो महामेहो । जाणे अहं पि तस्स गंभट्ठिदो गच्छामि ।

विदूषकः—
अद्य जाने स्वप्ने सुरसरित्स्रोतसि सुप्तोऽस्मि ।

राजा—
ततस्तत ?

विदूषकः—
तत्करशिरस उपरि दत्तलीलाचरणाया गङ्गायाः प्रक्षालितोऽस्मि तोयेन ।

राजा—
ततस्तत ?

विदूषकः—
तत शरत्समयवर्षिणा जलधरेण यथेच्छं पीतोऽस्मि ।

राजा—
आश्चर्यमाश्चर्यम्, ततस्तत ?

विदूषकः—
तत स्वातीनक्षत्रगते भगवति मार्तण्डे ताम्रवर्णितसरोवरं समुद्रं गतोऽसौ महामेघ । अनेनाहमपि (तस्य) मेघगर्भस्थितो गच्छामि ।

---

1 'अहिन्न तत्त' इति दीक्षितपाठः । 2 'सोत्तं' इति दीक्षितपाठः । 3 'दिट्ठम्' इति दीक्षितपाठः ।

राजा—तदो तदो ?

विदूषकः—तदो सो तहि थूलजलबिंदूहिं वरिसिदुं पअट्टो। अहं च रअणाअरसुत्तिहिं मुत्तासुत्तिणामधेआहिं संपुडं समुप्पडिअ जलबिंदूहि समं पीदो म्हि। ताण च दसमासप्पमाणं मोत्ताहलं भविअ गब्भे सठिदो।

राजा—तदो तदो ?

विदूषकः—

तदो चउस्सट्ठिसु सुत्तिसु ट्ठिदो घणंबुबिंदू जिदवंसरोअणो।
सुवत्तुलं णिच्चलमच्छमुज्जलं कमेण पत्तो णवमोत्तिअत्तणं ॥ ४ ॥

राजा—तदो तदो ?

विदूषकः—तदो सो हं अत्ताण ताणं सुत्तीणं गब्भगदं मुत्ताहलत्तणेण मण्णेमि।

राजा—
ततस्तत ?
विदूषक—
ततोऽसौ तत्र स्थूलजलबिन्दुभिर्वर्षितुं प्रवृत्त। अहं च रत्नाकरशुक्तिर्मुक्ता(शुक्ति)नामधेयाभि सपुटं समुद्घाट्य जलबिन्दुभि सम पीतोऽसि। तानि च दशमासप्रमाणं मुक्ताफलं भूत्वा गर्भे स्थित।
राजा—
ततस्तत ?
विदूषक—

ततश्चतु पञ्चिषु शुक्तिषु स्थितो घनाम्बुबिन्दुर्जितवंशरोचन।
सुवर्तुलं निश्चलमच्छमुज्ज्वलं क्रमेण प्राप्तो नवमौक्तिकत्वम् ॥

राजा—
ततस्तत ?
विदूषक—
तत सोऽहमात्मानं तानि शुक्तीनां गर्भगतं मुक्ताफलत्वेन मन्ये।

---

1 'संपुडं समुप्पडिअ' इति टीकृत पाठः। 2 'णिच्चल' इति टीकृत पाठ।

राजा—तदो तदो ?

विदूषकः—तदो परिणदिकाले समुद्दाओ कड्ढिदाओ ताओ सुत्तिओ फाडिदाओ अ। अहं चदुस्सट्ठिमुत्ताहलत्तणं गदो ठिदो। कीदो च एक्केण सेट्ठिणा सुवण्णलक्खं देइअ।

राजा—अहो विचित्तदा सुविणअस्स। तदो तदो ?

विदूषकः—तदो तेण आणिअ वेअडिअं विद्धाविदा मोत्तिआ। मम वि ईसीसि वेअणा समुप्पण्णा।

राजा—तदो तदो ?

विदूषकः—तदो,—

तेणं च मुत्ताहलमंडलेणं एक्केकदाए दसमासिएणं।
एक्कावली लंठिकमेण गुच्छा सा संठिदा कोटिसुवण्णमुल्ला॥ ५॥

राजा—
ततस्ततः ?

विदूषकः—
ततः परिणतिकाले समुद्रात्कर्षितास्ताः शुक्तयः, विदारिताश्च। अहं चतुःषष्टि-मुक्ताफलत्वं गतः स्थितः। क्रीतयैकेन श्रेष्ठिना सुवर्णलक्षं दत्त्वा।

राजा—
अहो विचित्रता स्वप्नस्य। ततस्ततः ?

विदूषकः—
ततस्तेनानीय मेघपारैर्वेधितानि मौक्तिकानि। मामपीषद्वेदना समुत्पन्ना।

राजा—
ततस्ततः ?

विदूषकः—
ततः,—

तेनापि मुक्ताफलमण्डलेनैकैकतया दशमासिकेन।
एकावली ग्रन्थिक्रमेण गुम्फिता सा संस्थिता कोटिसुवर्णमूल्या॥

---

1 'वेअणाएहि वेअणिआए' इति टीकानुसारी पाठः। 2 'वेअणाए' इति टीकानुसारी पाठः। 3 'णडि' इति टीकाभिमतः पाठः।

राजा—तदो तदो ?

विदूषकः—तदो तं करंडिआए कदुअ साअरदत्तो णाम वाणिओ गदो पंचालाहिवस्स सिरिवज्जाउहस्स णअरं कण्णउज्जं णाम । तहिं च सा विक्किणीदा कोडीए सुवण्णस्स ।

राजा—तदो तदो ?

विदूषकः—तदो अ,—

दट्ठूण थोरत्थणतुंगिमाणं एक्कावलीए तह चंगिमाणं ।
सा तेण दिण्णा दइआइ कंठे रज्जंति छेआ समसंगमम्मि ॥ ६ ॥

अवि अ,—

णहवहलिदजोण्हाणिब्भरे रत्तिमज्झे
कुसुमसरपहारत्ताससंमीलिदाणं ।

राजा—
ततस्ततः ?
विदूषकः—
ततस्तां करण्डिकायां कृत्वा सागरदत्तो नाम वणिग्गतः पाञ्चालाधिपस्य श्रीवज्रायुधस्य नगरं कान्यकुब्जं नाम । तत्र च सा विक्रीता कोट्या सुवर्णस्य ।
राजा—
ततस्ततः ?
विदूषकः—
ततश्च,—

दृष्ट्वा स्थूलस्तनतुङ्गिमानमेकावल्यास्तथा चारुत्वमानम् ।
सा तेन दत्ता दयितायाः कण्ठे रज्यन्ति छेका समसंगमे ॥

कण्ठदानाधिकाधीरानङ्गसंगमो भविष्यतीति भावः । छेका विदग्धाः ।
अपि च,—

नभोपहरिणज्योत्स्नानिर्भरे रात्रिमध्ये
कुसुमशरप्रहारत्राससंमीलितयोः ।

विदूषकः—भो, देवीगदे पणअप्पारूढे वि पेम्मे किं णु कप्पूरमंजरिं सव्वंगवित्थारिअलोअणो पिअंतो विअ [1]पलोएसि ? किं तत्तो परिहीअमाणगुणा देवी ?

राजा—मा एवं भण,—

कीए वि संघडदि कस्स वि पेम्मगंठी
एमेअ इत्थ ण हु कारणमत्थि रूअं ।
चंगत्तणं पुणु महिज्जदि जं तहिं पि
तं दिज्जए पिसुणलोअमुहेसु मुद्दा ॥ ९ ॥

विदूषकः—भो वअस्स ! किं पुण एदं पेम्मं पेम्मं ति भणंति ?

विदूषकः—

भोः, देवीगते प्रणयप्रारूढेऽपि प्रेम्णि किमिति कर्पूरमञ्जरी सर्वाङ्गविस्तारित लोचनः पिबन्निवावलोकयसि ? किं ततोऽपि परिहीणप्रमाणगुणा देवी ?

परिहीणं प्रमाणं येषामेवंविधा गुणा यस्याः सा ।

राजा—

मैवं भण,—

कयाचित्संघटते कस्यापि प्रेमग्रन्थि-
रेयमेव तत्र न खलु कारणमस्ति रूपम् ।
चञ्चत्वं पुनरुच्यते यत्तत्रापि
तदीयते पिशुनलोकमुखेषु मुद्रा ॥

प्रेमग्रन्थिसंघटने न रूपातिशयः कारणं, किं तु तत्स्वभावादेव भवति । तथापि यत्सौन्दर्यान्वेषणं क्रियते केवलं तत्पिशुनमुखेषु मुद्रा दीयते । निर्मिलस्यानस्य प्रेमानुबन्ध इति पिशुनजनाकाङ्क्षायां तन्निषेधपरत्वेन परं सौन्दर्यमुपपद्यत इत्यर्थः । अत्रार्थान्तरन्यासानुप्राणादयः ।

विदूषकः—

भोः (वयस्य !) किं पुनरेतत् [प्रेम] प्रेमेति भण्यते ?

---

1 'अवलोकसि ? किं नाम तिरोहितप्रमाणगुणा' इति दीपकानुसारी पाठः ।

राजा—

जाणं सहाअपसरंतसलोलदिट्ठी-
पेरंतलुंठिअमणाण परोपरेण ।
वड्ढंतवम्महविइण्णरसप्पसारो
ताणं पआसइ लहू वि स [1]चित्तमेओ ॥ ११ ॥

अवि अ,—

अंतो णिविट्ठमणविब्भमडंवरो जो
सो भण्णए मअणमंडणमेत्थ पेम्मं ।
दुल्लक्खअं पि पअडेइ जणो जअम्मि
तं जाणिमो सुबहुलं मअणेंदजालं ॥ १२ ॥

विदूषकः—किं च, जदि चित्तगदं पेम्मं अणुराअं उप्पादेदि, त
किं किज्जदि मंडणाडंबरविडंबणाए !

राजा—

यथोः स्वभावप्रसरत्सलोलदृष्टि-
पर्यन्तलुण्ठितमनसोः परस्परेण ।
वर्धमानमन्मथवितीर्णरसप्रसार-
मयोः प्रकाशते लघुरिव चित्तभावः ॥

स्वभावतः प्रसरन्त्यः सलोला या दृष्टयस्तासां प्रान्तैर्लुण्ठितं मनो ययोः । लुण्ठितमित्यनेन तदेकरसता ध्वन्यते ।

अपि च,—

अन्तर्निविष्टमनोविभ्रमडम्बरो यः
स भण्यते मदनमण्डनमत्र प्रेम ।
दुर्लक्ष्यमपि प्रकटयति जनो जगति
तज्जानीमः सुबहुलं मदनेन्द्रजालम् ॥

विदूषकः—

किं च, यदि चित्तगतं प्रेमानुरागमुत्पादयति, तत्किं क्रियते मण्डनाडम्बरविडम्बनया ।

---

1 'चित्तं किम पि' इति क्वचित्पाठः । 2 'भावो' इति क्वचित्पाठः ।

जाणे सिरीअ जइ किज्जदि को वि [1]भेदो
माणिक्कभूसणणिअंसणकुंकुमेहिं ॥ १५ ॥

अवि अ,—

किं लोअणेहिं तरलेहिं किमाणणेण
चंदोवमेण [2]सिहिणेहिं किमुण्णएहिं ।
तं किं पि अण्णमिह भूवलए णिमित्तं
जेणंगणाउ हिअआहि ण ओसरंति ॥ १६ ॥

विदूषकः—एवं णेदं । किं पुण अण्णं पि मे कधेसु, जं कुमारत्तणे माणुसस्स णं मणोज्जं तस्स वि तारुण्णएण किं पि चंगत्तणं चंडदि ।

जाने श्रिया यदि क्रियते कोऽपि भावो
माणिक्यभूषणनिवसनकुङ्कुमैः ॥

अपि च,—

किं लोचनैस्तरलैः किमाननेन
चन्द्रोपमेन स्तनैः किमुन्नतैः ।
तत्किमप्यन्यदिह भूतलये निमित्तं
येनाङ्गना हृदयान्नापसरन्ति ॥

तथा अ,—

अंगं लावण्णपुण्णं सवणपरिसरे लोअणे फारतारे
वच्छं थोरत्थणिल्लं तिवलिविलइअं मुट्ठिगेज्झं च मज्झं ।
चक्काआरो णिअंवो तरुणिमसमए किं णु अण्णेण कज्जं
पंचेहिं चेअ बाला मअणजअमहावेजअंतीउ होंति ॥ १९ ॥

(नेपथ्ये ।)

सहि कुरंगिए ! इमिणा सिसिरोवआरेण णलिणि व्व कामं [1]किलिस्सामि ।

विस व्व विसकंदली विसहर व्व हारच्छडा
वअस्समिव अत्तणो किरदि तालविंताणिलो ।
तहा अ करणिग्गअं जलइ अंतधाराजलं
ण चंदणमहोसहं हरइ देहदाहं च मे ॥ २० ॥

तथा च,—

अङ्गं लावण्यपूर्णं श्रवणपरिसरे लोचने हारतारे
वक्षः स्थूलस्तनं त्रिवलिवलयितं मुष्टिग्राह्यं च मध्यम् ।
चक्राकारो नितम्बस्तरुणिमसमये किं त्वन्येन कार्यं
पञ्चभिरेव बाला मदनजयमहावैद्यपत्न्यो भवन्ति ॥

हारे हरणशीले तारे च यस्याः ।

(नेपथ्ये ।)

सखि कुरङ्गिके ! अनेन शिशिरोपचारेण नलिनीव कामं ग्लास्यामि ।

शिशिरोपचारः शीतलोपचारः, शिशिरर्तुसमीपागमनं च ।

विषमिव विसकन्दली विषधर इव हारयष्टा
वयस्यमिवात्मनः किरति तालवृन्तानिलः ।
तथा च करनिर्गतं ज्वलति यन्नयनाराजलं
न चन्दनमहौषधं हरति देहदाहं च मे ॥

तालवृन्तानिल आत्मनो वयस्यं तथायं शिशिरशिशिर किरतीत्यर्थः ।

---

1 'हार' इति क्वचित्पाठः । 2 'वैद्य' इति क्वचित्पुस्तकपाठः । 3 'किलिस्सामि' इति क्वचिदुपलभ्यते पाठः ।

विदूषकः—सुदं पिअवअस्सेण । भरिआ कण्णा पीऊसगंडूसेण । ता किं अज्ज वि उच्चेक्खीअदि घणघम्मेण किलम्मंती मुणालिआ, गाढक्कढिअदूसहेण सलिलेण सिंचिज्जती केलिकुंकुमपुत्तलिआ छम्मासिअमुत्तिआणं तडित्ति फुडंती एक्कावली, गंठिवण्णकेआरिआ लुडिज्जंती गंधहरिणएहिं । ता सच्चं सुविणअं ते संपण्णं । एहि, पविसम्ह । उंम्मिज्जदु मअरद्धअपडाअं । पअट्टदु कण्णकुहरम्मि पंचमहुंकाराणां रिंछोली । थक्कंतु बाहप्पवाहा । मंथरिज्जंतु णीसासप्पसरा । लहदु लावण्णं पुणण्णवभावं । ता एहि । खडक्किआदुआरेण पविसम्ह ।

(इति खिडक्किकोद्घाटनं नाटयन्ति, ततः प्रविशति नायिका सुरङ्गिका च ।)

नायिका—(ससाध्वस स्वगतम् ।) अम्मो, किं एसो सहसा गअणंगणादो अवइण्णो पुण्णिमाहरिणंको ? किं वा तुट्ठेण णीलकंठेण णिअ-

---

विदूषकः—

श्रुतं प्रियवयस्येन । मृतौ कर्णौ पीयूषगण्डूषैः । तत्किमद्यापि[1]पेक्ष्यते घनघर्मेण ह्रास्यन्ती मृणालिका, गाढक्वथितदुःसहेन सलिलेन सिच्यमाना केलिकुङ्कुमस्थली, षण्मासिकमौक्तिकानां झटिति स्फुटन्त्येकावली, ग्रन्थिपर्णकेदारिका लुण्ठ्यमाना गन्धहरिणैः । तत्सत्यं ते स्वप्ने सपन्नम् । एहि, प्रविशावः । उत्थाप्यतां मकरध्वजपताका । प्रवर्ततां कण्ठकुहरे पञ्चमहुंकाराणां रचना । स्तोकीक्रियन्तां बाष्पप्रवाहाः । मन्थरीक्रियन्तां नि श्वासप्रसराः । लभतां लावण्यं पुनर्नवभावम् । तदेहि, खिडकिद्वारेण प्रविशावः ।

नायिका—

अम्मो, किमेष सहसा गगनाङ्गनादवतीर्णः पूर्णिमाहरिणाङ्कः[2] ? किं वा तुष्टेन

---

1 "स्वप्नो" इति टीकापाठः । 2 'गंधहरिणेन' इति टीकादृश्यः पाठः । 3 'उद्घिज्जदु' इति टीकादृश्यः पाठः । 4 'कंठकुहरम्मि' इति टीकानुसारी पाठः ।

देहं लंभिदो मणोहओ ? किं वा हिअअस्स दुज्जणो णअणाण सज्जणो मं संभावेदि ? (प्रकाशम्।) सहि कुरंगिए ! इदं इंदजालं विअ पेक्खामि ।

विदूषकः—(राजानं हस्ते गृहीत्वा।) भोदि ! सच्चं इंदजालं संपण्णं ।

(नायिका लज्जते।)

कुरङ्गिका—सहि कप्पूरमंजरि ! अब्भुट्ठाणेण संभावेहि भट्टारअं ।

(नायिका उत्थातुमिच्छति।)

राजा—(हस्ते गृहीत्वा।)

उट्ठिऊण थणभारभंगुरं मा मिअंकमुहि ! भंज मज्झअं ।
तुज्झ ईदिसणिवेसदंसणे लोअणाण मअणो पसीददु ॥ २१ ॥

अवि अ,—

जिस्सा पुरो हरदि णो हरिआललच्छी
रोसाणिअं ण कणअं ण अ चंपआई ।

नीलकण्ठेन निजदेहं लम्भितो मनोभवः? किं वा हृदयस्य दुर्जनो नयनानां सज्जनो मां संभावयति ? सखि कुरङ्गिके ! इदमिन्द्रजालमिव पश्यामि ।

तुष्टेन रत्यादिस्तुल्या तुष्टेनेत्यर्थः । 'किं वारुष्टेन' इति पाठेऽरुष्टेनेत्यकारप्रश्लेषः । तथापि रत्यादिस्तुल्या रोषरहितेनेत्यर्थः । अथवा नाकारप्रश्लेषः । किं तु रुष्टेन क्रुद्धेन नीलकण्ठेन पुनः शरीरमुत्पाद्य पुनर्दाहेनाधिकतरपीडादानाय पुनः स्वदेहं प्रापितो मनोभव इत्यर्थः ।

विदूषकः—
भवति ! सत्यमिन्द्रजालं संपन्नम् ।
कुरङ्गिका—
सखि कर्पूरमञ्जरि ! अभ्युत्थानेन संभावय भट्टारकम् ।
राजा—

उत्थाय स्तनभारभङ्गुरं मा मृगाङ्कमुखि ! भञ्जय मध्यम् ।
त्वयेदानिवेशदर्शनालोचनयोर्मदनः प्रसीदतु ॥

अपि च,—

यस्याः पुरो न हरिता दलिता हरिद्रा
उज्ज्वलीकृतं न कनकं न च चम्पकानि ।

---

1 'हरिदा दलिअ हलिदा' इति टीकाकृतः पाठः ।

ताइं सुवण्णकुसुमोहिं विलोअणाइं
अच्चेमि जेहिं हरिणच्छि ! तुमं सि दिट्ठा ॥ २२ ॥

विदूषकः—गब्भहरवासेण सेअसलिलसित्तगत्ता संभूदा तत्तभोदी कप्पूरमंजरी। ता इमं सिचअंचलेण विज्जिस्सं दाव। (तथा कुर्वन्।) हा हा, कहं वरिलपवणेण णिव्वाणो पदीवो। (विचिन्त्य सगतम्।) भोदु, लीलुज्जाणं जेव गच्छम्ह। (प्रकाशम्।) भो, अधआरणचिदं वट्टदि। ता णिक्कम्ह सुरंगामुहेण जेव पमदुज्जाणं दाव।

(सर्वे निष्क्रमण नाटयन्ति।)

राजा—(कर्पूरमञ्जरीं करे धृत्वा।)

मज्झ हत्थठिदपाणिपल्लवा ईसि संचरणचेंचुरा भव।
जं चिराअ कलहंसमंडली भोदु केलिगमणम्मि दूहवा ॥ २३ ॥

(स्पर्शसुखमभिनीय।)

जे णवस्स तउसस्स कंटआ जे कंदंबकुसुमस्स केसरा।
अज्ज तुज्झ करफंससक्खिणो ते हवंतु मह अगणिज्जिदा ॥ २४ ॥

तानि सुवर्णकुसुमविलोचने
अर्चयामि याभ्यां हरिणाक्षि ! त्वमसि दृष्टा ॥

विदूषकः—

गर्भगृहवासेन स्वेदसलिलसिक्तगात्रा संभूता तत्रभवती कर्पूरमञ्जरी। तदिमां सिचयाञ्चलेन वीजयिष्यामि तावत्, हा हा, कथं वस्त्राञ्चलपवनेन निर्वाण प्रदीप ! भवतु, लीलोद्यानमेव गच्छाम। भो, अन्धकारमेतत् वर्तते। तन्निष्क्रामाम, सुरङ्गामुखेनैव प्रमदोद्यानं तावत्।

राजा—

मम हस्तस्थितपाणिपल्लवा ईषत्सञ्चरणचतुरा भव।
यच्चिराय कलहंसमण्डली भवतु केलिगमने दुर्भगा ॥
ये नवस्य त्रपुसस्य कण्टका ये कदम्बकुसुमस्य केसराः।
अद्य तव करस्पर्शसक्षिणस्ते भवन्तु मम अगणितव्रता ॥

---

1 "हवंतु" इति टीकासंमतः पाठः। 2 'कदंबकुसुमस्स' इति टीकासंमतः पाठः। 3 'कुसुमेसु' इति टीकासंमतः पाठः। 'मह अंगसंगिणो', 'अणु णिच्चिअ हुअ' इत्यपि पाठौ कश्चित्।

(नेपथ्ये।)

वैतालिकः—सुहणिवंधणो भोदु देवस्स चंदुज्जोओ।
भूगोले तिमिराणुवंधमलिणे भूमीहरे व्व ट्ठिदे
संजादा णवभुज्जपिंजरमुही जोण्हाइं पुव्वा दिसा।
मुंचंतो मुचुकुंदकेसरसिहासोहाणुकारे करे
चंदो एक्ककलाकमेण अ गदो संपुण्णविंवत्तणं ॥ २५ ॥

अवि अ,—

अकुंकुममचंदणं दसदिसावहूमंडणं
अकंकणमकुंडलं भुवणमंडलीभूसणं।
असोसणममोहणं मअरलंछणस्साउहं
मिअकिरणावली णहअलम्मि पुंजिज्जदि ॥ २६ ॥

कार्ये कारणवदुपचारादेहजन्यरोमाञ्चनिर्जिता इत्यर्थः।

वैतालिकः—

सुखनिबन्धनो भवतु देवस्य चन्द्रोद्द्योतः।
भूगोले तिमिरानुबन्धमलिने भूमिरह इव स्थिते
संजाता नवभूर्जपिञ्जरमुखी ज्योत्स्नया पूर्वा दिशा।
मुञ्चन्मुचुकुन्दकेसरश्रीशोभानुकारान्करां-
श्चन्द्रः पश्य कलाक्रमेण च गतः संपूर्णबिम्बत्वम् ॥

तिमिरस्यानुबन्धस्तेन मलिने भूगोले भूमिरह इव स्थिते। चन्द्रोदयानन्तरं यथा पृथ्वीमात्रमेव नीलमीक्ष्यते तथा श्यामे भूगोले स्थिते सतीत्यर्थः। 'भूमीघरे' इति वा पाठः, तत्र भूमिगृहे इत्यर्थः। एककलादिकलाभ्युदयक्रमेणेति कलाक्रमेणेत्यस्यार्थः।

अपि च,—

अकुङ्कुममचन्दनं दशदिशावधूमण्डनं
अकङ्कणमकुण्डलं भुवनमण्डलीभूषणम्।
अशोषणममोहनं मकरलाञ्छनस्यायुधं
मृगाङ्किरणावली नभस्तले पुञ्जीभवति ॥

---

1 'भूमीघरे' इति दीपिकासंमतः पाठः। 2 "मकरलाञ्छनोद्दीपनकरे" इति दीपिकानुगतः पाठः। 3 "देवस्य कान्ता" इति दीपिकाभिमतः पाठः।

विदूषकः—भो, एसा कञ्चणचण्डेण वण्णिदा चदुज्जोअलच्छी । ता संपद माणिक्कचण्डस्सावसरो ।

(नेपथ्ये ।)

द्वितीयो वैतालिकः—

डज्झतागुरुधूववट्टिवलआ दिज्जतदीवुज्जला
लंविज्जंतविचित्तमोत्तिअलदा मुच्चतपारावआ ।
सज्जिज्जंतमणोज्जकेलिसअणा जप्पतदूईसआ
सेज्जुच्छंगवलंतमाणिणिजणा वट्टंति लीलाहरा ॥ २७ ॥

'अवकुङ्कुम' इत्यनेन नवोद्गतायास्तस्या पीतत्वं ध्वन्यते। 'अचन्दनं' इत्यनेन चन्दनाधिकशीतलता द्योत्यते । 'दश'शब्देन चैकवधूमात्रशोभाकरमण्डनान्तरवैलक्षण्यं द्योत्यते । 'अवद्धं' इत्यादिना भूषणान्तरवैचित्र्यमस्या अभिव्यज्यते । 'अशोषण' इत्यादिनायुधवैलक्षण्यं चास्या द्योत्यते ।

विदूषक —

भो, [एषा] काञ्चनचण्डेन वर्णिता चन्द्रोद्योतलक्ष्मीः । तत्साम्प्रतं माणिक्यचण्डस्यावसरः ।

द्वितीयो वैतालिक —

दह्यमानागुरुधूपवर्तिकलिका दीयमानदीपोज्ज्वला
लम्ब्यमानविचित्रमौक्तिकलता मुच्यमानपारावता ।
सज्जीक्रियमाणमनोज्ञकेलिशयना जल्पद्दूतीयुता
शय्योत्सङ्गवलन्मानिनीजना वर्तन्ते लीलागृहाः ॥

दह्यमाना अगुरुधूपवर्तय एव कलिका येषु । यद्वा,—दह्यमानेत्यादि उज्ज्वला इत्यन्तमेकं पदम्। तदा दह्यमानागुरुधूपार्थं ये वर्तिकलिकाभिर्दीयमानदीपोज्ज्वलगेहेत्यर्थः । अथवा दह्यमानागुरुधूपयुक्तवर्तिकलिकाभिरेव दीयमानदीपोज्ज्वला इत्यर्थः । तदा शोभाधिक्यं व्यज्यते ।

---

1 "वर्तिकलिका' इति टीकानुसारी पाठः । 2 'सज्जीहरा'इत्यपि पाठः ।

अवि अ,—

देंता कप्पूरपूरच्छुरणमिव दिसासुंदरीणं मुहेसुं
लण्हं जोण्हं किरंता भुअणजणमणाणंदणं चंदणं च ।
जुण्णं कंदप्पकंदं तिहुअणकलणाकंदलिल्लं कुणंतो
जादा एणंकपादा सरअजलहरम्मुक्कधाराणुकारा ॥ २८ ॥

विदूषकः—

[1]दिसअवअंसो णहसरहंसो ।
णिहुअणकंदो [2]वड्ढइ चंदो ॥ २९ ॥

कुरङ्गिका—

ससहररइअमरट्टो माणिणिमाणघरट्टो ।
णवचंपअकोअंडो मअणो जअइ पचंडो ॥ ३० ॥

अपि च,—

ददतः कर्पूरपूरच्छुरणमिव दिशासुन्दरीणां मुखेषु
श्लक्ष्णां ज्योत्स्नां किरन्तो भुवनजनमनआनन्दनं चन्दनमिव ।
जीर्णं कंदर्पकन्दं त्रिभुवनकलनाकन्दलितं कुर्वन्तो
जाता एणाङ्कपादाः सजलजलधरोन्मुक्तधारानुकाराः ॥

श्लक्ष्णां कोमलां ज्योत्स्नां किरन्त इति संबन्धः । तादृशास्ते कीदृशा इव कर्पूरपूरच्छुरणं ददत इवेति विशिष्टवैशिष्ट्यन्यायेन संबन्धः । 'दिशासुन्दरीणाम्' इत्युभयत्र संबध्यते । त्रिभुवनेति । विना कामं वस्यापि सृष्टेरभावात् । कन्दलयन्तः पल्लवयन्तः इत्यनेन कामिनां कामातिशयजनकत्व किरणानां व्यङ्ग्यम् । जलधरोन्मुक्तधारासाम्येन मेघाथप्रतिहतत्वं तेषु द्योत्यते ।

विदूषकः—

दिग्वधूहंसो नभःसरोहंसः ।
निभुवनकन्दः प्रसरति चन्द्रः ॥

कुरङ्गिका—

शशधररचितगर्वो मानिनीमानघरट्टः ।
नवचम्पककोदण्डो मदनो जयति प्रचण्डः ॥

---

1 'सअजल' इति टीकाद्धृतः पाठः । 2 'दिसवहुतंसो' इति टीकापाठः । 3 'पसरइ' इति टीकाभिमतः पाठः ।

(कर्पूरमञ्जरीं प्रति।) पिअसहि! तए कदं चंदवण्णणं महाराअस्स पुरदो पढिस्सं।

(कर्पूरमञ्जरी लज्जते। कुरङ्गिका पठति।)

मंडले ससहरस्स गोरए दंतपंजरविलासचोरए।
भादि लांछणमओ फुरंतओ केलिकोइलतुलं धरंतओ॥ ३१॥

राजा—अहो, कप्पूरमंजरीए अहिणवअत्थदंसणं, उत्तिविचित्तत्तणं रमणीओ सद्दो, रसणिस्संदो अ। (तां प्रति।)

मा कहिं पि वअणेण विब्भमो होहि इत्ति तुह णूणमिंदुणा।
लंछणच्छलमसीविसेसओ पेक्ख विंबवलए णिए कदो॥ ३२॥

किं च,—

[1]पंडुरंगि! जइ रज्जए मुहं कोमलंगि! खडिआरसेण दे।
दिज्जए पुण कवोलफज्जलं ता लहेज्ज ससिणो विडंबणं॥ ३३॥

(चन्द्रमुद्दिश्य।)

घरट्टः पेषणकर्ता।

प्रियसखि! त्वया कृते चन्द्रवर्णनं महाराजस्य पुरतः पठिष्यामि।

मण्डले शशधरस्य गौरे दन्तपञ्जरविलासचौरे।
भाति लाञ्छनमृगः स्फुरन्केलिकोकिलतुलां धारयन्॥

राजा—

अहो कर्पूरमञ्जर्या अभिनवार्थदर्शनम्, रमणीयः शब्दः, उक्तिविचित्रता, रसनिष्यन्दश्च।

मा कथमपि वदनेन विभ्रमो भवत्विति तव नूनमिन्दुना।
लाञ्छनच्छलमषीविशेषकः पश्य बिम्बफलके निजे कृतः॥

किं च,—

पाण्डुरेण यदि रज्यते मुखं कोमलाङ्गि! खटिकारसेन ते।
दीयते पुनः कपोलकज्जलं तदा लभते शशिनो विडम्बनम्॥

---

1 "इंगणं, रमणीओ सद्दो उत्तिविचित्तदा रस" इति टीकापाठः। 2 "विंबफलए" इति टीकापाठः। 3 "पंडुरेव" इति टीकानुगः पाठः।

मुक्कसंक ! हरिणंक ! किं तुवं सुंदरीपरिसरेण हिंडसे ।
[1]गोरगंडपरिपंडुरत्तणं पेच्छ दिण्णमिमिणा मुहेण दे ॥ ३४ ॥

(नेपथ्ये महान्कलकलः । सर्वे आकर्णयन्ति ।)

राजा—किं पुण एसो महाकोलाहलो ?

कर्पूरमञ्जरी—(ससाध्वसम् ।) पिअसहि ! एदं अवगमिअ आगच्छ ।

(कुरङ्गिका निष्क्राम्य प्रविशति ।)

विदूषकः—देवीए पिअवअस्सस्स वंचणा किदेत्ति तक्केमि ।

कुरङ्गिका—पिअसहि ! एदं जेव पिअवअस्सस्स वंचणा गदं

मुक्तशङ्क ! हरिणाङ्क ! किं त्वं सुन्दरीपरिसरेण हिण्डसे ।
गौरगण्डपरिपाण्डुरत्वं पश्य दत्तमसुना मुखेन ते ॥

अनेन सुन्दरीमुखेन ते तुभ्यं गौरगण्डपरिपाण्डुरत्वं दत्तमिति त्वमेव पश्येति वाक्यार्थः कर्म । तादृशसुन्दरीसविधे त्वं किं कुतो न परिभ्रमसि ? अत्यनुचितं करोषीति भावः । अत एव साभिप्रायं संबोधनमाह—**मुक्तशङ्केति** । एतादृशं वस्तु यतः प्राप्तं तत्र भक्तिर्नास्तीति किमुच्यते ? शङ्कापि लोकलज्जापि ते नास्तीति महदाश्चर्यमिति भावः । यद्वा,-यदेकदेशमुखैकदेशेनापि तवैतावद्दत्तं तन्निकटाटनेन विशेषान्तरप्राप्तिरपि सभाव्यते । तदपि त्वं नाचरसीति महानज्ञस्त्वमिति भावः ।

राजा—
किं पुनरेष महाकोलाहलः ?

कर्पूरमञ्जरी—
प्रियसखि ! एतदवगम्यागच्छ ।
एतत् कलकलविषयवस्तु ।

विदूषकः—
देव्या प्रियवयस्यस्य वञ्चना कृतेति तर्कयामि ।

कुरङ्गिका—
प्रियसखि ! भट्टारकस्य वञ्चनां कृत्वा त्वया सह सङ्गमं ज्ञात्वागच्छति देवी । तेन कुब्जवामनकिरातवर्षवरसौविदल्लानामेष कोलाहलः ।

---

1 'तुज्झ विअ" इत्यपि पाठः । 2 'भट्टारअस्स वचणं अदुअ तुए सह संगम जाणिअ आअच्छदि' इति टीकापाठः ।

अवगमिअ ओअच्छदि । ता कुज्जवामवकिरादवरिसघरसोविदल्लाणं एस हल्बोलो ।

कर्पूरमञ्जरी—(सभयम्।) ता मं पेसेदु महाराओ जेण अहं इमिणा सुरंगामुहेण ज्जेव पविसिअ रक्खाघरं गच्छामि । जाव देवी महाराएण सह संगमं ण जाणादि ।

(इति निष्क्रान्ता. सर्वे ।)

इति तृतीयं जवनिकान्तरम् ।

कर्पूरमञ्जरी—

तन्मां प्रेषयतु महाराजो येनाहमनेन सुरङ्गामुखेनैव प्रविश्य रक्षागृहकं गच्छामि । यथा देवी महाराजेन सह सगमं न जानाति ।

इति श्रीमद्विद्वद्वृन्दवन्दितारविन्दसुन्दरपदद्वन्द्वचन्द्रमनिमयदा प्रकाशसारकटोर-किरणकरप्रभप्रतिभप्रभाकरभट्टात्मजवासुदेवविरचिते कर्पूरमञ्जरी-प्रकाशे तृतीयं जवनिकान्तरं समाप्तम् ।

---

1 'आअच्छदि देवी' इति टीकासंमतः ।

चतुर्थं जवनिकान्तरम्

(ततः प्रविशति राजा विदूषकश्च ।)

राजा—[1]अहो, गाढअरो गिम्हो, पवणो अ पअंडो । ता कधं णु सहिदव्वो ? जदो,—

इह कुसुमसरैकगोअराणं इदमुभअं पि हु दूसहं ति मण्णे ।
जरढरइकरालिदो अ कालो [2]सुहअजणेण पिएण विप्पलंभो ॥ १ ॥

विदूषकः—एके दाव वम्महस्स वहणिज्जा, अण्णे तावसोसणिज्जा । अम्हारिसो उण जणो ण कामस्स वाहणिज्जो ण तावस्स सोसणिज्जो ।

(नेपथ्ये ।)

ता किं णुं खु दे समूलुप्पाडिदचूंडिअं सीसं करइस्सं ।

राजा—

अहो, गाढतरो ग्रीष्मः, पवनश्च प्रचण्डः । तत्कथं नु सोढव्यः ? यतः,—

इह कुसुमशरैकगोचराणामिदमुभयमपि सुदुःसहमिति मन्ये ।
जरठरविकरालितश्च कालस्तथा च जनेन प्रियेण विप्रलम्भः ॥

विदूषकः—

एके तावन्मदनस्य बाधनीयाः, अन्ये तापशोषणीयाः । अस्मादृशः पुनर्जना न कामस्य बाधनीयो न तापस्य शोषणीयः ।

नेपथ्ये—

तर्हि न खलु ते समूलोत्पाटितचूलिकाविकलं शीर्षं करिष्ये ।

---

1 अत्र 'गाढअरुम्हो गिम्हो पवला मअणं कहं णु सोढव्वो ।
सा उण सारंगच्छो एक्क घरे वि दुलहा विहिणा ॥' इति पाठः ।
2 'तह अ जणेण' इति टीकापाठः । 3 ण खु' इति टीकाधृतः पाठः । 4 "चूलिभावि-अलं' इति टीकापाठः ।

राजा—(विहस्य।) वअस्स! लीलावणसच्छंदचारिणा केलिसूएण किं भणिअं?

विदूषकः—(सक्रोधम्।) आ दासीए उत्त! सूलाअरणजोग्गो सि।

(नेपथ्ये।)

सव्वं तुम्हारिसाहिंतो संभावीअदि, जदि मे ण होंति पक्खावलीओ।

राजा—(विलोक्य।) कधं उड्डीणो विअ। (विदूषकं प्रति।)

णिसा तलिणविरथरा तह दिणेसु वड्ढत्तणं
ससी लहइ खंडणं तह अखंडबिंबो रई।
णिदाहदिअसेसु विप्फुरइ जस्स एस कमो
कहं ण स विही तदो खुरसिहाहि खंडिज्जदि॥ २॥

किं च, णिउणं सेवणिज्जो जइ सुहअसंगमो मोदि। जदो,—

राजा—
वयस्य! लीलावनसच्छन्दचारिणा केलिशुकेन किं भणितम्?

विदूषकः—
आः दास्याःपुत्र! शलाकरणयोग्योऽसि।

नेपथ्ये—
सर्वं गुल्मादरोभ्यः संभाव्यते, यदि मे न भवन्ति पक्षावल्यः।

राजा—
कथमुड्डीन एव।

निशास्तटिनविस्तारास्तथा दिनेषु वृद्धत्वं
शशी लभते खण्डनं तथा चण्डबिम्बो रविः।
निदाघदिवसेषु विस्फुरति यस्य क्रमः
कथं न स विधिस्तदा क्षुरशिखाभिः खण्ड्यते॥

किं च निपुणं सेवनीयो यदि सुखसंगमो भवति।

सुखः संगमो यस्य। तादृशे च स्त्रीपुरुषसंगमे प्रवर्तेत इति भावः। सुखः संगमो दर्शनादिर्वा।

---

१ 'जइ अ पक्खविणो रई' इति टीकाकृतः पाठः।

मज्झण्णे सिरिखंडपंककलणा आ संझमोल्लंसुअं
लीलामज्जणमा पओससमअं साअं सुरा सीअला ।
गिम्हे पच्छिमजामिणीणिहुवणं जं किं पि पंचेसुणो
एदे पंच सिलीमुहा विजइणो सेसा सरा जज्जरा ॥ ३ ॥

विदूषकः—मा एवं भण,—

पंडुच्छविच्छुरिदणाअलदादलाणं
साहारतेल्लपरिपेसलपोप्फलाणं ।
कप्पूरपंसुपरिवासिदचंदणाणं
भद्दं णिदाहदिवसाण वअस्स ! भोदु ॥ ४ ॥

यतः,—

मध्याह्ने श्रीखण्डपङ्ककलना आ संध्यमाद्रांशुकं
लीलामज्जनमा प्रदोषसमयं सायं सुरा शीतला ।
ग्रीष्मे पश्चिमयामिनीनिधुवनं यत्किमपि पञ्चेषो-
रेते पञ्च शिलीमुखा विजयिनः शेषाः शरा जर्जराः ॥

ननु कंदर्पस्य पञ्चाधिकानां शराणामेवाभावात्कथं 'शेषाः शरा जर्जराः' इत्युक्तमिति चेन्न, कार्यक्षमपञ्चशरवत्तामात्रादेव पञ्चशरत्वव्यवहारोपपत्तावतिरिक्तशराभावकल्पने मानाभाव इत्यभिप्रायात् । यद्वा,—पञ्चैवेषवो मदनस्य, तथापि कालभेदेनान्यानन्यानुपादत्त इति पूर्वस्वीकृतेषु जर्जरता युक्तैवेति न कोऽपि दोषः ।

विदूषकः—

मैवं भण,—

पाण्डुच्छविच्छुरितनागलतादलानां
सहकारतैलपरिपेशलपूगफलानाम् ।
कर्पूरपांसुपरिवासितचन्दनानां
भद्रं निदाघदिवसानां वयस्य ! भवतु ॥

पाण्डुच्छवीत्यादि हेतुगर्भविशेषणानि । तथा च यत एतादृशा अत एषां भद्रं भवत्वित्यर्थः ।

---

1 'फरिससीअला' इति पाठः ।

राजा—एदं पुण एत्थ रमणिज्जं,—

सपंचमतरंगिणो सवणसीअला वेणुणो
समं सिसिरवारिणा वअणसीअला वारुणी ।
सचंदणघणत्थणी सअणसीअला कामिणी
णिदाहदिवसोसहं सअलसीअलं कस्स वि ॥ ५ ॥

भवि अ,—

लीलुत्तंसे सिरिम्मं सिहिणपरिसरे सिंधुवाराण हारो
अंगे ओलं चरिल्लं रमणपणइणी मेहला उप्पलेहिं ।
दोहुं दोयंदलीसुं णवविसवलआ कामविज्जो मणोज्जो
तावातंकेऊतंतं महुसमअगदं एस वेसोऽबलाणं ॥ ६ ॥

राजा—

इदं पुनरत्र रमणीयम्,—

सपञ्चमतरङ्गिणः श्रवणशीतला वेणवः
समं शिशिरवारिणा वदनशीतला वारुणी ।
सचन्दनघनस्तनी शयनशीतला कामिनी
निदाघदिवसौषधं सकलशीतलं कस्यापि ॥

कस्यापीत्यपिपर्यायं । शीतले यद्वस्तु तन्निदाघदिवसौषधम् । तापशमनायेति शेषः । कस्य वा न भवति ? अपि तु सर्वस्यापि भवतीति भावः ।

अपि च,—

विदूषकः—अहं पुण भणामि—

मज्झण्हसण्हघणचंदणपंकिलाणं
साअं णिसेविअणिरंतरमज्जणाणं ।
सामासु वीअणअवारिकणुक्खिदाणं
दासत्तणं कुणदि पंचसरो बहूणं ॥ ७ ॥

राजा—(स्मरणमभिनीय ।)

पच्चगं णवरूवभंगिघडणारंभे जणे संगमो
जाणं ताणँ खणं व रत्तिदिअहा गच्छंति दीहा अवि ।
जाणं ते अ मणं पि देंति ण रइं चित्तस्स संताविणो
ताणं जंति मणोरहेक्कजणणा मासोवमा वासरा ॥ ८ ॥

(विदूषकं प्रति ।) वअस्स ! अत्थि तग्गदा का वि वत्ता ?

विदूषकः—अत्थि, सुणादु पिअवअस्सो । कहेमि सुहासिअं दे ।

विदूषकः—
अहं पुनर्भणामि—

मध्याह्नश्लक्ष्णघनचन्दनपङ्किलानां
सायं निषेवितनिरन्तरमज्जनानाम् ।
श्यामासु व्यजनजवारिकणोक्षितानां
दासत्वं करोति पञ्चशरोऽबलानाम् ॥

राजा—

प्रत्यङ्गं नवरूपभङ्गिघटनारम्ये जने संगमो
येषां तेषां क्षणमिव झटिति दिवसा वर्तन्ते दीर्घा अपि ।
येषां ते च मनसि ददति न रतिं चित्तस्य संतापिन-
स्तेषां यान्ति जगन्ति दीर्घतमा मासोपमा वासराः ॥

वयस्य ! अस्ति तद्गता कापि वार्ता ?

विदूषकः—

अस्ति, शृणोतु प्रियवयस्यः । कथयामि सुभाषितं ते । यतःप्रभृति कर्पूरमञ्जरी

---

1 'झत्ति दिअहा वट्टंति दीहा' इति टीकानुगुणः पाठः । 2 'जअम्मि दीहरतमा मासोवमा' इति टीकादृतः पाठः ।

जो सा कप्पूरमंजरीए रक्खाभवणे सुरंगा दिण्णा सा देवीए दिट्ठा ! तदो पहुदि तं सुरंगादुआरं देवीए पिहुलसिलासंचएण णीरंधं करिअ पिहिद। अणंगसेणा, कलिंगसेणा, कामसेणा, वसंतसेणा, विब्भमसेण त्ति पच सेणाणामधेआओ चामरधारिणीओ फरकिदफरआ करवालहत्थपाइक्कसहस्सेण सह कारामदिरस्स रक्खाणिमित्तं पुव्वदिसि णिउत्ताओ ।

अणगलेहा, चित्तलेहा, चन्दलेहा, मिअङ्कलेहा, विब्भमलेहे त्ति लेहणामधेआओ पंच सेरधीओ पुलिंदसिलीमुहधणूहत्थेण णिविडणिबद्धतूणीरदुद्धरेण धाणुक्कसहस्सेण सम दक्खिणाए दिसाए णिवेसिदाओ ।

कुंदमाला, चंदणमाला, णुवलअमाला, कचणमाला, बउलमाला, मंगलमाला, माणिक्कमाल त्ति सत्त मालतणामधेआओ णवणिसिदकुनहत्थपाइक्कसहस्सेण सम तंबूलरंकचाहिणीओ मज्झिमाए दिसाए णिवेसिदाओ ।

अणगकेली, मयरकेली, कदप्पकेली, सुंदरकेली, कंदोट्टकेलि त्ति

रक्षाभवनात्सुरङ्गाद्वारे देव्या दृष्टा, तत प्रभृति तत्सुरङ्गाद्वारं देव्या पृथुलशिलासंचयेन नीरन्ध्रं कृत्वा पिहितम् । अनङ्गसेना, कलिङ्गसेना, कामसेना, वसन्तसेना, विभ्रमसेनेति पञ्च सेनानामधेयाश्चामरधारिण्य स्फारस्फुरत्करवालहस्तपदातिसहस्रेण सह कारामन्दिरस्य रक्षानिमित्तं पूर्वदिशि नियुक्ता ।

अनङ्गलेखा, चित्रलेखा, चन्द्रलेखा, मृगाङ्कलेखा, विभ्रमलेखेति लेखानामधेया पञ्च संकल्प्य पृथुलशिलीमुखधनुर्हस्तेन निबिडनिबद्धतूणीरदुर्धरेण धानुष्कसहस्रेण सम दक्षिणस्यां दिशि निवेशिता ।

कुन्दमाला, चन्दनमाला, नुवलयमाला, काञ्चनमाला, बकुलमाला, मङ्गलमाला, माणिक्यमालेति सप्त मालेति नामधेया नवनिशितकृन्तहस्तपदातिसहस्रेण सम ताम्बूलकरङ्कवाहिन्य पश्चिमायां दिशि निवेशिता ।

अनङ्गकेलि, मदनकेलि, मकरकेलि, सुन्दरकेलि, कन्दर्पकेलिरिति पञ्च

---

1 'अतो पहुदि कप्पूरमञ्जरी' इति पाठान्तरम् । 2 'सम्प्रति सुरंगाद्वारे देव्या दृष्टे' इति पाठान्तरम् ।

पंच केलीअंतणामधेआओ मज्जणकारिणीओ फलअखग्गकम्पविदुरिल्लेण पाइक्कसहस्सेण समं उत्तरदिसाए आढत्ताओ ।

ताणं पि उण उवरि मदिरावदी, केलिवदी, कल्लोलवदी, तरंगवदी, अणंगवदी त्ति पंच वदीणामधेआओ परिचारिआकुमारीओ कणअवेत्तदंडहत्थाओ सुहासिअपढिआओ बंदीणामधेआओ सेणाए अज्झक्खीकदाओ ।

राजा—अहो देवीए सामग्गी अंतेउरोचिदा ।

विदूषकः—भो वअस्स ! एसा देवीए सारंगिअ णाम सही किं पि विण्णविदुं पेसिदा ।

(ततः प्रविशति सारङ्गिका ।)

सारङ्गिका—जअदु जअदु भट्टा । देव ! देवी विण्णवेदि—अज्ज चतुत्थदिअहे भविअवडसावित्तीमहूसवोवअरणाइं केलिविमाणं आरुहिअ देवेण पेक्खिदव्वाइं त्ति ।

केलीतिनामधेया मज्जनकारिण्यः फलकखड्गकम्पभीषणेन पदातिसहस्रेण सममुत्तरदिशयाज्ञप्ताः ।

तासामपि पुनरुपरि मदिरावती, केलिवती, कल्लोलवती, तरङ्गवती, अनङ्गवतीति पञ्च वतीतिनामधेयाः परिचारिकाकुमार्यः कनकवेत्रदण्डहस्ताः सुभाषितपाठिका वन्दीनामधेयाः सेनाया अध्यक्षीकृताः ।

राजा—

अहो देव्याः सामग्र्यन्तःपुरोचिता ।

विदूषकः—

भो वयस्य ! एषा देव्या सारङ्गिका नाम सखी किमपि निवेदितुं प्रेषिता ।

सारङ्गिका—

जयतु जयतु भर्ता । देव ! देवी विज्ञापयति—चतुर्थदिवसे भाविवटसावित्रीमहोत्सवोपकरणानि केलिविमानप्रासादमारुह्य प्रेक्षितव्यानीति ।

---

1 'णिवेदिदुं' इति टीकाभिमतः पाठः । 2 "विमाणप्पासादमारुहिअ' इति टीकापाठः ।

राजा—जं[1] देवी आदिसदि ।

(चेटी निष्क्रान्ता । उभौ प्रासादाधिरोहणं नाटयतः ।)

(ततः प्रविशति चर्चरी ।)

विदूषकः—

मुत्ताहलिल्लाहरणोज्जआओ लासावसाणे तलिणंसुआओ ।
सिंचंति अण्णोण्णमिमाउ पेच्छ जंतज्जलेणं मणिभाइणेहिं ॥ ९ ॥

इदो अ,—

परिब्भमंतीउ विचित्तबंधं इमाउ दोसोलह णच्चणीओ ।
खेलंति तालाणुगदप्पआओ तुहंगणे दीसदि दंडरासो ॥ १० ॥
समंससीसा समबाहुहत्था रेहाविसुद्धा अवराउ देंति ।
पंतीहिं दोहिं लअताल्बंधं परोप्परं साहिमुही हुवंति ॥ ११ ॥
मोत्तुण अण्णा मणिवारआइं जंतेहि धरासलिलं खिवंति ।
पडंति तीओ सहिआणमंगे मणोभुवो धोरणधाणचंगा ॥ १२ ॥

राजा—

यद्येव्याज्ञापयति ।

विदूषकः—

मुक्ताफलाभरणोज्ज्वला लास्यावसाने चलितांशुकाः ।
सिञ्चन्त्यन्योन्यमिमाः पश्य यन्त्रजलैर्मणिभाजनैः ॥

लास्यावसाने इमा अन्योन्यं सिञ्चन्तीति सम्बन्धः ।

तथा,—

परिभ्रमन्त्यो विचित्रबन्धं इमा द्विपोडश नर्तक्यः ।
खेलन्ति तालानुगतपदाम्बाङ्गणे दृश्यते दण्डरासः ॥
समांसशीर्षाः समबाहुहस्ता रेखाविशुद्धा अपराध्य ददति ।
पङ्क्तिभ्यां द्वाभ्यां लयतालबन्धं परस्परं साभिमुख्या भवन्ति ॥
मुक्त्वान्या मणिवारकानि यन्त्रधारासलिलं क्षिपन्ति ।
पतन्ति तासां प्रियाणमङ्गे मनोभुवो धारणधानचङ्गाः ॥

---

1 'अ देवी आणवेदि' इति दीक्षितपाठः । 2 'तासां प्रियाणामङ्गे' इति दीक्षितपाठः ।
3 "धारणधा" इति दीक्षितानुसृतः पाठः ।

इमा मसीकज्जलकालकाआ तिकंडचावाउ विलासिणीओ ।
पुलिंदरूवेण जणस्स हासं समोरपिच्छाहरणा कुणंति ॥ १३ ॥
हत्थे महामंसवली धराओ हुंकारफेक्कारख्वा रउद्दा ।
णिसाअरीणं पडिसीसएहिं अण्णा मसाणाभिणअं कुणंति ॥ १४ ॥
का वि वामिदकरालहुडुक्का रम्ममद्दलरवेण मअच्छी ।
[1]दोल्लआहिं पडिवाडिचलाहिं चल्लिकम्मकरणम्मि पअट्टा ॥१५॥
किंकिणीकज्झणज्झणसद्दा कंठगीदलअजंतिदताला ।
जोगिणीवलअणच्चणकेलिं तालणेउररवं विरअंति ॥ १६ ॥
कोदुहल्लवसजंगमवेसा [2]वेणुवादणपरा अवराओ ।
कालवेसवसहासिअलोआ ओसरंति पणमंति हसंति ॥ १७ ॥

(विहस्य ।)

सारङ्गिका—(पुरोऽवलोक्य ।) एसो महाराओ पुणो [3]मरगअपुंजादो कअलीघरं अणुप्पविट्ठो । ता अग्गदो गदुअ देवीए विण्णविअंवि-

---

इमा मषीकज्जलश्यामकायास्त्रिकाण्डचापाश्च विलासिन्यः ।
पुलिन्दरूपेण जनस्य हासं समयूरपिच्छाभरणाः कुर्वन्ति ॥
हस्ते महामांसबलिधारिण्यो हुंकारफेत्काररवा रौद्राः ।
निशाचरीणां प्रतिशीर्षकैरन्याः श्मशानाभिनयं कुर्वन्ति ॥
कापि वादितकरालहुडुक्का रम्यमर्दलरवेण मृगाक्षि ।
भ्रूलताभ्यां परिपाटीचलाभ्यां चेटीकर्मकरणे प्रवृत्ता ॥
किङ्किणीकृतरणज्झणशब्दाः कण्ठगीतलययन्त्रिततालाः ।
योगिनीवलयनर्तनकेलिं तालनूपुररवं विरचयन्ति ॥
कौतूहलवशचञ्चलवेषा वेणुवादनपरा अपराः ।
कालवेषवशहासितलोका अपसरन्ति प्रणमन्ति हसन्ति ॥

सारङ्गिका—

एष महाराजः पुनर्मरकतपुञ्जमेव गतः । कदलीगृहं चानुप्रविष्टः । तदग्रतो

---

1 'भूलदाहिं' इति टीकापाठः । 2 "चचलवेसा' इति टीकाधृतपाठः । 3 'मरगअपुंजं लेव गदो । कअलीघरं अ' इति टीकापाठः ।

ण्णवेमि। (उपसृत्य।) जअदु जअदु भट्टा। देवी विण्णवेदि जधा [1]सांवंसमए तुम्हे परिणाइदव्व त्ति।

विदूषकः—भोदि! किं एदं [2]अकंडकुम्हंडपडणं?

राजा—सारंगिए! सव्वं वित्थरेण कहेसु।

सारङ्गिका—एदं विण्णवीअदि,—अणंतरादिक्कंतचउद्दसीदिअसे देवीए पोम्मरांअमाणिक्कमअं गोरिं कदुअ भइरवाणंदेण पडिट्ठाविदा। सअं च दिक्खा गहिदा। तदा ताए विण्णत्तो जोईसरो गुरुदक्खिणाणिमित्तं। भणिदं च तेण—जदि अवस्सं गुरुदक्खिणा दाअव्वा ता एसा दीअदु महाराअस्स। तदो देवीए विण्णत्तं जं आदिसदि भअवं तं काअव्वं। पुणो वि उल्लविदं तेण। अत्थि एत्थ लाडदेसम्मि चंडसेणो णाम राआ। तस्स दुहिदा घणसारमंजरि त्ति। सा देवण्णएहि आइट्ठात्ति—एसा चक्कवट्टिघरिणी भविस्सदि त्ति। तदो सा महाराएण परिणेदव्वा जेण गुरु-

---

गत्वा देवीविज्ञापितं विज्ञापयामि। जयतु जयतु भर्ता। देवी विज्ञापयति यथा संध्यासमये यूयं मया परिणेतव्या इति।

विदूषकः—
भवति! किमेतदकालकूष्माण्डपतनम्?

राजा—
सारङ्गिके! सर्वं विस्तरेण कथय।

सारङ्गिका—
इदं विज्ञाप्यते,—अनन्तरातिक्रान्तचतुर्दशीदिवसे देव्या पद्मरागमणिमयी गौरी कृत्वा भैरवानन्देन प्रतिष्ठापिता। स्वयं च दीक्षा गृहीता। ततस्तया विज्ञप्तो योगीश्वरो गुरुदक्षिणानिमित्तम्। भणितं च तेन यथावदर्थं गुरुदक्षिणा दातव्या तदेषा दीयतां महाराजस्य। ततो देव्या विज्ञप्तं यदादिशति भगवान् [तत्कर्तव्यम्]। पुनरप्युपहितं तेन। अस्त्यत्र लाटदेशे चण्डसेनो नाम राजा। तस्य दुहिता घनसारमञ्जरी इति। सा दैवज्ञैरादिष्टा एषा चक्रवर्तिगृहिणी भविष्यतीति। ततो महाराजेन

---

1 'जं मए' इति टीकासम्मितः पाठः। 2 'अकाण्डकोदंडपडणं' इति टीकानुसारी पाठः। 3 'अममणिई' इति टीकापाठः।

दक्खिणा दिण्णा भविस्सदि, भट्टा वि चक्कवट्टी कदो होदि। तदो देवीए विहसिअ भणिदं जं आणवेदि भअवं तं कीरदि। अहं च विण्णविदुं पेसिदा। गुरुस्स गुरुदक्खिणा सा दिण्णा।

विदूषकः—(विहस्य।) ता उवक्खाणं। सीसे सप्पो देसंतरे वेज्जो। इह अज्ज विवाहो, लाडदेसे घणसारमंजरी।

राजा—किं ते भइरवाणंदस्स [2]पहावो परोक्खो। (तां प्रति।) कहिं संपदं भट्टावाणंदो!

सारङ्गिका—देवीए कारिदे पमदुज्जाणस्स मज्झट्ठिदे वडतरुमूले चामुंडाअदणे भइरवाणंदो देवीए समं आगमिस्सदि। ता अज्ज दक्खिणाविहिदो कोऊहलपरो विवाहो। ता इह ज्जेव्व देवेण ठादव्वं। (इति परिक्रम्य निष्क्रान्ता।)

राजा—वअस्स! सव्वं एदं भइरवाणंदस्स विजंभिदं ति तक्केमि।

परिणेतव्या, येन गुरुदक्षिणा दत्ता भविष्यति, भर्तापि चक्रवर्ती कृतो भवति। ततो देव्या विहस्य भणितं यदादिशति भगवान्। अहं च विज्ञापयितुं प्रेषिता गुरोर्गुरुदक्षिणानिमित्तम्।

विदूषकः—

एतत्तत्सविधानकं शीर्षे सर्पो देशान्तरे वैद्यः। इहाद्य विवाहो लाटदेशे घनसारमञ्जरी।

राजा—

किं ते भैरवानन्दस्य प्रभावो न प्रत्यक्षः? कुत्र साम्प्रतं भैरवानन्दः?

सारङ्गिका—

देव्या कारिते प्रमदोद्याने मध्यस्थिते वटतरुमूले चामुण्डायतने भैरवानन्दो देव्या सममागमिष्यति। तदद्य दक्षिणाविहितः कौतूहलपरो विवाहः। तदिहैव देवेन स्थातव्यम्।

राजा—

वयस्य! सर्वमेतद्भैरवानन्दस्य विजृम्भितमिति तर्कयामि।

---

1 'गुरुदक्खिणणिमित्तं' इति टीकानुगुणः पाठः। 2 'एदं तं संविधाणअं' इति टीकासम्मतः पाठः। 3 'पहाओण पच्चक्खो' इति टीकापाठः।

विदूषकः—एवं णेदं । ण हु मअलंछणमंतरेण अण्णो मिअंकमणिपुत्तलिअं पज्झरावेदि । ण हु सरअसमीरमंतरेण सेहालिआकुसुमोक्करं विकासेदि ।

(ततः प्रविशति भैरवानन्दः ।)

भैरवानन्दः—इअं सा वडतरुमूले णिम्मिण्णस्स सुरंगादुआरस्स धाणे चामुंडा । (हस्तेन प्रणम्य पठति ।)

कप्पंतकेलिभवणे कालस्स पुरोऽसुराण रुहिरसुरं ।
जयइ पिअंती चंडी परमेट्ठीकवालचसएण ॥ १८ ॥

प्रविश्योपविश्य ।) अज्ज वि ण णिग्गच्छदि सुरंगादुवारेण कप्पूरमंजरी ।

(ततः प्रविशति सुरङ्गोद्घाटितकेन कर्पूरमञ्जरी ।)

कर्पूरमञ्जरी—भअवं ! पणमिज्जसि ।

भैरवानन्दः—उइदं वरं लहेसु । इह जेव उपविस ।

(कर्पूरमञ्जरी तथा करोति ।)

विदूषकः—

एवमेतत् । न खलु मृगलाञ्छनमन्तरेणान्यो मृगाङ्कमणिपुत्तलीं प्रस्वेदयति । न खलु शरत्समीरमन्तरेण शेफालिकाकुसुमोत्करं विकासयति ।

भैरवानन्दः—

इयं सा वटतरुमूले निर्भिन्नस्य सुरङ्गाद्वारस्य विधाने चामुण्डा ।

कल्पान्तकेलिभवने कालस्य पुराणरुधिरसुराम् ।
जयति पिबन्ती चण्डी परमेष्ठिकपालचषकेण ॥

अद्यापि न निर्गच्छति सुरङ्गाद्वारेण कर्पूरमञ्जरी ।

कर्पूरमञ्जरी—

भगवन्! प्रणम्यते ।

भैरवानन्दः—

उचितं वरं लभस्व । इहैवोपविश ।

---

1 पुराणरुधिरसुरां इति टीकाद्धृतः पाठः ।

भैरवानन्दः—(स्वगतम्।) अज्ज वि ण एदि देवी।

(प्रविश्य।)

राज्ञी—(परिक्रम्यावलोक्य च।) अए, इअं भअवदी चामुंडा। (प्रणम्यावलोक्य च।) अध इअं कप्पूरमंजरी। ता किं णेदं। (भैरवानन्दं प्रति।) इदं विण्णवीअदि, णिअभवणे विवाहसामग्गिं कदुअ आअद म्हि। तदो गेण्हिअ आगमिस्सं।

भैरवानन्दः—वच्छे! एवं कीरदु।

(राज्ञी व्यावृत्य परिक्रामति।)

भैरवानन्दः—(विहस्य। स्वगतम्।) इअं कप्पूरमंजरीघरं अण्णेसिदुं गदा (प्रकाशम्।) पुत्ति कप्पूरमंजरि! सुरंगादुवारेण ज्जेव तुरिदपदं गदुअ णिअभवणे चिट्ठ। देवीआगमणे पुणो आगंतव्वं।

(कर्पूरमञ्जरी तथा करोति।)

देवी—इदं रक्खाघरं (प्रविश्यावलोक्य च) अए, इअं कप्पूरमंजरी। सा का वि सारक्खिआ मए दिट्ठा। (प्रकाशम्।) वच्छे कप्पूरमंजरि! कीदिसं

भैरवानन्दः—
अद्यापि नागच्छति देवी।

राज्ञी—
अये, इयं भगवती चामुण्डा। अथ इयं कर्पूरमञ्जरी। तत्किमिदम्? इदं विज्ञाप्यते—निजभवने विवाहसामग्रीं कृत्वा आगतासि। ततस्तां गृहीत्वाऽऽगमिष्यामि।

भैरवानन्दः—
वत्से! एवं क्रियताम्।

भैरवानन्दः—
इयं कर्पूरमञ्जरीस्थानमन्वेष्टुं गता। पुत्रि कर्पूरमञ्जरि! सुरङ्गाद्वारेणैव त्वरितपदं गत्वा स्वस्थाने तिष्ठ। देव्यागमने पुनरागन्तव्यम्।

देवी—
इदं रक्षागृहम्। अये, इयं कर्पूरमञ्जरी। सा कापि सदृशा मया दृष्टा। वत्से कर्पूरमञ्जरि! कीदृशं ते शरीरम्?

---

1 "मञ्जरीठाणं" इति टीकाकृतः पाठः। 2 'सट्ठाणे' इति टीकानुगुणः पाठः।

ते सरीरं ? (आकाशे।) किं भणसि—मह सरीरे वेअणा समुप्पण्ण त्ति ?

राज्ञी—(स्वगतम्।) ता पुणो तहिं गमिस्सं। (प्रविश्य पार्श्वतोऽवलोक्य च।) हला सहीओ! विवाहोवकरणाइं लहु गेण्हिअ आअच्छध। (इति परिक्रामति।)

(प्रविश्य कर्पूरमञ्जरी तथैवास्ते।)

राज्ञी—(पुरोऽवलोक्य।) इअं कप्पूरमंजरी।

भैरवानन्दः—वच्छे विब्भमलेहे! आणीदाइं विवाहोवअरणाइं?

राज्ञीः—अध इं। किं पुण घणसारमंजरीसमुचिदाइं आहरणाइं विसरिआइं। ता पुणो गमिस्सं।

भैरवानन्दः—एवं भोदु।

(देवी नाटितेन निष्क्रामति।)

आकाश इति। 'किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत्। श्रुत्वेवानुक्तमपि चेत्तत्स्यादाकाशभाषितम्॥' इति भरतः।

किं भणसि मम शरीरे वेदना [समुत्पन्नेति।]?।

राज्ञी—
तत्पुनस्तत्र गमिष्यामि। हला सख्यः! विवाहोपकरणानि लघु गृहीत्वागच्छत।

राज्ञी—
इयं कर्पूरमञ्जरी।

भैरवानन्दः—
वत्से विभ्रमलेखे! आनीतानि विवाहोपकरणानि।

देवी—
आनीतानि, किं पुनर्घनसारमञ्जरीसमुचितान्याभरणानि विस्मृतानि। तत्पुनर्गमिष्यामि।

भैरवानन्दः—
एवं क्रियताम्।

भैरवानन्दः—पुत्ति कप्पूरमंजरि ! तं ज्जेव कीरदु ।

(कर्पूरमञ्जरी निष्क्रान्ता ।)

राज्ञी—(रक्षागृहं प्रविश्य कर्पूरमञ्जरीं दृष्ट्वा ।) अए, साक्खिदाए विडंबिम्हि । (स्वगतम् ।) ज्ञाणविमाणेण णिव्विग्घपरिसप्पिणा तं आणेदि महाजोई (प्रकाशम् ।) सहीओ ! जं जं णिवेदिदं तं तं लहुअं गेण्हिअ आअच्छध । (चामुण्डायतनप्रवेशनाटितकेन तामवलोक्य ।) अहो सारक्खिदा ।

भैरवानन्दः—देवि ! उवविस । महाराओ वि आअदो ज्जेव वट्टदि ।

(ततः प्रविशति राजा विदूषकः कुरङ्गिका च ।)

भैरवानन्दः—आसणं महाराअस्स ।

(सर्वे यथोचितमुपविशन्ति ।)

राजा—(नायिकां प्रति ।) एसा सा कप्पूरमंजरी । सरीरिणी मअरद्धअपारिद्धिओ देहंतरसंठिदा सिंगारसवरचावलट्ठी दिवसंचारिणी पुण्णिमाचंदचंदिआ । अवि अ गुणगुणमाणिक्कमंजूसा

भैरवानन्दः—
पुत्रि कर्पूरमञ्जरि ! तथैव क्रियताम् ।

राज्ञी—
अये, सादृश्येन विडम्बितास्मि । ध्यानविमानेन निर्विघ्नपरिसर्पिणा तामानयति महायोगी । सख्यः ! यद्यन्निवेदितं तत्तद्गृहीत्वागच्छत । अहो सादृश्यम् ।

भैरवानन्दः—
देवि ! उपविश । महाराजोऽप्यागत एव वर्तते ।

भैरवानन्दः—
आसनं महाराजस्य ।

राजा—
एषा शरीरिणी मकरध्वजपापर्धिका देहान्तरेण संस्थिता शृङ्गाररसलक्ष्मीव ।

---

1 'देहंतरेण संठिदा' टीकापाठः ।

रअणमई अंजणसलाआ। जधा अ एसा आरण्णकुसुमणिप्फण्णा महुलच्छी। किं च,—

भुवणजअपडाआ रूअरेहा इमीए
जह तह णअणाणं गोअरं जस्स जादि।
वसइ मअरकेऊ तस्स चित्ते विचित्ते
वलइअधणुदंडो पुंखिदेहिं सरेहिं ॥ १९ ॥

विदूषकः—(जनान्तिकम्।) सच्चं कदं तए आहाणअं। तडं गदाए वि णावाए ण विस्ससीअदि। ता तुण्हीओ चिट्ठ।

राज्ञी—(कुरङ्गिकां प्रति।) तुमं महाराअस्स विवाहणेवच्छं कुरु। सारंगिआ वि घणसारमंजरीए करेदु।

(इत्युभे उभयोर्विवाहनेपथ्यकरणं नाटयतः।)

भैरवानन्दः—उवज्झाओ हक्कारीअदु।

दिवससंचारिणी पूर्णिमाचन्द्रचन्द्रिका, अपि च प्रगुणगुणमाणिक्यमञ्जूषा। रत्नमय्यञ्जनशलाका तथा चैषा रत्नकुसुमनिष्पन्ना मधुलक्ष्मीः।

किं च,—

भुवनजयपताका रूपरेखाऽस्या
यथा तथा नयनयोर्गोचरं यस्य याति।
वसति मकरकेतुस्तस्य चित्ते विचित्रे
वलयितधनुर्दण्डः पुष्पितैः शरैः॥

विदूषकः—
सत्यं कृतं त्वयाभाणकम्। तटं गतायां अपि नौकायां न विश्वसितव्यम्। तत्तूष्णीं तिष्ठ।

राज्ञी—
त्वं महाराजस्य नेपथ्यं कुरु। सारङ्गिका घनसारमञ्जर्याः करोतु।

भैरवानन्दः—
उपाध्याय आकार्यताम्।

---

1 अस्मात् 'भैरवानन्दः-वच्छे! पत्तं विवाहमंगलमुहुत्तं। ता महाराजअस्सविज्जदु एदं अहोविरप्पविवण्णं' इति वाक्यमधिकं दृश्यते।

राज्ञी—अज्जउत्त ! एसो उवज्झाओ अज्जकविंजलओ चिट्ठदि । ता कीरदु अग्गिआरिअं ।

विदूषकः—एस सज्जो म्हि । भो वअस्स ! उत्तरीए गंठिं दाइस्सं दाव । हत्थेण हत्थं गेण्ह कप्पूरमंजरीए ।

राज्ञी—(सचमत्कारकम् ।) कुदो कप्पूरमंजरी !

भैरवानन्दः—(तं तस्या भावमुपलभ्य विदूषकं प्रति ।) तुमं सुट्ठुतरं भुल्लो सि । जदो कप्पूरमंजरीए घणसारमंजरि त्ति णामंतरं जाणासि ।

राजा—(करमादाय ।)

जे कंटआ तिउसमुद्धफलेसु होंति
जे केअईकुसुमगब्भदलावलीसु ।
फंसेण णूणमिह मज्झ [1]सरीरदिण्णा
ते सुंदरीअ वहला पुलंअंकुरिल्ला ॥ २० ॥

राज्ञी—
आर्यपुत्र ! एष उपाध्याय आर्यकपिञ्जलस्तिष्ठति । तत्करोत्वस्याचार्यकम् ।

विदूषकः—
एष सज्जोऽस्मि । भो वयस्य ! उत्तरीये ग्रन्थिं दास्यामि तावत् हस्तेन हस्तं गृह्याण कर्पूरमञ्जर्याः ।

राज्ञी—
कुतः कर्पूरमञ्जरी ?

भैरवानन्दः—
त्वं सुष्ठुतरं भ्रान्तोऽसि । यतः कर्पूरमञ्जर्या घनसारमञ्जरीति नामान्तरं जानासि ।

राजा—

ये कण्टकास्त्रपुसमुग्धफलानां सन्ति
ये केतकीकुसुमगर्भदलावलीषु ।
स्पर्शेन नूनमिह मम शरीरस्य
ते सुन्दर्या बहलाः पुलकाङ्कुराः ॥

---

1 'सरीरअस्स' इति टीकापाठः । 2 "अंकुराओ" इति टीकाकृतः पाठः ।

विदूषकः—भो वअस्स ! भामरीओ दिज्जंतु । हुदवहे लाजंजलीओ लिप्पिज्जंतु ।

(राजा भ्रमणं नाटयति । नायिका धूमेन व्याकुलमुखी तिष्ठति । राजा परिणयति । राज्ञी सपरिवारा निष्क्रान्ता ।)

भैरवानन्दः—विवाहे दक्खिणा दिज्जदु आचारिअस्स ।

राजा—दिज्जदु । वअस्स ! गामसअं ते दिण्णं ।

विदूषकः—सोत्थि होदु । (इति वृत्तयति ।)

भैरवानन्दः—महाराअ ! किं ते पुणो अ पिअं कुणोमि ?

राजा—जोईसर ! कमवरं पिअं वट्टदि । जदो,—

कुंतलेसरसुआकरफंसप्फारसौक्खसिढिलीकिदसग्गो ।
पालएमि वसुहातलरज्जं चक्कवट्टिपअवीरमणिज्जं ॥ २१ ॥

तधा वि इदं होदु दाव ।

विदूषकः—
भो वयस्य ! भ्रामर्यौ दीयन्ताम् । हुतवहे लाजाञ्जलयः क्षिप्यन्ताम् ।

भैरवानन्दः—
विवाहे दक्षिणा दीयते आचार्यस्य ।

राजा—
दीयते । वयस्य ! ग्रामशतं ते दत्तम् ।

विदूषकः—
स्वस्ति भवतु ।

भैरवानन्दः—
महाराज ! किं ते पुनरपि प्रियं करोमि ?

राजा—
योगीश्वर ! किमपरं प्रियं वर्तते ? यतः,—

कुन्तलेश्वरसुताकरस्पर्शहारसौख्यशिथिलीकृतस्वर्गः ।
पालयामि वसुधातलराज्यं चक्रवर्तिपदवीरमणीयम् ॥

तथापीदं भवतु तावत् ।

---

1 अस्मिन् वैतालिकः—'सुहाअ भोदु विवाहमहूसवो देवरस्स' इति पाठः ।

सत्थो णंददु सज्जणाण सअलो वग्गो खलाणं पुणो
णिच्चं खिज्जदु भोदु बंभणजणो सच्चासिहो सव्वदा ।
मेहो मुंचदु साचेदं पि सलिलं सस्सोचिअं भूअले
लोओ लोहपरम्मुहो णुदिअहं धम्मे मदि भोदु अ ॥ २२ ॥

(इति निष्क्रान्ताः सर्वे ।)

इति चतुर्थं जवनिकान्तरम् ।

सार्थो नन्दतु सज्जनानां सकलो वर्गः खलानां पुन-
र्नित्यं खिद्यतु भवतु ब्राह्मणजनः सत्यागीः सर्वदा ।
मेघो मुञ्चतु संचितमपि सलिलं सस्योचितं भूतले
लोको लोभपराङ्मुखोऽनुदिवसं धर्मे मतिर्भवतु च ॥

इति श्रीमद्द्विद्वद्वृन्दवन्दितारविन्दसुन्दरपदद्वन्द्वकुन्दप्रतिमयशःप्रकरप्रखरकठोरकिरणकरप्रभप्रतिभप्रभाकरभट्टात्मजवासुदेवविरचिते कर्पूरमञ्जरी-प्रकाशे चतुर्थं जवनिकान्तरं समाप्तम् ।

समाप्तोऽयं ग्रन्थः ।

---

1 'तणुदिअह विप्फुरंतो मणीसिजणसअलगुणविणासभरो । रित्तत्तणदावग्गी विरमउ कमलावडकखवरिसेण ॥' इति चात्र पाठो लभ्यते । एवमेव

'जं मुद्धं तिमिसं णवं च पणसं जे पारिभद्दद्दुमा
'जे दंडा कमलाण किं च कुसुमं जं केअईसंभवं ।
संके तुज्झ कलेवरे गुणगणं लद्धं बला तारिसा
रोमचा फुडपुट्टकंटअमिसा मेल्लंति णिच्चुल्लसा ॥

भैरवानन्दः—

अण्णं किं दे पिअं करीअदु ? तधा वि इदं भोदु,—

अणुदिअहं विप्फुरंतो मणीसिजणसअलगुणविणासभरो ।
रित्तत्तणदावग्गी विरमउ विमलाकडक्ख व रिसेण

राजा—

इदो वि परं किं पिअं जदो,—

देवी रोसकसाअमाणसवई णो होइ सावत्त ए
लद्धापुण्णससंकमंडलमुही सिंगारसंजीविणी ।
संजाआ अवि चक्कवट्टिपअवी किं अण्णमब्भत्थणं
सग्गं तुज्झ अणुग्गहेण भरिअं जं माणुसे लब्भइ ॥' इत्यधिकः पाठः ।

महाकविश्रीराजशेखरविरचितं

बालभारतम्

प्रथमोऽङ्कः

नमः शिवाय संसारसरोजस्य रजस्विनः ।
विकासाश्चर्यसूर्याय संकोचसकलेन्दवे ॥ १ ॥

अपि च,—

ये सीमन्तितगात्रभस्मरजसो ये कुम्भकक्षेपिणो
ये क्रीढाः श्रवणाश्रयेण फणिना ये चन्द्रदौत्यद्रुहः ।
ये कुप्यद्गिरिजाविमुक्तवपुषश्चित्तव्यथासाक्षिणः
शंभोर्दक्षिणनासिकापुटभुवः श्वासानिलाः पान्तु वः ॥ २ ॥

(नान्द्यन्ते ।)

सूत्रधारः—(परिक्रम्य विचिन्त्य च ।) अहो, किमपि कमनीया कवेरात्मन्याशीः ।

आद्यः कन्दो वेदविद्यालतानां जैह्वं चक्षुर्निर्निमेषं कवीनाम् ।
यो येनार्थी तस्य तत्प्रक्षरन्ती वाग्भूतिर्मे देवता संनिधत्ताम् ॥ ३ ॥

व्यासो वैखानसवृषा सत्यः सत्यवतीसुतः ।
भारतीं भारतकविर्दैयाद्द्वैपायनो मम ॥ ४ ॥

(विमृश्य च ।) अहो मसृणोद्गता सरस्वती यायावरस्य । यदाह,—

ब्रह्मभ्यः शिवमस्तु यस्तु विततं किंचिद्वयं बूमहे
हे सन्तः ! शृणुतावधत्त च धृतो युष्मासु सेवाञ्जलिः ।
यद्वा किं विनयोक्तिभिर्मम गिरां यद्यस्ति सूक्तामृतं
गाद्यन्ति स्वयमेव तत्सुमनसो याच्ञा परं दैन्यभूः ॥ ५ ॥

---

१. अस्य नाटकस्य प्रचण्डपाण्डवमित्यपि नामान्तरम्, अस्माद्धृदयमेव ह्रस्यमसामिः

(पुरोऽवलोक्य च।) कथमेते महोदयमहानगरलीलावतंसा विद्वांसः सामाजिकाः। तदेवं विज्ञापयामि। (अञ्जलिं बद्ध्वा।)

सा शुक्तिर्मधुपानकेलिचषकं वेणीविभूषामणिः
सीतायाः स च कुम्भसंभवमुनेः प्राप्ता च सैकावली।
पर्यङ्कः स च विद्रुमद्रुममयस्तद्रामसिंहासनं
चिह्नं यस्य यशोनिधिर्विजयतां सोऽयं रघोरन्वयः॥ ६॥

तत्र च,—

नमितमुरलमौलिः पाकलो मेकलानां
रणकलितकलिङ्गः केलितट्ट केरलेन्दोः।
अजनि जितकुलूतः कुन्तलानां कुठारो
हटहृतरमठश्रीः श्रीमहीपालदेवः॥ ७॥

तेन च रघुवंशमुक्तामणिना आर्यावर्तमहाराजाधिराजेन श्रीनिर्भयनरेन्द्रनन्दनेनाधिकृताः सभासदः! सर्वानेष वो गुणाकरः सप्रश्रयं विज्ञापयति—विदितमेतत्तु भवताम्, यदुत नाट्याचार्येण रङ्गविद्याधरेण प्रतिज्ञातम्—

राजशेखरकवेर्महात्मनो बालभारतमिदं हि नाटकम्।
योऽभिनेष्यति रसैर्निरन्तरं मत्सुतां स परिणेष्यति क्षितौ॥ ८॥

(आकाशे।) तत्रभवन्तः! किं ब्रूथ—इदं हि तद्बालभारतं यस्य हि प्रचण्डपाण्डवमिति नामान्तरम्! (अञ्जलिं बद्ध्वा।) यदादिशन्ति परि-

---

१. महोदयमिति कान्यकुब्ज(कनौज)नगरस्य नामान्तरम् २ मुरल मेकल कलिङ्ग-केरलकुलूत-कुन्तल-रमठाख्या देशविशेषा. ३. पाकलो हस्तिज्वरः 'गा-धारापिशुनगन्ध-भवभूतिः। कल' इति हर्षचरितम् 'कलभं कठोर इव कूटपाकल' इति मालतीमाधवे द्विपपा पाकल एव कूटपाकल'. ४. आदिष्टोऽसि—श्रीमहीपालदेवेन, यस्येमां पुराविदः प्रशस्तिगाथामुदाहरन्ति—'यः संसुप्त्य प्रकृतिगहनामार्यचाणक्यनीतिं जित्वा नन्दान्कुसुमनगरं चन्द्रगुप्तो जिगाय। कर्णाटत्वं ध्रुवमुपगतानप्य तानेव हन्तु दोर्दर्पाढ्य स पुनरभवच्छ्रीमहीपालदेवः॥' इति चण्डकौशिके आर्यक्षेमीश्वर'. स एवायमपि महीपालदेव इति तु न निश्चय'.

पदप्रेसराः । (किंचित्सलज्जम् ।) भवदनुचराः पञ्च भ्रातरो वयम्, पञ्चापि नाम समर्थास्तदभिनयने, किं पुनरस्माकं पितृव्यपुत्राः शतं सन्ति भरतपुत्राः । ते च तदभिनेतुमिच्छन्ति, न च ते शक्नुवन्ति । तन्निमित्तं च महद्दस्माभिः सह वैरं वर्तते । (आकाशे ।) किं ब्रूथ—एकविषयाभिलाषो हि वैरकन्दं कन्दलयति । भवद्भिः कुलान्तकरं वैरं तेषाम् । यतो दुर्बुद्धयस्ते सुबुद्धयो भवन्तः । उक्तं हि तेनैव महासुमन्त्रिपुत्रेण,—

श्रियः प्रसूते विपदो रुणद्धि यशांसि दुग्धे मलिनं प्रमार्ष्टि ।
संस्कारशौचेन परं पुनीते शुद्धा हि बुद्धिः कुलकामधेनुः ॥ ९ ॥

(अञ्जलिं बद्ध्वा ।) सुगृहीतमार्यवचनम् । बद्धो वाससो ग्रन्थिः । यदित्थमामनन्ति,—

अनूचानो हि यद्भूते सा स्वयंभूः सरस्वती ।
तदार्षं न मृषार्थं स्यात्सा दृष्टिर्विदुषां दृढा ॥ १० ॥

अपि च,—

आपन्नार्तिहरः परक्रमधनः सौजन्यवारांनिधि-
स्त्यागी सत्यसुधाप्रवाहशशभृत्कान्तः कवीनां मतः ।
वर्ण्यं वा गुणरत्नरोहणगिरेः किं तस्य साक्षाद्सौ
देवो यस्य महेन्द्रपालनृपतिः शिष्यो रघुग्रामणीः ॥ ११ ॥

तत्रैवंविधो दैवज्ञानां प्रवादः,—

बभूव यन्मौक्तिकभवः पुरा कविस्ततः प्रपेदे भुवि भर्तृमेण्ठताम् ।
स्थितः पुनर्यो भवभूतिरेतया स वर्तते संप्रति राजशेखरः ॥ १२ ॥

(आकाशे ।) किं ब्रूथ—तत्प्रस्तूयतामिति ? यदाज्ञापयति गुरवः ।

(नेपथ्ये गीयते ।)

हरचूडामणिरिन्दुस्त्रिजगद्दीपश्च दिनकरो देवः ।
मासान्तसंगताविह लोकस्य हिनाय वर्तेते ॥ १३ ॥

सूत्रधारः—(आकर्ण्य ।) कथमुपक्रान्तमेव कुशीलवैः ! यद्वाल्मीकि-व्यासयोः प्रावेशिकी ध्रुवा गीयते । (विचिन्त्य ।) ध्रुवा हि नाटकस्य प्रथमे प्राणाः । यतः,—

प्रथयति पात्रविशेषान् सामाजिकजनमनांसि रञ्जयति ।
अनुसंदधाति च रसान्नाट्यविधाने ध्रुवा गीतिः ॥ १४ ॥

तद्भवतु, अहमप्यनन्तरकरणीयाय सज्जो भवामि । (इति निष्क्रान्तः ।)

प्रस्तावना ।

(ततः प्रविशति वाल्मीकिर्व्यासश्च ।)

व्यासः—(सपादोपसृत्य ।) भगवन् अद्भुतसंभव ! एष व्यासः पाराशर्योऽभिवादयते ।

वाल्मीकिः—(पृष्ठे पाणिं निधाय ।) वत्स सात्यवतेय ! स्वप्रबन्ध-परिसमाप्त्या वर्धस्व ।

व्यासः—परमनुगृहीतोऽस्मि । (अञ्जलिं बद्ध्वा ।)

योगीन्द्रच्छन्दसां द्रष्टा रामायणमहाकविः ।
वाल्मीकजन्मा जयति प्राच्यः प्राचेतसो मुनिः ॥ १५ ॥

वाल्मीकिः—अष्टादशपुराणसारसंग्रहकारिन् ! कियान्वर्तते नवेतिहासो भारतम् ?

व्यासः—पुनः पुनरविनयोद्घाटनेन मा लज्जयतु मामुपाध्यायः । के वयं नाम रामायणमहाकवेः पुरतः ?

ये विद्यापरमेश्वराः स्तुतधियो ये ब्रह्मपारायणे
येषां वेदवदादृता स्मृतिमयी वाग्लोकयात्राविधौ ।
स्नाताः स्वर्गतरङ्गिणीमपि सदा पूतां पुनन्त्यत्र ये
व्युत्पत्त्या परया रसोपनिषदां रामायणस्यास्य ते ॥ १६ ॥

बालमीकिः—तदेहि । प्राप्तां सायंतनीं संध्यामुपासहे । ततः श्रावयि(श्रो)ष्यामि । संप्रति हि,—

अयमहिमरुचिर्भजन्प्रतीचीं कुपितवलीमुखतुण्डताम्रबिम्बः ।
जलनिधिमकरैरुदीक्ष्यते द्राङ्घरुधिरारुणमांसपिण्डलोभात् ॥ २१ ॥

अपि च,—

निर्यद्ग्रासरजीवपिण्डकरणिं कुर्वन् कवोष्णैः करै-
र्मोक्षितुं रविबिम्बमम्बरतलादस्ताचलं चुम्बति ।
किं च स्तोकतमःकलापकलनाश्यामायमानं मना-
ग्धूमश्यामपुराणचित्ररचनारूपं जगज्जायते ॥ २२ ॥

(इति परिक्रम्य निष्क्रान्तौ ।)

विष्कम्भकः ।

(ततः प्रविशति ब्राह्मणवेषो युधिष्ठिरो भीमसेनादयश्च)

सहदेवः—इत इतः ।

(सर्वे परिक्रामन्ति ।)

युधिष्ठिरः—वत्स सोदर वृकोदर ! परपुरंजय धनंजय ! मण्डितपाण्डवकुल नकुल ! द्विषद्भिःसह सहदेव ! इह हि महाराजसमाजे न जाने कमवलम्बिष्यते राधावेधकीर्तिवैजयन्ती ।

भीमः—(विहस्य ।)

आर्या वेत्ति निजां न विक्रमकलां त्वं विश्वरक्षामणिः
किंब्रूमोऽस्य किरीटिनो न घटते द्रोणेन यस्योपमा ।
माद्रीनन्दनयोर्नरेन्द्र ! विनयच्छद्मं हि वीरव्रतं
न भ्राता स तवास्ति यस्य पुरतो राधां परो विध्यति ॥ २३ ॥

अर्जुनः—

दुर्नमं यदि मुरारिकार्मुकं दुर्भिदं यदि शरव्यमुच्छ्रितम् ।
दुर्जया यदि च राजमण्डली तत्प्रभो द्रुपदजा न दुर्लभा ॥ २४ ॥

---

१. राधा धन्विनां लक्ष्यविशेषः

नकुलः—निखिलनरेन्द्रवृन्दाधिष्ठितान्मञ्चसंचयानपास्य मुनिप्राय-निमज्जनपरिगृहीतं मञ्चमारोहामो वयमपि विप्रवेषधारिण एव ।

(सर्वे समारुह्य यथोचितमुपविशन्ति ।)

(नेपथ्ये ।)

इंदो इदो कुमारधिट्ठज्जुण्णो भट्टिआरिआ अ ।

युधिष्ठिरः—प्राप्तवैषा स्वयंवरभित्री ।

(तत प्रविशति सदृष्टद्युम्ना द्रौपदी बन्दी सखी च ।)

(परिक्रामितकेन)

धृष्टद्युम्नः—(एकतोऽवलोक्य ।) कथं तातद्रुपदमनुग्रहीतुं महर्षयोऽपि स्वयंवरयात्रामञ्चमध्यासते, तदेतानभ्यर्हयामि । (सप्रश्रयमञ्जलिं बद्ध्वा ।)

स्वस्त्यापस्तम्ब ! तुभ्यं त्वमसि ननु मुने ! कस्य नो माननीय-स्त्वां वन्दे याज्ञवल्क्य ! द्विजसदसि कवे ! त्वां स्तुवे भारतस्य ।
विश्वामित्रः पवित्रं जगति विजयते काममत्रे ! नमस्ते
विश्वश्रेष्ठे वसिष्ठे कृतनतिरपरान्स्तौमि हर्षान्महर्षीन् ॥ २५ ॥

(द्रौपदी प्रणमति ।)

धृष्टद्युम्नः—(अन्यतोऽवलोक्य ।)

लक्ष्मी संवननैर्भुजैर्नृपतयः स्वस्त्यस्तु यः स्वागतं
नन्वेते गृहमेधिनां धुरि वयं यत्पूर्वमभ्यागताः ।
दृष्टः केन भवादृशां पुनरियान्पूज्यः समाजो जग-त्युत्कण्ठा भवता च संप्रति पुरः स्थेयं स्थिता द्रौपदी ॥ २६ ॥

सखी—इंदो इदो भट्टिदारिआ । जग्घाहिवाहिणो, वामगाधिमेदुं ।

युधिष्ठिरः—(सतृष्णमवलोक्य स्वगतम्) हहो लोचनचकोरौ ! युवा-मन्यातृप्तैः पिबन्त द्रौपदीवदनेन्दुचन्द्रिकाम् ।

---

१. 'इंदो इदो कुमारधिट्ठज्जुण्णो भट्टिदारिआ च' इति पाठान्तरम् २ 'इंदो इदो भट्टिदारिआ । जग्घाहिवाहिणो, वामगाधिमेदुं ।' (?) इति पाठान्तरम्

कण्ठे मौक्तिकदाम गण्डतलयोः कार्पूरमच्छं रजः
सान्द्रं चन्दनमङ्गके विचकिलस्रक्शेखरं मूर्धनि ।
तन्वी गाढमियं चकास्ति तनुनी चीनांशुके बिभ्रती
शीतांशोरधिदेवतेव गलिता व्योम्नि द्रुतं गच्छतः ॥ २७ ॥

भीमः—(द्रौपदीसंभाषणमनुसंधाय । स्वगतम् ।)

श्रोणीबन्धस्त्यजति तनुतां सेवते मध्यभागः
पद्भ्यां मुक्तास्तरलगतयः संश्रिता लोचनाभ्याम् ।
धत्ते वक्षः कुचसंचितामद्वितीयं तु वक्रं
त्वद्वाञ्छाणां गुणविनिमयः कल्पितो यौवनेन ॥ २८ ॥

अर्जुनः—(स्वगतम् ।) हृदय ! कारय चक्षुषी पारणम् । पुरतो द्रौपदी । अस्याः खलु वयो विशेषोचितमधुना संभाव्यते,—

शारीद्यूतकलाकुतूहलि मनश्छेकोक्तिशिक्षारति-
र्नित्यं दर्पणपाणिना सहचरीवर्गेण चाचार्यकम् ।
प्रौढस्त्रीचरितानुवृत्तिषु रसो बाल्येऽपि लज्जा मना-
क्स्तोकारोहिणि यौवने मृगदृशां कोऽप्येष रम्यः क्रमः ॥ २९ ॥

नकुलः—(स्वगतम् ।) नेत्रे ! यथाशक्ति विस्तारं भजेथाम् ।

स्मितपरिचयावृत्तिर्वाचामपाङ्गतरङ्गितं
नयनरचितं पादन्यासो नितम्बभरालसः ।
अहह सुतनोर्लीलास्त्रैः कृतं पदमङ्गके
यहतु मदनः शोभामात्रं धनुर्ननु संप्रति ॥ ३० ॥

सहदेवः—(स्वगतम् ।) क्षणं चक्षुषी ! निमेषदोषमपाकुरुतम् । इदमग्रे हृदयलेख्यमानुष्यं लावण्यम् ।

तरङ्गय दृशौ मनाक्स्तगय दिक्षुरान्युत्पलैः
करौ पलय जायतां सरसिजाकरो जङ्गमः ।
विहस्य पुनरुक्ततां सुतनु लम्भयैकावली-
मुदञ्चय मुखं भयत्ययमकाण्डचन्द्रोदयः ॥ ३१ ॥

---

१. 'श्रोमारोहः' इति पाठान्तरम् ।

बन्दी—(तारस्वरमास्थाय।)

सकलभुवनरक्षाव्यग्रतन्द्रा नरेन्द्राः!
शृणुत गिरमुदारामादराच्छ्रावयामि।
दह हि सदसि राधां यः शरव्यीकरोति
स्वयंवरविजयपताका द्रौपदी तत्कलत्रम्॥ ३२॥

सखी—कथं विभ्रमताण्डवितभ्रूमञ्जरीभ्रमरपङ्क्तिलाञ्छितेन नयनोत्पलखण्डेन घूर्णमानं पिबदिव द्रौपदीवदनलावण्यामृतमितोऽभिमुखं वर्तते नरेन्द्रचक्रम्।

बन्दी—अहह कुसुमायुधस्याप्रतिहतं भगवतः शासनम्। यतः,—

न्यस्तं ताण्डवितभ्रु चक्षुरमुना कण्ठो लुठत्पक्ष्मणः
संवृत्तोऽस्य करोत्ययं च तरलं हारं करान्दोलनैः।
मिथ्यासौ स्मयते स्थितो भणितिभिः किं चैष वैपञ्चिको
यत्सत्यं मदिरां विनैव मदनो यूनां मनोन्मादभूः॥ ३३॥

कथमहंपूर्विकया सर्व एव धनुरारोपयितुं संरभन्ते!

धृष्टद्युम्नः—हंहो कंदर्पचण्ड! निवार्यतामियमहमहमिका महीपालानाम्।

बन्दी—(विचिन्त्य।)

सर्वे कार्मुककर्कशाः क्षितिभुजः सर्वेऽपि शस्त्रास्त्रिणः
सर्वे मानमदोद्धताः शृणुत मे बन्धं वचो बन्दिनः।
दुर्धर्षं धनुरप्युतस्य पलितं तथाप्ययस्यत्वसौ
यस्य श्यामलमिन्दुसुन्दरमुखं मीढा यदाः पण्डिनी॥३४॥

(सर्वे परिवार्य तिष्ठन्ति।)

बन्दी—(शोधयन्ती।)

दोषोन्मीलितगात्रतानि कुरुते या चन्द्रलेखादिते
तस्याः शान्तनवोऽयमुज्ज्वलयशाः स्वर्गापगायाः सुतः।

---

१. इतः प्रभृत्यारभ्य कञ्चुकी स्वरूपं नेपथ्ये एव निरूपयति.

वन्दित्वैतमुदग्रभार्गवशरश्रेणीव्रणालंकृतं
भीष्मं सुभ्रु! ततः स्वयंवरनृपाः प्रत्येकमालोकय ॥ ३५ ॥

सखी—द्रुपदनन्दिनि! गङ्गातनयः शान्तनव एषः। तद्गुरुत्वेन प्रणमतु।

द्रौपदी—यः किल कुमारब्रह्मचारी। नमो नमः पाण्डवकौरवपितामहाय।

(सर्वे परिक्रामितकेन।)

वन्दी—(स्वगतम्।) अयं भगवतो भीष्मादनूनगरिमा द्रोणाचार्यः। (प्रकाशं द्रौपदीं प्रति।)

सदाशिवप्रशिष्योऽयमवधिः सर्वधन्विनाम्।
आकर्णपलितः सुभ्रु! द्रोणाचार्यः प्रणम्यताम् ॥ ३६ ॥

द्रौपदी—यः पाण्डवकौरवाणां धनुर्वेदविद्यागुरुः।

वन्दी—निजदोःस्तम्भसंभावनागर्वखर्वितविवेकान्नृपतीनवलोक्य किमाह भारद्वाजः—

शिष्योऽसि भार्गवमुनेः कुरुपाण्डवानां
कोदण्डकर्मणि गुरुस्तदिदं ब्रवीमि।
हे भूभुजो जयवपूंषि धनूंषि धत्त
मुक्त्वाऽर्जुनं तु भुवि विध्यति कोऽत्र राधाम्[२] ॥ ३७ ॥

द्रौपदी—नमो नमस्ते द्रोणाय कलशोद्भवाय।

(सर्वे परिक्रामितकेन।)

वन्दी—
दूरोदञ्चिमरीचिरन्तरचनाचित्रं तनुत्रं तनो-
रुत्कृत्य त्रिदशेश्वराय ददतो यस्य स्मितं चक्षुषा।
पाञ्चालीवदनेन्दुसुन्दरतया तेनैव पर्यथुणा
सोऽयं पश्यति दुर्धरं धनुरिदं राधां च राधासुतः ॥ ३८ ॥

---

२. राधाः धन्विनां लक्ष्यविशेषः।

(विचिन्त्य।) अहो महाप्रभावं भार्गवं धनुः। यदमुना मम चक्षुर्ज्ञान-मुन्मीलितम्। येनास्य प्रभावं [च] भावं च भूपतीनां प्रत्यक्षमिव पश्यामि।

सखी—सखि! दानकीर्तिसंतर्पितभुवनकर्णः कर्ण एषः।

द्रौपदी—यो दुर्योधनप्रसादलब्धचम्पाधिपत्यः।

बन्दी—(विहस्य स्वगतम्।) अहो महात्मनामपि केतवानुगृहीता धृत्तयः। यदेषः,—

दुर्नमं दहनसंभवं धनुः संशये न च सतां प्रवृत्तयः।
अङ्गराज इति चिन्तयन्निमां भाषते व्रज पुरः कुरूद्वहः॥३९॥

(सर्वे परिक्रामितकेन।)

स एव—(प्रकाशम्।)

यौवराज्याभिषेकार्हो वीरो दुर्योधनानुजः।
दुःशासनो महाबाहुरेष मञ्चं विमुञ्चति॥ ४०॥

सखी—यो दुःशलप्रभृतीनामेकोनशतस्य ज्येष्ठः, कनिष्ठो दुर्योधन-नरेन्द्रस्य।

धृष्टद्युम्नः—(स्वगतम्।) यथार्थनामा दुःशासन एवायम्।

चापं प्रति त्रिचतुराणि पदानि दत्त्वा
कृष्णाहठग्रहनिमित्तविषण्णचेताः।
दुःशासनो नृपतिचक्रविमुक्ततार-
हुंकारलज्जितमनाः शनकैः प्रयाति॥ ४१॥

द्रौपदी—अपि नाम चण्डचरित एषः।

बन्दी—(निरूप्य।) नमो नमो विष्णुकोदण्डपण्डनमन्धाय।

(स्वगतम्।)

द्रौपदीं परिणयन्तमर्जुनं विद्धराधमवलोक्य मायया।
दोर्बलं विफलमात्मनो विदन्व्रीडयैव विनतो निवर्तते॥ ४२॥

(परिक्रामितकेन।)

बन्दी—

गान्धाराधिपतेः पुत्रः सुबलस्य बलीयसः ।
मातुलः कुरुराजस्य राजते नृपतिर्गुणैः ॥ ४३ ॥

द्रौपदी—यो द्यूतकैतवविचक्षणः श्रूयते ।

सखी—आम् । एतस्य किल हृदयचिन्तिता निवर्तन्ते भीमसेनस्य पुनः रक्षिता । (?)

बन्दी—

यात्राकृतोऽस्य चतुरङ्गचमूसमुत्थे
पांसूत्करे वियति सर्पति वीतरन्ध्रे ।
दिङ्नागनागपतिकेशवकच्छपाना-
मूर्ध्वं क्षणाद्भवति भूवलयस्य भारः ॥ ४४ ॥

(स्वगतम् ।)

धारितं द्रुपदजास्वयंवरे कार्मुकं शकुनिना करेण यत् ।
तस्य सर्वजनहासहेतवे कंधरां समधिरुह्य तत्स्थितम् ॥ ४५ ॥

(पुनरवलोक्य विहस्य च ।) कथं विमुक्तराधावेधाभिमानस्य स्वयंवरवदुत्तीर्णं स्कन्धाद्धनुः ।

(सर्वे परिक्रामन्तीव ।)

बन्दी—

सिन्धुयन्त्रितयात्रोऽयं सिन्धुराजो जयद्रथः ।
सिन्धुपारेत्तमहयः सिन्धुप्रतिमो बले ॥ ४६ ॥

अपि च,—

अस्याहवे दलितदाडिमबीजलील्या-
न्मुक्ताफलेषु करिणां रुधिरारुणेषु ।
व्योम्नः शुकाः पतिततस्तरसा निरीक्ष्य
नाकस्त्रियो यदु हसन्ति सहस्रतालम् ॥ ४७ ॥

द्रौपदी—यो दुर्योधनभगिनीपतिः ।

धृष्टद्युम्नः—कथं धनुरारोपणपणं प्रत्ययमुदास्ते ?

बन्दी—

दुःशलागुणगणेन रञ्जितो लज्जितश्च कुरुराजसंनिधौ।
कौतुकागमनमात्मनो वदन्त्रासनाच्चलति नो जयद्रथः ॥ ४८ ॥

(परिक्रामितवेन।)

बन्दी—

दुर्योधनो नृपकिरीटविटङ्करत्न-
रश्मिच्छटाच्छुरितपादयुगाङ्गुलीकः।
हेलाचलच्चमरनर्तितकर्णपूरः
शूरः शरासनविदां प्रथमोऽयमास्ते ॥ ४९ ॥

अस्य च,—

पादौ वाससि सान्द्रकुङ्कुमरसन्यासप्रसक्ताकृति-
र्यातुर्दिग्विजये न यैः प्रणयितां नीतः प्रणामाञ्जलेः।
ते प्रत्यग्रकपालपात्ररुचिभिस्तारास्थिहारार्थिभिः
कङ्कालव्रतमीप्सुभिश्च मुदितैः कापालिकैर्वीक्षिताः ॥ ५० ॥

द्रौपदी—यः खण्डपरशुचूडामणेः कुलालकरणम्।

सखी—आं, सखि! स एवेषः।

द्रौपदी—अस्तीदम्। किं पुनः समुद्दीपितजतुभवनत्वेन विपाशन-दारुत्वेन च च्छलप्रहारी एषः।

बन्दी—किमाह महाराजदुर्योधनः।

निर्दिशन्तु निजबाहुविक्रमं शार्ङ्गनाम्नि धनुषीह पार्थिवाः।
साभिमानहृदयस्तु मादृशः कः पणेन परिणेतुमिच्छति ॥ ५१ ॥

(विचिन्त्य सगतम्।) कथमभिमानाङ्गीकरणेन परिहार एषः। (परिक्रामितवेन प्रकाशम्।) स एष भगवतो वासुदेवस्यापि वन्दनीयो बलभद्रः।

---

१. बन्दस.

किं किं किं चु चु चुम्बनैर्मम मुधा वक्त्राम्बुजस्याग्रतो
दे दे देहि पि पि प्रिये सु सु सुरां पात्रे त्रि रे रेवति ।
मा मा मा वि विलम्बनं कु कु कुरु प्रेम्णा हली याचते
यस्येत्थं मदघूर्णितस्य तरसा वाचः स्खलन्त्याकुलाः ॥ ५२ ॥

अपि च,—

नीलाम्बरं नलिनदाम च यस्य भूषा
यत्प्रीतिकारि मधुरं मधु रेवती च ।
लीलार्धदृष्टधनुरत्र हली सहेलं
शारैः स एष खलु खेलति खेलगामी ॥ ५३ ॥

द्रौपदी—यः किलैरावणवारण इव सदा मदस्रवच्छन्दः ।

वन्दी—किमाह कामपालः—

रेवतीं त्रिभुवनैकसुन्दरीं न प्रकोपयति रोहिणीसुतः ।
तेन नैष विदधाति कोलुकी दक्षिणभागमपि कृष्णकार्मुके ॥ ५४ ॥

(पुनः ।)

वन्दी—

यः पीयूषभुजां पुरः प्रहरतां दम्भोलिपाणिं रणे
निर्जित्योर्जितशार्ङ्गनिर्गतशरश्रेणीभिरुद्दामभिः ।
शच्या वाञ्छितमौलिबन्धरचनैः पुष्पैः सदा सुन्दरां-
श्चक्रे नन्दनपारिजातकतरून्विश्वंभरासाक्षिणः ॥ ५५ ॥

वृषतुरगकरीन्द्रस्यन्दनाद्याकृतीनां
किमपरमसुराणां मन्थिता सोऽयमास्ते ।
कृतसुरपरितोषः षोडशस्त्रीसहस्र-
प्रणिहितपरिरम्भस्यास्पदं पद्मनाभः ॥ ५६ ॥

द्रौपदी—यस्य किल कलकण्ठीमञ्जुलजल्पिनी रुक्मिणी प्रथमकलत्रम् । यस्य काञ्चनाभा सत्यभामा संवननं हृदयस्य ।

वन्दी—किमाह देवो वासुदेवः ।

यस्मिन्मद्वंश मदनस्य च भूमेमार्यौ
यस्मिन्नमी च यदुवंशभुवः कुमाराः ।
नन्वत्र मोऽहममुना कमलायतार-
स्तीव्रक्रकेलिचतुरश्चरितेन लज्जे ॥ ५७ ॥
(परिक्रामतः ।)

वन्दी—

यस्याश्चाणूरचूर्णीकरणसहभुवः पूतनाफूत्कृतानां
कर्तारः कंसवंशप्रशमपरगवः केशिनः क्रूरकाराः ।
यस्यासन्दानदर्पप्रबलकुवलयापीडपीटाग्रगल्माः
क्रीडाद्विम्भम्य लीलोद्धृतधरणिधरः केलयः कालियारेः ॥५८॥

तस्यैव शम्बरमहासुरसुन्दरीणां
सिन्दूरमण्डनहरेण पराक्रमेण ।
शश्वत्प्रकामकमनीयजनोपमानं
प्रत्यग्रपञ्चशिखसूनयः पुरस्तात् ॥ ५९ ॥

द्रौपदी—यः किल यादवकुमारगणो मध्ये निरुपमरूपरेखाजय-पताकां निर्विलम्बमवलम्बते ।

वन्दी—धृष्टद्युम्न आर्य !

उद्यतः क्रतुरुशानुजन्मनः कर्तुमेष धनुषोऽधिरोहणम् ।
शार्ङ्गिणा भगवता ससंभ्रमं भूयिष्ठङ्घटनेन वार्यते ॥ ६० ॥
(परिक्रामतः ।)

वन्दी—कथं सात्यकिः,

धनुर्विद्याराहस्येषु शिष्योऽयं सव्यसाचिनः ।
प्रद्युम्नस्य सहाध्यायी सात्यकिः सत्यसंगरः ॥ ६१ ॥

अपि च,—

यः सत्यस्य निधिः श्रियां च सरणि साध्वीं च धात्रीं चयो
यो दाता च दयालुरेव च पदं कीर्तेश्च नीतेश्च

तस्यैतस्य स एव दूषणकणः कारुण्यपुण्यात्मनः
पात्रापात्रविवेचनं न यदभूत्सर्वस्वदानेष्वपि ॥ ६२ ॥

द्रौपदी—यो यादवकुमारोऽपि भूत्वा अनास्वादितकादम्बरीरसः स एतस्य गुणो दोषो वा क्रियताम् ।

बन्दी—

यागकुण्डशिखिगर्भसंभवं बन्धते न तु करेण लङ्घ्यते ।
इत्युदीर्य चतुरोक्ति सात्यकिः पूजया परिहरत्यर्यं धनुः ॥ ६३ ॥

(परिक्रामितकेन ।)

शिशुपालमहीपालो मेकलानां कुलोद्भवः ।
अयं सजयनिर्घोषो दमघोषसुतः परः ॥ ६४ ॥
पाणिप्रस्थैर्बकुलसुमनःसौरभं यो मिमीते
दंपत्योर्यः सुरतसमरे सौख्यसंख्यां करोति ।
यश्च ज्योत्स्नां चुलकपटलैः काममाचामतीन्दोः
शक्तः स्तोतुं यदि स निखिलान्यस्य कीर्त्यद्भुतानि ॥ ६५ ॥

द्रौपदी—यो निर्जितसुरासुरः ।

बन्दी—

दक्षिणं करमुपैति वामतो वाममश्नति च दक्षिणादिति ।
दूरतोऽस्य नृपतेर्गुणार्पणं धारणेऽपि धनुषो विडम्बना ॥ ६६ ॥

(परिक्रामितकेन ।)

सत्यसंधो जरासंधः क्रान्तदिग्वलयो बलैः ।
अत्रैष राजते राजा मागधो मगधस्तुतः ॥ ६७ ॥
अस्यासमं समरकर्म दिदृक्षमाणै-
र्दोःपद्वयं फणिभिरपि चमूरजस्तैः ।
यत्कूणितेक्षणतया न कबन्धनृत्तं
दृष्टं श्रुतो न च महाभटसिंहनादः ॥ ६८ ॥

द्रौपदी—यो जननीजनितदेहखण्डयुगलो जरया राक्षस्या संधित इति जरासंधो भूपतिः ।

वन्दी—

अस्य वैष्णवमिदं महाधनुः स्वप्रभावविभवेन भूपतेः ।
अम्बरे भुवि दिशां च संचये दर्शयत्यतनुकार्मुकावलीः ॥६९॥

(परिक्रामितकेन ।)

वन्दी—कथमेते राजानो युगपदुत्थिताश्चापमारोपयितुं विडम्बिताश्च । तथा हि,—

जातं कीकसभङ्गतः शकपतेर्दोर्दण्डयोः खण्डनं
निष्ठ्यूता रमठेश्वरस्य वदनात्कीलालकल्लोलिनी ।
जानुभ्यां जगतीं गतश्च तरसा पाण्ड्यः प्रचण्डोऽप्ययं
कोदण्डेन न खण्डिताः क्षितिभुजो दामोदरीयेण के ॥ ७० ॥

वन्दी—(सविषादम् ।)

हा मन्त्रं शकुनेः कुलक्षयकरं दुर्योधनं हा नृपं
हा भीष्मं च पितामहं गुरुमपि द्रोणं सपुत्रं च हा ।
दग्ध्वा यज्जतुधानि पाण्डुतनया जीवेत्स चेदर्जुनो
राधायन्त्रमविद्धमत्र न भवेत्कन्या च न द्रौपदी ॥ ७१ ॥

धृष्टद्युम्नः—

वैकुण्ठकार्मुकदृढाक्रमणैककुण्ठे
दोर्दण्डखण्डनविखण्डितराजचक्रे ।
द्राग्द्रौपदी नमितकण्ठविलोठिहार-
विश्लिष्टयष्टिगणनागुणनां करोति ॥ ७२ ॥

सखी—किं पुनरेष भरितभुवनः कोलाहलो विपुलः ?

वन्दी—(अवलोक्य सहर्षम् ।)

धृष्टद्युम्ने विपण्णे हसति मुरजिति द्रौपदीचित्तनिन्द्ये
कोदण्डप्रौढिगाढग्लपितगुरुबले चाग्र राज्ञां समाजे ।
प्रह्लत्कृष्णाजिनानां करकैरकजुषा वल्कलव्याकुलानां
विप्राणां कोऽपि मध्यादवतरति युवा कार्मुके दत्तदृष्टिः ॥ ७३ ॥

---

१. करकः कमण्डलुः.

अपि च,—

व्रीडानतेषु वदनेषु च भूपतीनां
संचारयन्विकचपङ्कजचारु चक्षुः ।
अभ्येति मत्तगजखेलगतिः स एष
साभ्यर्थनं मुनिजनेन निषिध्यमानः ॥ ७४ ॥

अर्जुनः—(कतिचित्पदानि दत्त्वा । चतुर्दिशमवलोक्य ।)

एतत्कृष्णस्य शार्ङ्गं ननु धनुरतनुप्राणदोर्दण्डचण्डै-
र्दूराद्भूपप्रकाण्डैः सपदि परिहृतं शिञ्जिनीसञ्जनेषु ।
मध्ये राज्ञां प्रतिज्ञा मम पुनरियती मद्भुजायत्नयोगे
प्रत्येकं पर्वमुद्रा त्रुटति तडिति वा जायते कर्मठं वा ॥ ७५ ॥

(सरभसं परिक्रम्य धनुरारोपणं नाटयन् ।)

मद्बाहुयन्त्रयुगयन्त्रितमाततज्यं
न स्याद्धनुः कथमिदं हि रथाङ्गपाणेः ।
वज्राटनिर्यदि न याति च भूमिपृष्ठ-
मा शेषमा च कमठाधिपमभ्युपेयात् ॥ ७६ ॥

भीमः—वत्स नकुल ! भिदुरा भूमिरिति मा कदाचन कदर्थित-कोदण्डकोटिः स्यात्किरीटी । तत्तस्याधस्ताद्धस्तं दार्ढ्याय निदधे । (इति तथा करोति ।)

नकुलः—

धत्से जर्जरतां न मेदिनि ! मुधा मा शेष ! शङ्कां कृथा-
स्तुभ्यं कूर्मपते ! नमस्त्यज भयं दिग्दन्तिनः ! स्वस्ति वः ।
यज्जिष्णुर्भुजयोर्बलेन नयति ज्यां हेलयैवाटनीं
धत्ते पाणितलं तलेऽस्य धनुषो धामं हिडिम्बापतिः ॥ ७७ ॥

(अर्जुन आरोपयति ।)

सखी—भगवति मिथुनसंघटनैकदेवते ! सुष्ठिननिःशेषनरेन्द्रचक्र-मेकविभवीरसमुद्यमशेषं वर्तते स्वयंवरडम्बरम् ।

(अर्जुनो धनुषोऽधः नाटयति ।)

बन्दी—

आकर्णाञ्चितचापमण्डलमुचा बाणेन यन्त्रोदर-
च्छिद्रोत्सङ्गविनिर्गतेन तरसा विद्धा च राधामुना ।

(द्रौपदीमवलोक्य ।)

तुल्यं मोहनशोषणप्रभृतयः प्रक्षेपकुण्ठक्रमाः
कामेन द्रुपदात्मजाहृदि हठाद्यस्ताश्च पञ्चेषवः ॥ ७८ ॥

सखी—आश्चर्यमाश्चर्यम् । असलिलात्कुवलयोत्पत्तिरकुसुमं कुसुम-कोदण्डकाण्डममन्त्रतन्त्रं मनोमोहनमिन्द्रजालमसौ दृष्टिर्विप्रवीरवदने निष्पतन्ती न विरमति ।

अर्जुनः—कथं राधावेधानन्तरमियमस्मासु स्निह्यति ? यतः,—

जैत्रं तन्त्रं कुसुमधनुषः प्रेमसर्वस्वदूताः
सत्यंकाराः प्रणयविततेस्तुष्टये पुष्टियोगाः ।
विन्यस्यन्तः श्रवसि सुतनोर्मेचकाम्भोजभूषा-
मुत्कण्ठन्ते मयि निपतितुं नर्तिताक्षाः कटाक्षाः ॥ ७९ ॥

बन्दी—हा हा धिक्कष्टम् ।

ध्रुवमिदमुपदिष्टं कैश्चिदाचार्यपादै-
र्यदुत जनकशोकस्यैकहेतुः कुमारी ।
अकलितकुलशीलोऽप्येष यत्कोऽपि धन्यो
द्रुपददुहितुरम्या वाञ्छति स्वामिभावम् ॥ ८० ॥

अर्जुनः—हंहो बन्दिदारक, किमत्र कुलान्वेषणेन । किं वा मे शीलपर्यालोचनया । धनुरारोपणपणपरिणेया द्रौपदी ।

(नेपथ्ये ।)

हंहो ब्राह्मण, त्वामेव समुदिता नृपतयो भाषन्ते—

सायकश्च त्वया मुक्तो यन्त्रं चा तेन चाहतम् ।
तन्मा वृथा विकत्थस्व न राधां विद्धवानसि ॥ ८१ ॥

(पुनः साक्षेपम् ।)

रे रे ब्राह्मण! मुञ्च विप्लवमसुं श्रुत्यर्थवीथीं स्मर
क्षत्रस्यात्र ननु स्वयंवरविधावेकाधिकारः स्थितः।
तच्चेन्नाद्रियसे स्मरार्द्रहृदयो दण्ड्यस्त्वमुर्वीभुजां
तत्संकर्षणकार्मुके समुदिता नैते क्षमन्ते नृपाः॥ ८२॥

अर्जुनः—(तान्प्रति।)

कस्य द्रोणो धनुषि न गुरुः स्वस्ति देवव्रताय
त्यक्ताभ्यासः कुरुपतिरयं श्रीसमुत्थैर्विलासैः।
भोः कर्णाद्याः! शृणुत तदिमां ब्राह्मणस्यास्य वाणीं
राधायन्त्रं रचयत पुनर्विद्धमप्यस्त्वविद्धम्॥ ८३॥

सखी—सखि! इतस्तरलितहारहारिवक्षः उन्मुक्तचक्रमुच्चण्डस्थितचित्रदण्डमाकर्णकृष्टकोदण्डमण्डलमधिष्ठितभिन्दिपालमाहितसंघट्टपट्टिशमसंख्यशङ्कुसंभूषणमलंकृतकनककवचं समन्ततः समुत्तरति वृन्दं नरेन्द्राणाम्।

बन्दी—

संघट्टोत्पिष्टचूडाच्युतमणिकणिकाकर्बुरैर्बाहुदण्डै-
स्तूणोत्कीर्णास्त्रदण्डाः क्षितिपतय इमे सर्वतः संरभन्ते।
अग्रे कृत्वा विलोलां द्रुपददुहितरं विद्धराधाशरव्यं
वाणं कोदण्डदण्डे विदधदयमितो वर्तते विप्रवीरः॥ ८४॥

(नेपथ्ये।)

देवस्य शुभगोः कुले नृपतयो ये चात्र चूडामणेः
श्रीकण्ठस्य निवेदयामि तदिदं तेषां हयेषामपि।
विप्रश्चीवरवान्सहायरहितः कोऽप्येष यः पश्यतां
राधावेधकरे हठेन हरते कीर्त्या समं द्रौपदीम्॥ ८५॥

भीमः—वत्स धनंजय! त्वं कराकलितद्रौपदीक एव मामनुवर्तस्व अहं राजचक्रस्य पुरतो भवामि। (तथा करोति।)

---

१. भीष्माय.

नकुलः—आर्य ! इदं तालतरमायुधीकुरु ।

(भीमस्तथा करोति ।)

बन्दी—

उत्पाटितमहातालः कृतचण्डगदाधरः ।
विप्रवीरो द्वितीयोऽपि पार्थिवानां पुरः स्थितः ॥ ८६ ॥

अर्जुनः—(राजकमवलोक्य ।)

अयमहमिह विप्रः प्रोतराधारहस्य-
स्त्रिभुवनजयमुद्रा द्रौपदी चेयमत्र ।
फलयथ यदि दोष्णश्चापदण्डप्रचण्डां-
स्त्यजत रथगजस्यास्मत्पुरस्योपकण्ठम् ॥ ८७ ॥

बन्दी—(निष्क्रम्य ।)

वीर्यं वचसि विप्राणां क्षत्रियाणां भुजद्वये ।
इदमत्यन्तमाश्चर्यं भुजवीर्या हि यद्द्विजाः ॥ ८८ ॥

(अर्जुनस्यैव पठति ।)

(नेपथ्ये ।)

साधु ब्राह्मण ! साधु क्षत्रमार्गमनुवर्तसे ।

भीमः—यद्येवम्,—

प्रसर्पतु रणाङ्गणे रुधिरकेलिकल्लोलिनी
भवन्तु फलिता इव द्विरदमुण्डखण्डैर्दिशः ।
नृमांसकवलान्तरेष्वपि च सान्निलेयैर्मुखैः
कृतान्तजयमङ्गलं विदधतु ध्वनिं फेरवाः ॥ ८९ ॥

(इति निष्क्रान्ताः सर्वे ।)

इति महाकविश्रीराजशेखरकृते प्रचण्डपाण्डवापरनाम्नि बालभारते नाटके
राधावेधो नाम प्रथमोऽङ्कः ।

द्वितीयोऽङ्कः

(ततः प्रविशति विदुरः सशारोपकरणः पुरुषश्च ।)

विदुरः—

आ देवाद्दिव्यपङ्केरुहसदनजुषोऽस्मिन्महाराजवंशे
विष्वक्सेनावताराद्द्विजयिनि जगतामत्र चित्रप्रसूतेः ।
हे विश्वे लोकपालास्त्वमपि वसुमति ब्रूहि वाचं पवित्रा-
मिन्दोरन्यस्य दृष्टो यदि किल कलयाप्यास्तृताङ्कः कलङ्कः ॥ १ ॥

तत्रैव गोत्रे संप्रति तु—

वाच्यं यत्र दुरुक्तयः कुचरितं नानाविधा वर्णिका
लोभः सान्द्रतमो रसः किमपरं भावश्च मोहो महान् ।
शैलूषैः कितवैरनेककपटश्रेणीमहानाटकं
द्यूतं यत्किल तत्र कौरवपतिः प्रस्तावनायां स्थितः ॥ २ ॥

पुरुषः—आर्य धर्मावतार विदुर ! किं पुनरेवं भण्यते ? यतो दूत-महत्तरा एवं मन्त्रयन्ति—

रणन्मणिनूपुरा रणरणद्धारच्छटाः
क्वणन्मणिकिङ्किणीमुखरमेखलामालिकाः ।
भवन्ति भवनाङ्गणेऽनघघनस्तन्यस्तेषां परं
प्रसन्नदिनस्वामिन इह जयन्ति द्यूतेन ये ॥ ३ ॥

विदुरः—तिमिंगिलगिलन्यायोऽयं शृङ्गयति नात्र जीयते । (विचिन्त्य ।)

श्रीनिर्वासनडिण्डिमो घनरवः सद्मः स्थितं छद्मनां
सत्योत्सारणघोषणा तत इतो लज्जा निवापाञ्जलिः ।
द्वारं दुर्यशसां पराभवपदं गोष्ठी गरिष्ठापदां
द्यूतं दुर्नयवारिधिर्निपततां कस्तत्र हस्तग्रहः ॥ ४ ॥

पुरुषः—आर्य धर्मावतार विदुर ! किं पुनरिदं सखेदं मण्यते ?

विदुरः—चण्डातक ! शृणु यन्मण्यते । (पुनस्तदेव पठति ।)

---

१. प्राक्तनच्छायारूपोऽयं श्लोकः अत एव च्छन्दोभङ्गः ।

चण्डातकः—अभिन्नो भ्रातृषु, स्वच्छचित्तो मित्रेषु, स्निग्धो बन्धुषु, निसर्गरक्तः कलत्रेषु, विनयभङ्गुरो गुरुषु, प्रसादनिष्ठो भृत्येषु महाराज-युधिष्ठिरः। तत्किमिति तत्रैष कौरवेन्द्रस्य विद्वेषपरिस्पन्दः?

विदुरः—किमुच्यते—

युधिष्ठिरो धर्ममयो महाद्रुमः स्कन्धोऽर्जुनो भीमसेनोऽस्य शाखाः।
माद्रीसुतौ पुष्पफले समृद्धे मूलं कृष्णो ब्रह्म च ब्राह्मणाश्च ॥ ५ ॥

(विचिन्त्य।) कौरवपतिस्तस्य प्रत्युदाहरणम्।

दुर्योधनो मन्युमयो महाद्रुमः स्कन्धः कर्णः शकुनिस्तस्य शाखाः।
दुःशासनः पुष्पफले समृद्धे मूलं राजा धृतराष्ट्रो मनीषी ॥ ६ ॥

यदयमाहूय वारणावतात्प्रेमप्रणयाभ्यां नाम शकुनिकर्णकुरुपतिप्रेरितेन धृतराष्ट्रेण युधिष्ठिरोऽभिहितः—'यदुत वत्स युधिष्ठिर! दुर्योधनकारिते सदसि भ्रातृद्यूतं प्रवर्तयितव्यम्' इति।

चण्डातकः—ततस्तेन किं प्रतिपन्नम्?

विदुरः—यत्पाशसयतो वन्य करी प्रतिपद्यते। तथा चाभिहितं तेन,—

राजसूयक्रतोर्यज्वा पाण्डुपुत्रो युधिष्ठिरः।
आहूतो न निवर्तेय द्यूताय च रणाय च ॥ ७ ॥

पुरुषः—अत एवाहं शकुनिना प्रगुणीकृत्याक्षप्रसारं शारफलकं समर्प्य च संप्रेषितोऽस्मि समाभाष्यम्। तदार्य! कथयस्व किं कारणं दुर्योधनस्य दुर्जयत्वे।

विदुरः—श्रुतो मया कुड्यान्तरितेन शकुनिना सह मन्त्रयमाणो दुर्योधनः—

---

१. अयं श्लोकोऽधिकश्चौमौ महाभारतस्थौ.

तत्रोत्सर्पिणि राजसूयसमये राज्ञः पृथाजन्मनो
द्वीपेशौर्विनयान्वितैरुपचितं चित्रैर्महाप्राभृतैः ।
प्रत्यक्षीकृतवान्यदस्मि विभवं कोपाधिकारे स्थित-
स्तेनाद्यापि निरौपधो मनसि मे दाहज्वरो वर्तते ॥ ८ ॥

अपि च, गान्धाराधिपते मातुल !

मायामये मयसभाधितले महाम्बु
त्यक्त्वा ततो व्रजति मय्यनभिज्ञभावात् ।
यत्कृष्णया विहसितं सह फाल्गुनेन
तन्मे मनः कुसुमलावमिदं लुनाति ॥ ९ ॥

(नेपथ्ये ।)

देवश्चन्द्रकुलप्रतापतिलकः पाङ्कुण्यवाचस्पति-
र्वीरो निर्मलकीर्तिनिर्जरगिरिर्भूखण्डविद्याधरः ।
कृत्स्नद्वीपजयैकलम्बितमहाश्वेतातपत्रोन्नतिः
पाण्डोः पाण्डुयशस्करो विजयते पृथ्वीं पृथानन्दनः ॥ १०

चण्डातकः—युधिष्ठिरबन्दी पठति किंनरकण्ठ एषः ।

(पुनर्नेपथ्ये ।)

नाले शौर्यमहोत्पलस्य विपुले सेतौ समिद्वारिधेः
शश्वत्खड्गभुजंगचन्दनतरौ क्रीडोपधाने श्रियः ।
आलाने जयकुञ्जरस्य सुदृशां कंदर्पदर्पे चिरं
श्रीदुर्योधनदोष्णि विक्रमधने लीनं जगन्नन्दति ॥ ११ ॥

चण्डातकः—एष दुर्योधनमागधः कलकण्ठो नाम ।

विदुरः—संप्राप्तावेतौ युधिष्ठिरदुर्योधनौ सभाम् । एते च भीष्मद्रोणकृपहार्दिक्यकर्णसोमदत्ताश्वत्थामादयो भीमसेनः कौरवेश्वरभ्रातृशतं च प्रविशति, तदावामपि प्रविशावः ।

(इति निष्क्रान्तौ ।)

विष्कम्भकः ।

---

१. उदाहृतोऽयं श्लोकः क्षेमेन्द्रेणौचित्यविचारचर्चायाम्-

(ततः प्रविशति युधिष्ठिरो भीमसेनश्च, दुर्योधनः शकुनिश्च, तयोश्च ताम्बूलकरङ्कवाहिन्यौ सुनन्दा सुरेखे च।)

युधिष्ठिरः—

निवर्तयाक्षान्शकुने शारक्रीडां प्रवर्तय।
धृतराष्ट्रस्य पाण्डोश्च ममाज्ञामौलिमश्नुते ॥ १२ ॥

कं च,—

राजसूयकृतोर्यज्वा पाण्डवोऽयं युधिष्ठिरः।
आहूतो न निवर्तेय द्यूताय च रणाय च ॥ १३ ॥

शकुनिः—(दक्षिणं बाहुमुद्यम्य।)

हंहो हस्त कृतास्त्र! दानसलिलप्रक्षालित स्वस्ति ते
लोकेष्वक्षविचक्षणश्च शकुनिः स्वाङ्केऽपि भक्तस्त्वयि।
वीरे माननिधौ पराक्रमधने तद्भागिनेये मम
श्रीः पार्थप्रथमादपास्य भवता कार्या हि दुर्योधने ॥ १४ ॥

दुर्योधनः—तदार्य! पणः क्रियताम्।

युधिष्ठिरः—

हारोऽयं केरलस्त्रीविहसितशुचिभिः पङ्क्तिभिर्मौक्तिकानां
शुक्लैणैकाकृतीनां कृतसकलसभागर्भचन्द्रोदयश्रीः।
भ्रातर्द्यूते पणो मे रजनिचरपतेरर्जितो राजसूये
यस्यैतन्मध्यरत्नं द्युत्यति ककुभः कौङ्कुमीभिः प्रभाभिः ॥१५॥

भीमः—भवतस्तु कः पणः?

दुर्योधनः—

राजावलीक्रमायातो राजकोषः पणो मम।
शकुन्तलाद्याभरणैर्यः पुनाति च पाति च ॥ १६ ॥

(उभौ क्रीडतः।)

शकुनिः—जितं जितं महाराजदुर्योधनेन। हंहो युधिष्ठिर! हारितो हारः।

---

१ आकाशस्थगृहविशेषेण; स च सर्वतोरक्ष्यः कार्तिकवान्तरधूलश्च.

(दुर्योधनः सुरेखायाः कण्ठे परिधत्ते ।)

सुनन्दा—(हसन्ती ।) हंहो महाराज दुर्योधन ! युधिष्ठिरकण्ठनिवेशिनमीदृशं हारं समर्थोसादृशजनयोग्यं यत्करोपि तन्न रोहिणीवल्लभकुलोचितमनुतिष्ठसि ।

भीमः—साधु सुनन्दे ! साधु । उचितमभिहितम् ।

सुरेखा—अयि उड्डामरशीले ! द्यूतजितेऽपि यन्त्रणा ।

शकुनिः—(स्वगतम् ।) प्रतिभावती सुरेखा । (युधिष्ठिरं प्रति प्रकाशम् ।) अपरः पणः क्रियताम् ।

युधिष्ठिरः—संपादिता तातधृतराष्ट्रस्याज्ञा तदास्ताम् ।

शकुनिः—(विहस्य ।) दुर्योधने क्रीडति कथं धर्मराजो विरमति ? नन्वधुनैव प्रतिज्ञातम्—'आहूतो न निवर्तेय द्यूताय च रणाय च' ।

युधिष्ठिरः—(सुनन्दामालोक्य सस्मरणम् ।) यद्येवम्,—

कुर्वन्त्यो नयनैरपाङ्गतरलैर्दीर्घायुषं मन्मथं
तन्वन्त्यो हृदि रागिणां रतिमहावल्लीविलासाङ्कुरम् ।
न्यस्यन्त्यो मदिरामदस्य च हठात्कांचिन्मनोहारिता-
मङ्गैर्मुग्धमधूकपाण्डुभिरिमा वाराङ्गना मे पणः ॥ १७ ॥

भीमः—भवतस्तु कः पणः ?

दुर्योधनः—

सुधावीचीमुचां वाग्भिर्विभ्रमावलिकुण्डलः ।
ममापि वारनारीणां स्मरस्मेरो गणः पणः १८ ॥

(उभौ क्रीडतः ।)

शकुनिः—जितं जितं महाराजदुर्योधनेन ।

दुर्योधनः—सुरेखे ! त्वमेतासां सुनन्दाप्रभृतीनामधिष्ठात्री भव ।

सुरेखा—यत्कुरुपतिराज्ञापयति । (प्रणमति ।)

सुनन्दा—धर्मनन्दनो यदि पुनर्जयन्नस्ति सुरेखामभृतीनां तदहमप्यधिष्ठात्री आसिष्ये ।

शकुनिः—अपरः पणः क्रियताम् ।

युधिष्ठिरः—

निर्गलविनिर्गलद्गुलगुलाकरालैर्गले-
रमी तडिति ताडितोद्भटरडिण्डिमोद्दामराः ।
मदाचमनचञ्चुरप्रचुरचञ्चरीकोच्चयाः
पणः परिणतिक्षणक्षततटान्तरा दन्तिनः ॥ १९ ॥

भीमः—भवतस्तु कः पणः ?

(दुर्योधनस्तदेव पठति । उभौ क्रीडतः ।)

शकुनिः—जिता दन्तिनः ।

दुर्योधनः—(नेपथ्यं प्रति) दुःशासन ! द्यूतदन्तिनां प्रणेता त्वं भव ।

(नेपथ्ये ।)

यदादिशत्यार्यदुर्योधनः ।

शकुनिः—अपरः पणः क्रियताम् ।

युधिष्ठिरः—

क्षणज्जघणिनकिङ्किणीमुखरकंधरासंधिभि-
र्युतास्तरुणतित्तिरिच्छदमनोहरैर्वाजिभिः ।
द्रुणाङ्कघनपट्टिशत्रिशिखखड्गिनः स्तम्भिनो
रथाः प्रचलकाञ्चनध्वजमहापताकाः पणः ॥ २० ॥

(उभौ क्रीडतः ।)

शकुनिः—हारिता रथाः ।

दुर्योधनः—(नेपथ्यं प्रति ।) सखे अङ्गराज ! त्वं रथानां नेता भव ।

(नेपथ्ये।)

यदादिशति कौरवेश्वरः।

शकुनिः—अपरः पणः क्रियताम्।

युधिष्ठिरः—

महीधरधरासु ये सनिनदं पतद्भिः खुरै-
र्लिखन्ति च पठन्ति च स्फुटतरं टकारानिव।
विरोचनहयावलीकुलभुवां स तेषामयं
पणः पवनरंहसां मम तुरंगमाणां गणः॥ २१

(उभौ क्रीडतः।)

शकुनिः—जितं जितं महाराजदुर्योधनेन।

दुर्योधनः—मातुल! त्वमेषां तुरंगमाणां भर्ता भव।

शकुनिः—यदाह महाराजः। (राजानमुद्दिश्य।)

किं वाजिभिः किमु गजैः किमथो रथैर्वा
सापत्नकं न धृतये धरणी पणोऽस्तु।
एकातपत्रमिदमद्य चिराय राज्यं
धर्मात्मजो भजतु वा धृतराष्ट्रजो वा॥ २२॥

युधिष्ठिरः—यद्येवम्,—

ऐलः प्राक्स पुरूरवाः प्रभुरभूद्यस्योर्वशी वल्लभा
दुष्यन्तः स च योऽप्यसूत भरतं शाकुन्तलं शान्तये।
श्रीमाञ्शंतनुरग्रिमः स च सतां गङ्गाकलत्रेण य-
स्तत्सिंहासनमम्बुराशिरशनां शासन्महीं मे पणः॥ २३॥

भीमः—भवतस्तु कः पणः?

(दुर्योधनस्तदेव पठति।)

(नेपथ्ये।)

राजन्युधिष्ठिर! नराधिप कौरवेन्द्र!
वंशे यवां भगवतो भवशेखरस्य।

द्यूतं न युष्मदुचितं ननु चिन्त्यतां च
कै क्षत्रियैर्वसुमती पणिता पुराणे ? ॥ २४ ॥

युधिष्ठिरः—भो सभासद ! कथं किल राजसूययज्ञा प्रतिज्ञातमर्थं कदर्थयति ?

दुर्योधनः—हहो सभ्याः ! अक्षधर्मा अपि न निपिध्यन्ते ।

(उभौ क्रीडतः ।)

शकुनिः—जित जित महाराजदुर्योधनेन ।

दुर्योधनः—स्वयमहमस्य राज्यार्धस्याधिष्ठाता ।

शकुनिः—अपरं पणं क्रियताम् ।

युधिष्ठिरः—किं नामावशिष्टं यत्पणीक्रियते ?

शकुनिः—किं नामापहारितं शरीरे तिष्ठति ? शरीरधना हि राजानः ।

युधिष्ठिरः—यद्येवम्,—

निर्यान्ति यस्य वदनाद्धितथा न वाचो
यो राजसूयविधिनिर्धुतपापपङ्कः ।
सोढा न चानुजमहाविरहस्य योऽसि
न्यस्योऽय स्वयं तव पणं मथमं पृथासूः ॥ २५ ॥

भीमः—(स्वगतम् ।) कथमात्मापि पणीकृतः ? अहो सत्यसंधता आर्ययुधिष्ठिरस्य । (प्रकाशम् ।) भवतस्तु कः पणः ?

दुर्योधनः—

हेलानमद्भूपकिरीटविटङ्ककोटि
व्यंकारिरत्नचितपाश्वनपादपीठः ।
वैतालिकैः स्तुतसमस्तजयोत्सवार्थी
सोऽय स्वयं प्रतिपणस्तव कौरवेन्द्र ॥ २६ ॥

(उभौ क्रीडतः ।)

शकुनिः—जित जित महाराजदुर्योधनेन ।

युधिष्ठिरः—जितोऽस्मि । तन्नियोजय कृत्ये ।

शकुनिः—पुनरपरः पणः क्रियताम् ।

युधिष्ठिरः—कः पुनरपरः पणः ?

शकुनिः—भ्रातरः ।

युधिष्ठिरः—

यो मन्थानकरः क्रतौ निजकुलप्राकारबन्धश्च यो
दोर्भ्यां यः प्रसभं व्यधत्त च जरासंधस्य संधिच्छिदाम् ।
सोऽयं दृप्तहिडिम्बडिम्बविजयी वीरस्त्रिलोकाद्भुतं
भीमो भीमपराक्रमः पृथुगदाव्यग्राग्रपाणिः पणः ॥ २७ ॥

भीमः—भवतस्तु कः पणः ?

दुर्योधनः—

संकर्षणान्निजतनूज्ज्वलकीर्तिराशेः
सार्धं मयाधिगतदिव्यमहारहस्यः ।
त्वत्सोदरस्य मम सोदर एष वीरो
दुःशासनः प्रतिपणोऽस्य वृकोदरस्य ॥ २८ ॥

(उभौ क्रीडतः ।)

शकुनिः—जितं जितं कौरवराजेन । अपरः पणः क्रियताम् ।

युधिष्ठिरः—

कर्णप्रावरणैः सहैकचरणानश्वाननैः किंनरां-
स्त्र्यक्षैस्तुल्यशिखान्वलीमुखमुखैर्यक्षांश्च रक्षांसि च ।
निर्जित्या कनकाद्रितो जनपदान्यो राजसूयक्रतौ
सम्राजं कृतवान्युधिष्ठिरमलं सोऽयं किरीटी पणः २९ ॥

भीमः—भवतस्तु कः पणः ?

यो भार्गवाद्भगवतोऽर्जितचापवेदो
द्रोणेन तुल्यगरिमा मम धर्ममित्रम् ।
स प्रीणितार्थिजनवाग्भिररिक्तकर्णः
कर्णः स्वयं प्रतिपणोऽस्य धनंजयस्य ॥ ३० ॥

(उभौ क्रीडतः।)

शकुनिः—जित मित कौरवराजेन। तदपर पण क्रियताम्।

युधिष्ठिरः—

सौहार्दात्प्रणयादथ प्रथिमत स्नेहातिरेकाच्च वा
यो देवेन रथाङ्गिनापि समरे हित्वा करं लम्भित।
पाश्चात्यक्षितिपालनिर्मलयशा प्रस्तारहारान्हर-
न्सोऽयं मे नकुलः पुरैकतिलको युद्धप्रवीणः पणः॥३१॥

भीमः—भवतस्तु कः पणः?

दुर्योधनः—

नकुलस्यापि ते भ्रातुर्भ्राता प्रतिपणो मम।
बिभ्रत्कीर्तिमहानाभिं विकर्णः कर्णधारताम्॥३२॥

(उभौ क्रीडतः।)

शकुनिः—जित जित महाराजदुर्योधनेन। तदपरं पणं क्रियताम्।

युधिष्ठिरः—

हेलाक्षोडितपाण्ड्यकेरलबलो यः सिंहलाँल्लङ्घयन्
प्राक्षम्भुभ्य विभीषणेन तरसा दूरात्करं लम्भितः।
नित्यं रावणनिर्जितामरबृहत्सैन्यं सभृतो भूपतेः
सौम्यश्रीः सहदेव एष स पणः क्षत्रैकचूडामणिः॥३३॥

भीमः—भवतस्तु कः पणः?

दुर्योधनः—अनिर्जितो भ्राता विकर्ण एष मम पणः।

(उभौ क्रीडतः।)

शकुनिः—जित जित महाराजाधिराजेन। तदपरं पणं क्रियताम्।

युधिष्ठिरः—किं नाम[प]हारितम्। कः पुनरपरः पणः क्रियताम्?

शकुनिः—धर्मदारा द्रौपदी।

युधिष्ठिरः—

संभूता द्रुपदाध्वरे हुतभुजः पाण्डोर्नृपस्य स्नुषा
राधावेधमहापणेन विजिता राज्ञां पुरः पश्यताम् ।
भूभृन्मौलिमणीन्द्रदीधितिजलैर्यां स्नातपादाम्बुजा
सा देवी विनयाभिमानवसतिः कृष्णा वितृष्णा पणः ॥ ३४ ॥

भीमः—भवतस्तु कः पणः ?

दुर्योधनः—

ज्येष्ठत्वात्पाण्डुपूज्यस्य धृतराष्ट्रस्य या स्नुषा ।
सा देवी देवरवती मम भानुमती पणः ॥ ३५ ॥

सुनन्दा—(स्वगतम् ।) एष स ज्येष्ठाभिः कनिष्ठानां विनिमयः ।

(उभौ क्रीडतः ।)

शकुनिः—जितं जितं महाराजदुर्योधनेन ।

दुर्योधनः—दुःशासन ! आनीयतां द्यूतदासी द्रौपदी ।

(नेपथ्ये ।)

यदादिशति पाण्डवकौरवेश्वरः ।

दुर्योधनः—अपरः पणः क्रियताम् ।

युधिष्ठिरः—न मे पणान्तरमस्तीति प्रतिभाति ।

दुर्योधनः—

वर्षाणि द्वादशारण्ये सह तिष्ठन्तु निष्ठया ।
अज्ञातचर्यया वर्षमावयोर्युधि जीयते ॥ ३६ ॥

(युधिष्ठिरस्तदेवानुवदति । उभौ क्रीडतः ।)

शकुनिः—जितं जितं महाराजदुर्योधनेन ।

(नेपथ्ये ।)

पञ्चानां या कलत्रं द्रुपदमखविधावद्भुतं जन्म यस्याः
पूता या राजसूयावभृथपरिगमे मन्त्रपूतैः पयोभिः ।
तामेनां द्यूतदासीं कुरुपतिनियमं मूर्ध्नि कृत्वा मयान्तः
केशेष्वाकृष्यमाणां शृणुत नृपतयो यस्य शक्तिः स पातु ॥ ३७ ॥

दुर्योधनः—कथमय सपादितमदाज्ञ सद्रौपदीको वत्सो दु शासनः प्राप्त ।

(तत प्रविशति यथानिर्दिष्टा द्रौपदी दु शासनश्च । दु शासनस्तदेव पठति ।)

सुनन्दा—(सहसोपसृत्य हस्तामोट नाटयन्ती ।) दु शासन ! मुञ्च मुञ्च पाञ्चालीकेशपाशम् ।

दुःशासनः—(तामपनुद्य सभ्यतादवलोक्य विहस्य च ।)

यन्मुक्तं स्फारतारध्वनिभरितसभाकुञ्जगर्भं सरोष
हुंकारं फातराणा तरलितहृदय फाल्गुनस्याग्रजेन ।
दुर्वृद्धिर्हारयष्टीनहननिबिडिताङ्गुष्टकूटाग्रपैस्तै
न्यस्ता रङ्गेषु रक्तत्सरुषु सरभस सप्रहाराय हस्ता ॥ ३८ ॥

सुनन्दा—(पुन पाणिमाकृष्य नाटयित्वा ।)

अभ्याचुम्बितपल्लवाना ग्रहणा स्नेहेन धूम्रद्युतो
येषा पुष्पलवेणिबन्धनकर स आस्ते रात्रिंदिनम् ।
चण्ड पाण्डवगेहिन्याश्चिकुरे रे कर्षता त्वया
किं दु शासन ! दु सहा कवलिता हालाहलाग्राङ्कुरा ॥३९॥

द्रौपदी—वत्स दु शासन ! मुञ्च मुञ्च केशपाशम् । कथमेकवस्त्रा भूत्वा गुरुनरेन्द्रपुरत सचरिष्ये ?

दुःशासनः—(विहस्य ।) नन्वपनयाम्येकवस्त्रता कोटवीकरणेन ।

(बहुवस्त्रतापनयन नाटयन् ।)

यावद्यैक द्रुपददुहितु कृष्यते वस्त्रमस्या
स्तस्यानऽन्यद्भवति पिदधत्तावदङ्ग ततश्च ।
खिन्न चैतन्मम करतल वासना चेव राशि
स्तन्मन्येऽसौ त्रिभुवनमनोमोहिनी वेत्ति निद्राम् ॥ ४० ॥

द्रौपदी—भो दु शासन ! मम त्रिभुवनपतिभर्तृननोचित करोषि ?

---

१ प्राकृतच्छायेयम् २ कोटवी नशा की

दुःशासनः—अये पाञ्चालि ! पञ्चानां कलत्रं भूत्वा किमपि व्रीडसे ! (साक्षेपम् ।)

हे द्रौपदि ! त्वमसि कात्र पतिव्रतानां
किं दृष्टपञ्चपुरुषा वनिता कलत्रम् ।
दुर्योधनस्य तदिमं भज वाममूरु-
मास्फालितं मुकुलिताङ्गुलिना करेण ॥ ४१ ॥

द्रौपदी—(तदनादृत्याञ्जलिं बद्ध्वा ।) हंहो सभासद्भस्थिता गुरवो नरेन्द्राश्च ! द्रौपदी निर्णयं पृच्छति ।

(नेपथ्ये ।)

द्रौपदि ! विकर्णस्त्वामाह—'कीदृशो निर्णयः ?'

द्रौपदी—किमहं प्रथमं हारिता द्यूते आत्मा वा धर्मनन्दनेन !

(नेपथ्ये ।)

प्रजावति ! तवायमभिप्रायः—

यद्यहं हारिता पूर्वं भवामि धृतकिंकरी ।
आत्मा वा हारितः पूर्वं तदा नासि च हारिता ॥ ४२ ॥

दुःशासनः—अरे रे अकर्णविकर्ण ! सभामध्यमध्यासीने भुवनपतावार्यदुर्योधने किमित्थं प्रलपसि !

(प्रविश्य ।)

विकर्णः—(साक्षेपम् ।)

धृतं क्षत्रकुलव्रतं न स भवेज्ज्येतुः पणः स्वामिनः
संरम्भः किमकाण्ड एव भवता सद्धर्म यत्त्यज्यते ।
भो दुःशासन ! कः क्रमो द्रुपदजाकेशाम्बराकर्षणे
दुर्यूतं क्षमते न कस्यचिदयं ज्ञात्वा विकर्णस्तव ॥ ४३ ॥

दुर्योधनः—(सभ्रुकुटीबन्धम् ।) अरे रे धार्तराष्ट्रवटो ! वाचाटोऽसि ।

विकर्णः—तदधर्मभीरुतया,—

न्यायवादी विकर्णोऽत्र भवद्भ्यो यद्यहं बहिः ।
तद्यूयं शतमेकोनं षट् च संप्रति पाण्डवाः ॥ ४४ ॥

दुर्योधनः—तदतिमुक्तस्तव कतरः पन्थाः ?

विकर्णः—

यां मे बलः स बलवान्दलितप्रलम्बां
शिष्येषु सत्स्वपि महत्सु गदामदत्त ।
सा मे यदादिशति हस्ततलावतीर्णां
दुर्वृत्तखण्टनविधा मम सोऽत्र पन्थाः ॥ ४५ ॥

(समन्तादवलोक्य ।)

क्षत्रैकत्रासचिन्ताकुलमनसि नभःसिन्धुपुत्रे पवित्रे
द्रोणे द्राक्श्मश्रु शुभ्रं वलयति शकुनौ शिक्षयत्यक्षशिक्षाम् ।
कर्णे कर्णान्तिकस्थं हसति कुरुपतौ दृप्य. पाण्डवानां
द्रष्टुं दुःशासनं च क्षितिपतितिलकं यान्ति धर्मात्मजं च ॥ ४६ ॥

(दुःशासनः 'हे द्रौपदि' [२।४१] इत्यादि पठति ।)

विकर्णः—(विचिन्त्य ।) अहो उचितकारिता पाण्डवानाम् ।

आकर्ण्य कौरवकुमारबलं प्रचण्ड
मत्युद्धसन्ति गुरुरोषकषायतारः ।
द्राग्दृप्यतो नृपतिसंसदि पाण्डवानां
दृष्ट्वा युधिष्ठिरमुखं पुनरापतन्ति ॥ ४७ ॥

(पुनरवलोक्य ।) अहो किमपि महारम्भ सभासदां क्षोभ ।

द्योतच्चूडामणीनां चलनझणझणत्कारिहारच्छटानां
प्रेङ्खोलत्कङ्कणालीकलकलमुखरैर्दोर्भिरुद्दामराणाम् ।
निःश्वासैः साट्टहासं किमिदमिदमितो वेल्लिताभ्रूलतानां
संक्षोभो भूपतीनां विततमपि समागर्भरं-भ्र रणद्धि ॥ ४८ ॥

(इतोऽवलोक्य ।) अहो कौरवपतेराज्ञा । अहो सत्यता महीपतीनाम् ।

अस्मिन्महासदसि कौरवपाण्डवीये
क्षोभं गते द्रुपदजाचिमुराञ्चनाभि ।
दुर्योधनेन भ्रुकुटी कुटिलीकृता च
जाताश्च भूमिपतयो लिखिता इवेते ॥ ४९ ॥

(सरभसं युधिष्ठिरमुपसृत्य ।) आर्य युधिष्ठिर ! प्रतिष्ठस्व वनवासाय । द्यूत-हारितमनुष्ठीयताम् ।

(सर्वे समुत्तिष्ठन्ति ।)

द्रौपदी—रे रे दुर्योधन !

एष मे कचकर्षणापरिभव आमुक्तबन्धक्रम-
स्तत्सत्यमेव चञ्चरीकरमणीयकेशपाशच्छटा
नखाग्राङ्कुशकोटिपाटितमहादुःशासनोरःस्थली ।
रक्तोल्लेखिकरेण निश्चितमिदं भीमेन या बध्यते ॥ ५० ॥

भीमः—रे रे दुर्योधन ! भीमसेनस्य शृणु प्रतिज्ञाम्,—

येनेयं याज्ञसेनी नृपसदसि हठात्केशहस्ते गृहीता
यश्चास्या कोटवीत्थं वत मिदधदितो वाससा राशिकारं ।
सोऽहं तेनैव रोषारुणनयनपुटं पाणिनोत्पाटितेन
त्वां हन्ता हन्त वक्षस्तटभुवि रटतो दुष्टदुःशासनस्य ॥ ५१ ॥

अपि च रे रे दुर्योधन !

नखमुखकचपाठनद्युटितकीलसाद्रक्षसं
शिरासरणिभिर्मुखे रुधिरमुत्फलत्फेनिलम् ।
महाबलिमयं रुषा हृदि निवेदयं दोःशासनं
युधिष्ठिरसहोदर श्रृणु वृकोदरं पास्यति ॥ ५२ ॥

किं चैकस्मिन्नपराद्धेऽपि तत्सहचारिणोऽप्यपराद्धार[1] ततश्च,—

---

१ इयमपि प्राकृतच्छाया

द्रोणादुपार्जितधनुर्निगमप्रकर्षा-
त्सर्वानपि स्थितवतो वयसि प्रकाशे ।
भ्रातृघ्नातं तव हनिष्यति भीमसेनः
काले गदप्रहरणो रणकर्मशौण्डः ॥ ५३ ॥

ततश्च,—

दोर्दण्डमण्डलितचण्डगदाप्रहारै-
रामूलतस्तडदिति द्रुटितोरुसंधेः ।
दुर्योधनस्य विकटां मुकुटाग्रपीठीं
द्राग्लोटयिष्यति रणे चरणेन भीमः ॥ ५४ ॥

शकुनिः—निर्गच्छत वनवासाय । को हि द्यूतजितानामुद्विजते मौखर्येण ?

(इति निष्क्रान्ताः सर्वे ।)

इति महाकविश्रीराजशेखरकृते प्रचण्डपाण्डवापरनाम्नि
बालभारते नाटके द्वितीयोऽङ्कः ।



परिशिष्टम्

कर्पूरमञ्जरीगत-छन्दसां सूचिः

[अत्र ( ) एतच्चिह्नान्तवर्त्यङ्का जवनिकान्तरनिर्देशकाः, अग्रेतनास्तच्छ्लोकाङ्काश्चेति पर्यवसेयम् ।]

आर्या (१) ३, ५, ७, ८, ९, १०, (२) १२, १३, १४, १५, १६, १७, १८, १९, २०, २१, २२, ३३, ३४, ३५, ३६, ३७, ३८, ३९, ४०, ४२, ४३, ४८, ४९, (३) ८, (४) १८.

इन्द्रवज्रा (१) २२, (३) ५, ६, (४) ९.

उपगीतिः (२) ४५.

उपजातिः (१) २८, ३१, (२) २५, (४) १०, ११, १२, १४.

उपेन्द्रवज्रा (४) १३.

गीतिः (१) ६.

पुष्पिताग्रा (१) २, (४) १.

पृथ्वी (१) ३४, (२) ३२, ४७, (३) २०, २६, (४) २, ५.

मन्दाक्रान्ता (१) ३०, ३३, (२) २, २३, ३०.

मात्रिकः (?) (३) ३०.

मालिनी (२) ०, २४, ४४, (३) २, ७, १८, (४) १९.

रथोद्धता (१) ११, (२) ७, (३) २१, २३, २४, ३१, ३२, ३३, ३४.

वंशस्थम् (३) ४.

वसन्ततिलका (१) १४, १९, २१, २४ २५, २७, (२) ४, ५, ६, २१, (३) ९, १०, ११, १२, १३, १४, १५, १६, १७, २२, (४) ४, ७, २०.

शशिवदना (३) २९.

शार्दूलविक्रीडितम् (१) १, १३, १६, १७, १८, २०, २६, २९, ३२, ३५, (२) १, ३, ८, २७, २९, ४६, (३) १, ३, २५, २७, (४) ३, ८, २२.

शालिनी (१) २३.

शिखरिणी (२) ११.

स्रग्धरा (१) ४, १५, ३६, (२) १०, २८, ३१, ४१, ५०, (३) १९, २८, (४) ६.

स्वागता (१) १२, (४) १५, १६, १७, २१.

कर्पूरमञ्जरीस्थश्लोकानां सूची ।

	जव०	श्लो०
अ		
अंगं चंगं णिअगुणगणालंकि	१	३३
अंगं लावण्णपुण्णं	३	१९
अंतो णिविट्ठमण०	३	१२
अकलिअपरिरंभविब्भमाइं	१	२
अकुंकुममचदणं	३	२६
अग्गम्मि भिंगसरणी	२	६
अत्थविसेसा ते चिअ	१	७
असोअतरुताडणं	२	४७
आ		
आत्थाणीजणलोअणाग	२	३
इ		
इअ एआइ विलासुज्जलाइं	२	४०
इअ देवीअ जहिच्छं	२	२२
इमा मसीकज्जलकालकाआ	४	१३
इह कुसुमसरेकगोअराणं	४	१
इह जइ वि कामिणीण	२	४८
ई		
ईसारोसप्पसाअप्पणइसु	१	४
उ		
उग्घाडिज्जंति .	१	३६
उच्चेहिं गोउरेहिं	२	३१
उट्ठिऊण घणभारभंगुरं	३	२१
उवएसु वि सवणेसु	२	१८
उवरिट्ठिअघणप्पब्भार०	२	३३

	जव०	श्लो०
ए		
एक्केण पाणिणलिणेण	१	२७
एद वासरजीअपिंडसरिसं	१	३५
क		
कंठम्मि नीअ टविदो	२	१७
कप्पंतकेलिभवणे	४	१८
कावि वादिदकराल	४	१५
किं कज्ज कित्तिमेण	२	२८
किंकिणीकदरणज्झणमहा	४	१६
किं गेअणट्टविहिणा	३	१४
किं मेहलाबलअ	३	१३
किं लोअणेहिं	३	१६
किसलअकरचरणा वि	२	४२
कीए वि संघडदि	३	९
कुंतलेसरसुआ	४	२१
कुडिलालआण माला	२	२०
कुवलअनिलअअसोआ	२	४३
केदईकुसुमपत्तसंपुडं	२	७
कोउहल्लरसचंचलवेसा	४	१७
ग		
गाअंतगोवअवहूपअपेरिं	१	२१
घ		
घणमुग्घट्टिदमगं	२	१२
घणसारतारण अणाइ	२	२१

	जव०	श्लो०
च		
चंडवालधरणीहरिणंको	१	२१
चाहुआणकुलमोलिमालिआ०	१	११
चित्ते वहुट्टदि ण खुट्टदि	२	४
छ		
छोलंति दंतरअणाइ	५	१४
ज		
जं धोअंजणसोणलोअणजु	१	२६
जं मुक्का सवणतरेण सहसा	१	२९
जच्चजणजणिदपसाहणाइं	२	१९
जस्सिं विअप्पघडणाइ	३	१०
जाअं कुंकुमपकलीढमरट्ठी	१	१६
जा चक्कवट्टिघरिणी	३	१५
जाण सहाअपसरत	३	११
जाणे पंकरुहाणणा	३	३
जिस्सा दिट्ठी सरलधवला	२	२३
जिस्सा पुरो हरदि	३	२२
जे कंटआ	४	२०
जे णवस्स तिउसस्स	३	२४
जे तीअ तिक्खचलचक्खुति	२	५
जे लंकागिरिमेहलाहिं	१	२०
ण		
ण ट्ठाणाहिं तिलतरं पि	२	१
णवकुरवअरुक्खो	२	४४
णहयहलिदजोण्हाणिब्भरे	३	७
णिसण्णचंगस्स वि	२	२५
णिसा तलिनविभरा	४	२
णीसासा हारजट्ठीमरिसप	२	१०
णूणं दुचे इह	३	१७
णहागावमुहाहरणुच्चआए	१	२८

	जव०	श्लो०
णअणाइँ पसइसरिसाइँ	२	३८
त		
तदो चउस्सट्ठिसु सुत्तिसु	३	४
तहा रमणवित्थरो जह ण	१	१४
ताडंकजुअं गडेसु	२	३७
तारदोलणहेलासरंत	२	३५
तिक्खागं तरलाणं	२	४६
तिवलिवलिअणाही	२	२४
तिस्सा ताव परिक्खणाअ	२	२९
तीए णिअंबफलए	२	१५
तेणं च मुत्ताहलमंडलेण	३	५
थ		
थोराण थण आण	२	२७
द		
दसेमि तं पि	१	२५
दज्झतागुरुधूपवट्टिकलिआ	३	२७
दट्ठूण थोरथणतुंगिमाण	३	६
दिण्णा वलआवलीउ	२	१६
दिसवहुतलो	३	२९
दूरे किज्जदु चंपअस्स	३	१
देंता कप्पूरपूरच्छुरणमिस	३	२८
दोलारअविच्छेओ वहं	२	३९
प		
पढीणं गंडवालीपुलअणचअ	१	१५
पंडुच्छविच्छुरिद	४	४
पंडुरेण जइ रजए	३	१२
परं जोण्हा उण्हा गरलमरि	२	११
पसरां णवरूअभंगिपडणा	४	८
परिअमंतीअ	४	१८
परमा सद्दअर्थपा	१	०

	अव०	श्लो०
फ		
फुल्लिअरं कल्पकूरमंमं	१	१९
ब		
बालइं कइराओ	१	९
बालाओ होंति	२	४९
बालो वि कुरयअतरु	२	४५
बिंबोट्ठे बहलं ण देंति	१	१३
भ		
भई होउ सरस्सइंअ	१	१
भाव ! कहिज्जउ	१	५
भुअगजअउडामा '	४	१९
भूगोले तिमिराणुवधमन्निणे	३	२५
म		
मंदरे मसहरस्स	३	३१
मतो ण सतो ण अ	१	२२
मत्तिट्ठी ओट्ठमुहा	२	४१
मत्ताण्णगयण्हघणघट्टन०	४	७
मत्ताणे गिरिगहपंकजल	४	३
मज्झ हत्थट्ठिदपाणिरहया	३	२३
मण्णे मज्झो तिवलियन्निअं	१	३०
मणगमंजीरजुअं चरणा	२	१३
मणगमणिगुप्प	३	२
मा कहिं वि	३	३२
माणं मुंचध देह पलाइअजे	१	१८
मुहमंक हरिणंक	३	३४
मुणि भणंति हरिवरहमुहा	१	२४
मुद्दाण णाम हिअमाइ	२	२६
मूणाहिंतो परुदत्थहुकंठगुरं	२	२
मोत्ताहलिलाहरमुहआओ	४	९
मोत्तूण अण्णा	४	१२

	अव०	श्लो०
र		
रंडा चंडा दिक्खिदा	१	२३
रणंतमणिणेउर	२	३२
राअसु अपिच्छणीअं	२	१४
रूवेण मुक्का वि विभूसअंति	१	३१
ल		
लंकातोरणमालिआसरलिंगो	१	१७
लावण्णं णवजअकंचणगिहं	१	३२
लीलुत्तंसो मिरीसं	४	६
लोआणं लोअणेहिं	२	५७
व		
विच्छाअंतो	२	३०
विस व्व विसकंदली	३	२०
स		
संमुहपवणपणोल्लि०	२	३६
सत्थो णंदउ सअलगाणं	४	२२
समणियलअकंचीणेउरा	३	१८
समोसरीआ	४	११
सयहररहसमरहो	३	३०
सलिहदमंडणाअ	१	३
सह हियअमिआहिं	२	९
सुविणअमेअमवगयं	३	८
सो अरए कई	१	१०
सो सहओ सि	१	६
सरंघतसरंगिओ	४	५
ह		
हंसि कुसुमरेहजिअलच्छु	२	८
हत्थे महामंगलकीधराओ	४	१४
हिंदोलन्तिलासंघट्ट	२	३४

बालभारतस्थश्लोकानां सूची ।

	अ०	श्लो०
अनूचानो हि यद्भूते सा	१	१०
अम्बाचुम्बितपल्लवानां ब०	२	३९
अयमहमिह विप्र. श्रोत	१	८७
अयमहिमरुचिर्भजन्प्रतीचीं	१	२१
अस्मिन्महास्त्रदसि कौरव०	२	४२
अस्य वैष्णवमिदं महाधनुः	१	६९
अस्यासमं समरकर्म दिद	१	६८
अस्याहवे दलितदाडिम०	१	४७
आकर्णाञ्चितचापमण्डल०	१	७८
आरण्यं कोरवकुमारवलं	२	४७
आ देवाद्दिव्यपक्षैरहसदन०	२	१
आद्यः कन्दो वेदविद्याल०	१	३
आपन्नार्तिहरः परात्मभवनः	१	११
आर्यो वेत्ति निजां न विक्र०	१	२३
उत्पाटितमहाताल. क्षुण्ण०	१	८६
उद्यतः प्रनुवृशानुजन्मनः	१	६०
एतत्कृष्णस्य शार्ङ्गं ननु ...	१	७१
एष मे कपकर्षेणापरिभवः	२	५०
ऐलः प्राक्स पुरूरवाः प्रभु०	२	२३
कण्ठे मौक्तिकदाम पण्डित०	१	२०
कर्णावावरणः सहकवचणा०	२	२९
कस्य द्रोणो धनुषि न गुरः	१	८३
किं धात्रिभिः किमु गृहैः	२	२२
किं किं किं नु नु सुरधनेः	१	५२
कुर्वन्तो नयनैरपाङ्गतरलै०	२	१७
क्षत्रैकत्रासचिन्ताकुलमनसि	२	४१
गान्धाराधिपतेः पुत्रः सुब०	१	४३
चापं प्रति त्रिचतुराणि प०	१	४१
द्योतच्चूडामणीनां चलन०	२	४८
जातं कौकसभङ्गतः शक०	१	७०
जैत्रं तन्त्रं कुसुमधनुषः...	१	७९
ज्येष्ठत्वात्पाण्डुपूज्यस्य धृत०	२	३५
क्षणज्झणितकिङ्किणीमुखरकं	२	२०
तथोरसर्पिणि राजसूयसमये	२	८
तरङ्गय दृशौ मनाक्स्थगय	१	३१
तस्यैव शम्बरमहासुरसु...	१	५९
दक्षिणं करमुपैति वामतो	१	६६
दन्तोलूखलिभिः शिलोञ्छि०	१	१९
दु.शलागुणगणेन रञ्जितो...	१	४८
दुर्नमं यदि मुरारिकार्मुकं	१	२४
दुर्नमं दहनसंभवं धनुः ...	१	३९
दुर्योधनो भूपकिरीटवि० ...	१	४९
दुर्योधनो मन्युमयो महा०	२	६
दूरोदञ्चिमरीचिरञ्जरचनाचि	१	३८
देवश्चन्दनपुलकप्रतापतिलकः	२	१०
देवस्य गुप्तये. कुले भूप०	१	८५
दोर्दण्डमण्डलितचण्डगदा०	२	
धृतं शस्त्रकुलप्रते न स	२	४१
द्रोणादुपाग्निपनुर्निगम०	२	५१
द्रौपदी	१	४१

	अ०	श्लो०
कर्णं जङ्गमां न मेदिनि	१	७७
चतुर्विंशारहस्येषु शिल्पोऽयं	१	६१
धर्मे चार्थे च कामे च मोक्षे	१	१८
धार्तिं द्रुपदजाम्बयंवरे	१	४५
धृष्टद्युम्ने विपणे हसति मु०	१	७२
ध्रुवमिदमुपदिष्टं कैश्चिदा०	१	८०
नकुलस्यापि ते भ्रातुर्भ्राता	२	३२
नखकर्षविघटनद्युतिदक्षीक०	२	५२
नमः शिवाय संसारसरो	१	१
नमिमुरुलमौलिः पाकलो०	१	७
नाले शौर्यमहोत्पलस्य वि०	२	११
निरर्गलनिर्निगलतुलगुलाक	२	१९
निर्दिशन्तु निजबाहुविक्रमं	१	५१
निर्यद्वाग्गरजीवविष्टकरणि	१	२२
निर्यान्ति यस्य वदनाद्धि०	२	२५
नीलाम्बरं नलिनदाम च	१	५३
न्यस्तं ताण्डवितभ्रु चक्षुर०	१	३१
न्यायवादी विकर्णोऽत्र	२	४४
पक्षानां या कलत्रं द्रुपदसु०	२	३७
पाणिप्रस्थंयंकुलसुमनःसौरभं	१	६५
पादो यासन्नि स्नान्द्रकुङ्कुम०	१	५०
प्रथयति पात्रविदोषान्सामा०	१	१४
प्रसर्पतु रणाङ्गणे रुधिरवेलि	१	८९
बभूव वर्मीकभवः पुरा	१	१२
ब्रह्मभ्यः शिवमस्तु वस्तु	१	८
महाद्भुतद्वयुगयस्त्रितमातत	१	७६
महीधरधरासु ये मनिनदं	२	२१
मायामये मयसभाधिनाथे	२	९

	अ०	श्लो०
यः पीयूषभुजां पुरः प्रह०	१	५५
यः सत्यस्य निधिः श्रियां	१	६२
यदुक्तिमुद्रासुहृदर्थयायी	१	१७
यद्यहं हारिता पूर्वं भवामि	२	४२
यन्मुक्तः स्फारताराध्वनि०	२	३८
यस्मिन्मदस्य मदनस्य ...	१	५७
यागकुण्डशिखिगर्भसंभवं	१	६३
यात्राकृतोऽस्य चतुरङ्ग०	१	४४
यां मे बलः स बलवान्दलि	२	४०
यावज्जैकं द्रुपददुहितुः कृ०	२	५
युधिष्ठिरो धर्ममयो महा०	२	५१
येनेयं याज्ञसेनी नृपसदसि	२	१६
ये विद्यापरमेश्वराः स्तुत०	१	२
ये सीमन्तितगात्रभस्मरज	१	१५
योगीन्द्रछन्दसां द्रष्टा रा०	१	१०
यो भार्गवाङ्गवतोऽर्जित	२	३०
यो मन्थानकरः क्रतौ निज०	२	२७
यौवराज्याभिषेकार्हो वीरो	१	४०
रणन्मणिनूपुरा रणरणद्धा०	२	३
राजन्युधिष्ठिर नराधिप ...	२	२४
राजद्दोरकवेर्मदात्मनो	१	८
राजसूयक्रतोर्यज्वा पाण्डवो	२	१३
राजसूयक्रतोर्यज्वा पाण्डु	२	७
राजावटीप्रमायानो राज०	२	१६
रे रे ब्राह्मण मुञ्च विप्लवम	१	८२
रेवतीं त्रिभुवनैकसुन्दरीं न	१	५४
लक्ष्मी संवननैर्भुजैर्नृपतयः	१	२६
वर्षाणि द्वादशारण्ये सह	२	३६
वलाधाणूरचूर्णीकरणसहभु०	१	५८

	अ०	श्लो०
वाच्यं यत्र दुरुक्तयः कुच०	२	२
विनायको यः शिवयोरप०	१	२०
विवर्तयाक्षाञ्शकुने शार०	२	१२
वीर्यं वचसि विप्राणां क्ष०	१	८८
वृषतुरगकरीन्द्रस्यन्दनाद्या०	१	५६
वैकुण्ठकार्मुकहठाक्रमणै०	१	७२
व्यासो वैशानसवृषा सत्यः	१	४
व्रीडानतेषु वदनेषु च ...	१	७४
शंभोर्मूर्ध्नि गतागतानि कुरुते	१	३५
शारीघूतकलाकुतूहलि मन०	१	२९
शिशुपालमहीपालो मेक०	१	६४
शिष्योऽसि भार्गवमुनेः	१	३७
श्रियः प्रसूते विपदो रुणद्धि	१	९
श्रीनिर्वासनडिण्डिमो घन०	२	४
श्रोणीबन्धस्त्यजति तनुतां	१	२८
सकलभुवनरक्षाव्यक्ततन्द्रा.	१	३२
संकर्षणाङ्गिजतनूज्वलकी०	२	२८
संघट्टोत्पिष्टचूडाच्युतमणि	१	८४
सत्यसंधो जरासंधः क्रान्त०	१	६७
सदाशिवप्रशिष्योऽयमवधिः	१	३६
संभूता द्रुपदा वरे हुतभुजः	२	३४
सर्वे कार्मुककर्मठाः क्षिति०	१	३४
सायकश्च त्वया मुक्तो यत्र	१	८१
सा शुक्तिर्मधुपानकेलिचप	१	६
सिन्धुयश्रितयाग्रोऽयं सि	१	४६
सुधावीचीमुचां वाग्भिर्वि०	२	१८
सौहार्दात्मणीयाद्धो प्रथिमतः	२	३१
स्मितपरिचयावृत्तिर्वांचा	१	३०
स्वस्त्यापस्तम्ब सुभ्यं त्वमसि	१	२५
हंहो हस्त कृतास्त्र दानस०	२	१४
हरचूडामणिरिन्दुस्त्रिजगदी०	१	१३
हा मग्नं शकुनेः कुलक्षयकरं	१	७१
हारोऽयं केलरक्षीविहसित०	२	१५
हे द्रौपदि त्वमसि क्षात्र	२	४१
हेलानमद्भूपकिरीटविटङ्क	२	२६
हेलालोडितपाण्डवेरलव०	२	२३

B.L.-17

BHAVANS LIBRARY

Mumbai-400 007. Ph.: 3634462/63 Ext.: 226

N.B.- This book is issued only for one week till.....
This book is should be returned within a fornight from the date last marked below.

Date	Date	Date
-13 DEC 2007		